# Shri Shiva Mahapuranam 23 Rudra Samhita Parvatikhandah

# શ્રીશિવમહાપુરાણમ્ ૨૩ રુદ્રસંહિતાયાં પાર્વતીખણ્ડઃ

## Document Information

Text title : Shivapuranam 2.3 rudrasaMhitA pArvatIkhaNDaH

File name : shivapurANam2rudrasaMhitA3pArvatIkhaNDaH.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૨૩ રુદ્રસંહિતાયાં પાર્વતીખણ્ડઃ

॥ શ્રીઃ ॥

॥ શ્રીસામ્બસદાશિવાર્પણમસ્તુ ॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧. પ્રથમોઽધ્યાયઃ । હિમાચલવિવાહવર્ણનમ્ ।

નારદ ઉવાચ ।
દાક્ષાયણી સતી દેવી ત્યક્તદેહા પિતુર્મખે ।
કથં ગિરિસુતા બ્રહ્મન્ બભૂવ જગદમ્બિકા ॥ ૧॥

કથં કૃત્વા તપોઽત્યુગ્રં પતિમાપ શિવં ચ સા ।
એતન્મે પૃચ્છતે સમ્યક્ કથય ત્વં વિશેષતઃ ॥ ૨॥

બ્રહ્મોવાચ ।
શ઼ૃણુ ત્વં મુનિશાર્દૂલ શિવાચરિતમુત્તમમ્ ।
પાવનં પરમં દિવ્યં સર્વપાપહરં શુભમ્ ॥ ૩॥

યદા દાક્ષાયણી દેવી હરેણ સહિતા મુદા ।
હિમાચલે સુચિક્રીડે લીલયા પરમેશ્વરી ॥ ૪॥

મત્સુતેયમિતિ જ્ઞાત્વા સિષેવે માતૃવર્ચસા ।
હિમાચલપ્રિયા મેના સર્વર્દ્ધિભિરનિર્ભરા ॥ ૫॥

યદા દાક્ષાયણી રુષ્ટા નાદૃતા સ્વતનું જહૌ ।
પિત્રા દક્ષેણ તદ્યજ્ઞે સઙ્ગતા પરમેશ્વરી ॥ ૬॥

તદૈવ મેનકા તાં સા હિમાચલપ્રિયા મુને ।
શિવલોકસ્થિતાં દેવીમારિરાધયિષુસ્તદા ॥ ૭॥

તસ્યામહં સુતા સ્યામિત્યવધાર્ય સતી હૃદા ।
ત્યક્તદેહા મનો દધ્રે ભવિતું હિમવત્સુતા ॥ ૮॥

સમયં પ્રાપ્ય સા દેવી સર્વદેવસ્તુતા પુનઃ ।
સતી ત્યક્તતનુઃ પ્રીત્યા મેનકાતનયાભવત્ ॥ ૯॥

નામ્ના સા પાર્વતી દેવી તપઃ કૃત્વા સુદુસ્સહમ્ ।
નારદસ્યોપદેશાદ્વૈ પતિં પ્રાપ શિવં પુનઃ ॥ ૧૦॥

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાપ્રાજ્ઞ વદ મે વદતાં વર ।
મેનકાયાઃ સમુત્પત્તિં વિવાહચરિતં તથા ॥ ૧૧॥

ધન્યા હિ મેનકા દેવી યસ્યાં જાતા સુતા સતી ।
અતો માન્યા ચ ધન્યા ચ સર્વેષાં સા પતિવ્રતા ॥ ૧૨॥

બ્રહ્મોવાચ ।
શૃણુ ત્વં નારદ મુને પાર્વતીમાતુરુદ્ભવમ્ ।
વિવાહં ચરિતં ચૈવ પાવનં ભક્તિવર્ધનમ્ ॥ ૧૩॥

અસ્ત્યુત્તરસ્યાં દિશિ વૈ ગિરીશો હિમવાન્મહાન્ ।
પર્વતો હિ મુનિશ્રેષ્ઠ મહાતેજાઃ સમૃદ્ધિભાક્ ॥ ૧૪॥

દ્વૈરૂપ્યં તસ્ય વિખ્યાતં જઙ્ગમસ્થિરભેદતઃ ।
વર્ણયામિ સમાસેન તસ્ય સૂક્ષ્મસ્વરૂપકમ્ ॥ ૧૫॥

પૂર્વાપરૌ તોયનિધી સુવિગાહ્ય સ્થિતો હિ યઃ ।
નાનારત્નાકરો રમ્યો માનદણ્ડ ઇવ ક્ષિતેઃ ॥ ૧૬॥

નાનાવૃક્ષસમાકીર્ણો નાનાશૃઙ્ગસુચિત્રિતઃ ।
સિંહવ્યાઘ્રાદિપશુભિઃ સેવિતઃ સુખિભિઃ સદા ॥ ૧૭॥

તુષારનિધિરત્યુગ્રો નાનાશ્ચર્યવિચિત્રિતઃ ।
દેવર્ષિસિદ્ધમુનિભિઃ સંશ્રિતઃ શિવસમ્પ્રિયઃ ॥ ૧૮॥

તપઃસ્થાનોઽતિપૂતાત્મા પાવનશ્ચ મહાત્મનામ્ ।
તપસ્સિદ્ધિપ્રદોઽત્યન્તં નાનાધાત્વાકરઃ શુભઃ ॥ ૧૯॥

સ એવ દિવ્યરૂપો હિ રમ્યઃ સર્વાઙ્ગસુન્દરઃ ।
વિષ્ણ્વંશોઽવિકૃતઃ શૈલરાજરાજઃ સતાં પ્રિયઃ ॥ ૨૦॥

કુલસ્થિત્યૈ ચ સ ગિરિર્ધર્મવર્દ્ધનહેતવે ।
સ્વવિવાહં કર્તુમૈચ્છત્પિતૃદેવહિતેચ્છયા ॥ ૨૧॥

તસ્મિન્નવસરે દેવાઃ સ્વાર્થમાચિન્ત્ય કૃત્સ્નશઃ ।
ઊચુઃ પિતૄન્સમાગત્ય દિવ્યાન્પ્રીત્યા મુનીશ્વર ॥ ૨૨॥

દેવા ઊચુઃ
સર્વે શ‍ૃણુત નો વાક્યં પિતરઃ પ્રીતમાનસાઃ ।
કર્તવ્યં તત્તથૈવાશુ દેવકાર્યેપ્સવો યદિ ॥ ૨૩॥

મેના નામ સુતા યા વો જ્યેષ્ઠા મઙ્ગલરૂપિણી ।
તાં વિવાહ્ય ચ સુપ્રીત્યા હિમાખ્યેન મહીભૃતા ॥ ૨૪॥

એવં સર્વમહાલાભઃ સર્વેષાં ચ ભવિષ્યતિ ।
યુષ્માકમમરાણાં ચ દુઃખહાનિઃ પદે પદે ॥ ૨૫॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્યામરવચઃ પિતરસ્તે વિમૃશ્ય ચ ।
સ્મૃત્વા શાપં સુતાનાં ચ પ્રોચુરોમિતિ તદ્વચઃ ॥ ૨૬॥

દદુર્મેનાં સુવિધિના હિમાગાય નિજાત્મજામ્ ।
સમુત્સવો મહાનાસીત્તદ્વિવાહે સુમઙ્ગલે ॥ ૨૭॥

હર્યાદયોઽપિ તે દેવા મુનયશ્ચાપરેઽખિલાઃ ।
આજગ્મુસ્તત્ર સંસ્મૃત્ય વામદેવં ભવં ધિયા ॥ ૨૮॥

ઉત્સવં કારયામાસુર્દત્ત્વા દાનાન્યનેકશઃ ।
સુપ્રશસ્ય પિતૄન્દિવ્યાન્પ્રશશંસુર્હિમાચલમ્ ॥ ૨૯॥

મહામોદાન્વિતા દેવાસ્તે સર્વે સમુનીશ્વરાઃ ।
સઞ્જગ્મુઃ સ્વસ્વધામાનિ સંસ્મરન્તઃ શિવાશિવૌ ॥ ૩૦॥

યૌતુકં બહુ સમ્પ્રાપ્ય સુવિવાહ્ય પ્રિયાં ચ તામ્ ।
આજગામ સ્વભવનં મુદમાપ ગિરીશ્વરઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।
મેનયા હિ હિમાગસ્ય સુવિવાહો મુનીશ્વર ।

પ્રોક્તો મે સુખદઃ પ્રીત્યા કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે હિમાચલવિવાહવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૩.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨. દ્વિતીયોઽધ્યાયઃ । મેનકાદીનાં સનકાદિભ્યઃ શાપપ્રાપ્તિઃ ।

નારદ ઉવાચ ।
વિધે પ્રાજ્ઞ વદેદાનીં મેનોત્પત્તિં સમાદરાત્ ।
અપિ શાપં સમાચક્ષ્વ કુરુ સન્દેહભઞ્જનમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
શ‍ૃણુ નારદ સુપ્રીત્યા મેનોત્પત્તિં વિવેકતઃ ।
મુનિભિઃ સહ વક્ષ્યેઽહં સુતવર્ય મહાબુધ ॥ ૨॥

દક્ષનામા મમ સુતો યઃ પુરા કથિતો મુને ।
તસ્ય જાતાઃ સુતાઃ ષષ્ટિપ્રમિતાઃ સૃષ્ટિકારણાઃ ॥ ૩॥

તાસાં વિવાહમકરોત્સ વરૈઃ કશ્યપાદિભિઃ ।
વિદિતં તે સમસ્તં તત્પ્રસ્તુતં શ‍ૃણુ નારદ ॥ ૪॥

તાસાં મધ્યે સ્વધાનામ્નીં પિતૃભ્યો દત્તવાન્સુતામ્ ।
તિસ્રોઽભવન્સુતાસ્તસ્યાઃ સુભગા ધર્મમૂર્તયઃ ॥ ૫॥

તાસાં નામાનિ શ‍ૃણુ મે પાવનાનિ મુનીશ્વર ।
સદા વિઘ્નહરાણ્યેવ મહામઙ્ગલદાનિ ચ ॥ ૬॥

મેનાનામ્ની સુતા જ્યેષ્ઠા મધ્યા ધન્યા કલાવતી ।
અન્ત્યા એતાઃ સુતાઃ સર્વાઃ પિતૃણાં માનસોદ્ભવાઃ ॥ ૭॥

અયોનિજાઃ સ્વધાયાશ્ચ લોકતસ્તત્સુતા મતાઃ ।
આસાં પ્રોચ્ય સુનામાનિ સર્વાન્કામાન્ જનો લભેત્ ॥ ૮॥

જગદ્વન્દ્યાઃ સદા લોકમાતરઃ પરમોદદાઃ ।

યોગિન્યઃ પરમા જ્ઞાનનિધાનાસ્તાસ્ત્રિલોકગાઃ ॥ ૯॥

એકસ્મિન્સમયે તિસ્રો ભગિન્યસ્તા મુનીશ્વર ।
શ્વેતદ્વીપં વિષ્ણુલોકં જગ્મુર્દર્શનહેતવે ॥ ૧૦॥

કૃત્વા પ્રણામં વિષ્ણોશ્ચ સંસ્તુતિં ભક્તિસંયુતાઃ ।
તસ્થુસ્તદાજ્ઞયા તત્ર સુસમાજો મહાનભૂત્ ॥ ૧૧॥

તદૈવ સનકાદ્યાસ્તુ સિદ્ધા બ્રહ્મસુતા મુને ।
ગતાસ્તત્ર હરિં નત્વા સ્તુત્વા તસ્થુસ્તદાજ્ઞયા ॥ ૧૨॥

સનકાદ્યાન્મુનીન્ દૃષ્ટ્વોત્તસ્થુસ્તે સકલા દ્રુતમ્ ।
તત્રસ્થાન્સંસ્થિતાન્નત્વા દેવાદ્યાઁલ્લોકવન્દિતાન્ ॥ ૧૩॥

તિસ્રો ભગિન્યસ્તાસ્તત્ર નોત્તસ્થુર્મોહિતા મુને ।
માયયા દૈવવિવશાઃ શઙ્કરસ્ય પરાત્મનઃ ॥ ૧૪॥

મોહિની સર્વલોકાનાં શિવમાયા ગરીયસી ।
તદધીનં જગત્સર્વં શિવેચ્છા સા પ્રકીર્ત્યતે ॥ ૧૫॥

પ્રારબ્ધં પ્રોચ્યતે સૈવ તન્નામાનિ હ્યનેકશઃ ।
શિવેચ્છયા ભવત્યેવ નાત્ર કાર્યા વિચારણા ॥ ૧૬॥

ભૂત્વા તદ્વશગાસ્તા વૈ ન ચક્રુરપિ તન્નતિમ્ ।
વિસ્મિતાઃ સમ્પ્રદૃશ્યૈવ સંસ્થિતાસ્તત્ર કેવલમ્ ॥ ૧૭॥

તાદૃશીં તદ્ગતિં દૃષ્ટ્વા સનકાદ્યા મુનીશ્વરાઃ ।
જ્ઞાનિનોઽપિ પરં ચક્રુઃ ક્રોધં દુર્વિષહં ચ તે ॥ ૧૮॥

શિવેચ્છામોહિતસ્તત્ર સક્રોધસ્તા ઉવાચ હ ।
સનત્કુમારો યોગીશઃ શાપં દણ્ડકરં દદત્ ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।
યૂયં તિસ્રો ભગિન્યશ્ચ મૂઢાઃ સદ્વયુનોજ્ઝિતાઃ ।
અજ્ઞાતશ્રુતિતત્ત્વા હિ પિતૃકન્યા અપિ ધ્રુવમ્ ॥ ૨૦॥

અભ્યુત્થાનં કૃતં નો યો નમસ્કારોઽપિ ગર્વિતાઃ ।
મોહિતા નરભાવત્વાત્સ્વર્ગાદ્ દૂરા ભવન્તુ હિ ॥ ૨૧॥

નરસ્ત્રિયઃ સમ્ભવન્તુ તિસ્રોઽપ્ય જ્ઞાનમોહિતાઃ ।
સ્વકર્મણઃ પ્રભાવેણ લભધ્વં ફલમીદૃશમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય ચ સાધ્વ્યસ્તાસ્તિસ્રોઽપિ ચકિતા ભૃશમ્ ।
પતિત્વા પાદયોસ્તસ્ય સમૂચૂર્નતમસ્તકાઃ ॥ ૨૩॥

પિતૃતનયા ઊચુઃ
મુનિવર્ય દયાસિન્ધો પ્રસન્નો ભવ ચાધુના ।
ત્વત્પ્રણામં વયં મૂઢાઃ કુર્મહે સ્મ ન ભાવતઃ ॥ ૨૪॥

પ્રાપ્તં ચ તત્ફલં વિપ્ર ન તે દોષો મહામુને ।
અનુગ્રહં કુરુષ્વાત્ર લભેમ સ્વર્ગતિં પુનઃ ॥ ૨૫॥

બ્રહ્મોવાચ
શ્રુત્વા તદ્વચનં તાત પ્રોવાચ સ મુનિસ્તદા ।
શાપોદ્ધારં પ્રસન્નાત્મા પ્રેરિતઃ શિવમાયયા ॥ ૨૬॥

સનત્કુમાર ઉવાચ
પિતૃણાં તનયાસ્તિસ્રઃ શ ૃણુત પ્રીતમાનસાઃ ।
વચનં મમ શોકઘ્નં સુખદં સર્વદૈવ વઃ ॥ ૨૭॥

વિષ્ણોરંશસ્ય શૈલસ્ય હિમાધારસ્ય કામિની ।
જ્યેષ્ઠા ભવતુ તત્કન્યા ભવિષ્યત્યેવ પાર્વતી ॥ ૨૮॥

ધન્યા પ્રિયા દ્વિતીયા તુ યોગિની જનકસ્ય ચ ।
તસ્યાઃ કન્યા મહાલક્ષ્મીર્નામ્ના સીતા ભવિષ્યતિ ॥ ૨૯॥

વૃષભાનસ્ય વૈશ્યસ્ય કનિષ્ઠા ચ કલાવતી ।
ભવિષ્યતિ પ્રિયા રાધા તત્સુતા દ્વાપરાન્તતઃ ॥ ૩૦॥

મેનકા યોગિની પત્યા પાર્વત્યાશ્ચ વરેણ ચ ।
તેન દેહેન કૈલાસં ગમિષ્યતિ પરં પદમ્ ॥ ૩૧॥

ધન્યા ચ સીતયા સીરધ્વજો જનકવંશજઃ ।
જીવન્મુક્તો મહાયોગી વૈકુણ્ઠં ચ ગમિષ્યતિ ॥ ૩૨॥

કલાવતી વૃષભાનસ્ય કૌતુકાત્કન્યયા સહ ।
જીવન્મુક્તા ચ ગોલોકં ગમિષ્યતિ ન સંશયઃ ॥ ૩૩॥

વિના વિપત્તિં મહિમા કેષાં કુત્ર ભવિષ્યતિ ।

સુકર્મિણાં ગતે દુઃખે પ્રભવેદ્ દુર્લભં સુખમ્ ॥ ૩૪॥

પિતૄણાં તનયાઃ યૂયં સર્વાઃ સ્વર્ગવિલાસિકાઃ ।
કર્મક્ષયશ્ચ યુષ્માકમભવદ્વિષ્ણુદર્શનાત્ ॥ ૩૫॥

ઇત્યુક્ત્વા પુનરપ્યાહ ગતક્રોધો મુનીશ્વરઃ ।
શિવં સંસ્મૃત્ય મનસા જ્ઞાનદં ભુક્તિમુક્તિદમ્ ॥ ૩૬॥

અપરં શ ृણુત પ્રીત્યા મદ્વચઃ સુખદં સદા ।
ધન્યા યૂયં શિવપ્રીતા માન્યા પૂજ્યા હ્યભીક્ષ્ણશઃ ॥ ૩૭॥

મેનાયાસ્તનયા દેવી પાર્વતી જગદમ્બિકા ।
ભવિષ્યતિ પ્રિયા શમ્ભોસ્તપઃ કૃત્વા સુદુસ્સહમ્ ॥ ૩૮॥

ધન્યાસુતા સ્મૃતા સીતા રામપત્ની ભવિષ્યતિ ।
લૌકિકાચારમાશ્રિત્ય રામેણ વિહરિષ્યતિ ॥ ૩૯॥

કલાવતીસુતા રાધા સાક્ષાદ્ ગોલોકવાસિની ।
ગુપ્તસ્નેહનિબદ્ધા સા કૃષ્ણપત્ની ભવિષ્યતિ ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇત્થમાભાષ્ય સ મુનિર્ભ્રાતૃભિઃ સહ સંસ્તુતઃ ।
સનત્કુમારો ભગવાઁસ્તત્રૈવાન્તર્હિતોઽભવત્ ॥ ૪૧॥

તિસ્રો ભગિન્યસ્તાસ્તાત પિતૄણાં માનસીઃ સુતાઃ ।
ગતપાપાઃ સુખં પ્રાપ્ય સ્વધામ પ્રયયુર્દ્રુતમ્ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પૂર્વગતિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૩.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩. તૃતીયોઽધ્યાયઃ । વિષ્ણ્વાદિદેવૈઃ કૃતા શિવસ્તુતિઃ ।

નારદ ઉવાચ ।
વિધે પ્રાજ્ઞ મહાધીમન્વદ મે વદતાં વર ।

તતઃ પરં કિમભવચ્ચરિતં વિષ્ણુસદ્ગુરોઃ ॥ ૧॥

અદ્ભુતેયં કથા પ્રોક્તા મેનાપૂર્વગતિઃ શુભા ।
વિવાહશ્ચ શ્રુતઃ સમ્યક્ પરમં ચરિતં વદ ॥ ૨॥

મેનાં વિવાહ્ય સ ગિરિઃ કૃતવાન્ કિં તતઃ પરમ્ ।
પાર્વતી કથમુત્પન્ના તસ્યાં વૈ જગદમ્બિકા ॥ ૩॥

તપઃ સુદુસ્સહં કૃત્વા કથં પ્રાપ પતિં હરમ્ ।
એતત્સર્વં સમાચક્ષ્વ વિસ્તરાચ્છાઙ્કરં યશઃ ॥ ૪॥

બ્રહ્મોવાચ ।
મુને ત્વં શ‍ૃણુ સુપ્રીત્યા શાઙ્કરં સુયશઃ શુભમ્ ।
યચ્છ્રુત્વા બ્રહ્મહા શુદ્ધ્યેત્સર્વાન્કામાનવાપ્નુયાત્ ॥ ૫॥

યદા મેનાવિવાહં તુ કૃત્વાગચ્છદ્ગિરિર્ગૃહમ્ ।
તદા સમુત્સવો જાતસ્ત્રિષુ લોકેષુ નારદ ॥ ૬॥

હિમાચલોઽપિ સુપ્રીતશ્ચકાર પરમોત્સવમ્ ।
ભૂસુરાન્ બન્ધુવર્ગાંશ્ચ પરાનાનર્ચ સદ્ધિયા ॥ ૭॥

સર્વે દ્વિજાશ્ચ સન્તુષ્ટા દત્ત્વાશીર્વચનં વરમ્ ।
યયુસ્તસ્મૈ સ્વસ્વધામ બન્ધુવર્ગાસ્તથાપરે ॥ ૮॥

હિમાચલોઽપિ સુપ્રીતો મેનયા સુખદે ગૃહે ।
રેમેઽન્યત્ર ચ સુસ્થાને નન્દનાદિવનેષ્વપિ ॥ ૯॥

તસ્મિન્નવસરે દેવા મુને વિષ્ણ્વાદયોઽખિલાઃ ।
મુનયશ્ચ મહાત્માનઃ પ્રજગ્મુર્ભૂધરાન્તિકે ॥ ૧૦॥

દૃષ્ટ્વા તાનાગતાન્દેવાન્પ્રણનામ મુદા ગિરિઃ ।
સમ્માનં કૃતવાન્ ભક્ત્યા પ્રશંસન્ સ્વવિધિં મહાન્ ॥ ૧૧॥

સાઞ્જલિર્નતશીર્ષો હિ સ તુષ્ટાવ સુભક્તિતઃ ।
રોમોદ્ગમો મહાનાસીદ્ગિરેઃ પ્રેમાશ્રવોઽપતન્ ॥ ૧૨॥

તતઃ પ્રણમ્ય સુપ્રીતો હિમશૈલઃ પ્રસન્નધીઃ ।
ઉવાચ પ્રણતો ભૂત્વા મુને વિષ્ણ્વાદિકાન્સુરાન્ ॥ ૧૩॥

હિમાચલ ઉવાચ ।
અદ્ય મે સફલં જન્મ સફલં સુમહત્તપઃ ।

અદ્ય મે સફલં જ્ઞાનમદ્ય મે સફલાઃ ક્રિયાઃ ॥ ૧૪॥

ધન્યોઽહમદ્ય સઞ્જાતો ધન્યા મે સકલા ક્ષિતિઃ ।
ધન્યં કુલં તથા દારાઃ સર્વં ધન્યં ન સંશયઃ ॥ ૧૫॥

યતઃ સમાગતા યૂયં મિલિત્વા સર્વ એકદા ।
માં નિદેશયત પ્રીત્યોચિતં મત્વા સ્વસેવકમ્ ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા મહીધ્રસ્ય વચનં તે સુરાસ્તદા ।
ઊચુર્હર્યાદયઃ પ્રીતાઃ સિદ્ધિં મત્વા સ્વકાર્યતઃ ॥ ૧૭॥

દેવા ઊચુઃ ।
હિમાચલ મહાપ્રાજ્ઞ શૃણ્વસ્મદ્વચનં હિતમ્ ।
યદર્થમાગતાઃ સર્વે તદ્ બ્રૂમઃ પ્રીતિતો વયમ્ ॥ ૧૮॥

યા પુરા જગદમ્બોમા દક્ષકન્યાભવદ્ગિરે ।
રુદ્રપત્ની હિ સા ભૂત્વા ચિક્રીડે સુચિરં ભુવિ ॥ ૧૯॥

પિતૃતોઽનાદરં પ્રાપ્ય સંસ્મૃત્ય સ્વપણં સતી ।
જગામ સ્વપદં ત્યક્ત્વા તચ્છરીરં તદામ્બિકા ॥ ૨૦॥

સા કથા વિદિતા લોકે તવાપિ હિમભૂધર ।
એવં સતિ મહાલાભો ભવેદ્દેવગણસ્ય હિ ॥ ૨૧॥

સર્વસ્ય ભવતશ્ચાપિ સ્યુઃ સર્વે તે વશાઃ સુરાઃ । ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં હર્યાદીનાં ગિરીશ્વરઃ ।
તથાસ્ત્વિતિ પ્રસન્નાત્મા પ્રોવાચ ન ચ આદરાત્ ॥ ૨૩॥

અથ તે ચ સમાદિશ્ય તદ્વિધિં પરમાદરાત્ ।
સ્વયં જગ્મુશ્ચ શરણમુમાયાઃ શઙ્કરસ્ત્રિયઃ ॥ ૨૪॥

સુસ્થલે મનસા સ્થિત્વા સસ્મરુર્જગદમ્બિકામ્ ।
પ્રણમ્ય બહુશસ્તત્ર તુષ્ટુવુઃ શ્રદ્ધયા સુરાઃ ॥ ૨૫॥

દેવા ઊચુઃ ।
દેવ્યુમે જગતામમ્બ શિવલોકનિવાસિનિ ।
સદાશિવપ્રિયે દુર્ગે ત્વાં નમામો મહેશ્વરિ ॥ ૨૬॥

શ્રીશક્તિં પાવનાં શાન્તાં પુષ્ટિં પરમપાવનીમ્ ।
વયં નમામહે ભક્ત્યા મહદવ્યક્તરૂપિણીમ્ ॥ ૨૭॥

શિવાં શિવકરાં શુદ્ધાં સ્થૂલાં સૂક્ષ્માં પરાયણામ્ ।
અન્તર્વિદ્યાસુવિદ્યાભ્યાં સુપ્રીતાં ત્વાં નમામહે ॥ ૨૮॥

ત્વં શ્રદ્ધા ત્વં ધૃતિસ્ત્વં શ્રીસ્ત્વમેવ સર્વગોચરા ।
ત્વં દીધિતિસ્સૂર્યગતા સ્વપ્રપઞ્ચપ્રકાશિની ॥ ૨૯॥

યા ચ બ્રહ્માણ્ડસંસ્થાને જગજ્જીવેષુ યા જગત્ ।
આપ્યાયયતિ બ્રહ્માદિતૃણાન્તં તાં નમામહે ॥ ૩૦॥

ગાયત્રી ત્વં વેદમાતા ત્વં સાવિત્રી સરસ્વતી ।
ત્વં વાર્તા સર્વજગતાં ત્વં ત્રયી ધર્મરૂપિણી ॥ ૩૧॥

નિદ્રા ત્વં સર્વભૂતેષુ ક્ષુધા તૃપ્તિસ્ત્વમેવ હિ ।
તૃષ્ણા કાન્તિશ્છવિસ્તુષ્ટિઃ સર્વાનન્દકરી સદા ॥ ૩૨॥

ત્વં લક્ષ્મીઃ પુણ્યકર્તૃણાં ત્વં જ્યેષ્ઠા પાપિનાં સદા ।
ત્વં શાન્તિઃ સર્વજગતાં ત્વં ધાત્રી પ્રાણપોષિણી ॥ ૩૩॥

ત્વં તત્ત્વરૂપા ભૂતાનાં પઞ્ચાનામપિ સારકૃત્ ।
ત્વં હિ નીતિભૃતાં નીતિર્વ્યવસાયસ્વરૂપિણી ॥ ૩૪॥

ગીતિસ્ત્વં સામવેદસ્ય ગ્રન્થિસ્ત્વં યજુષાં હુતિઃ ।
ઋગ્વેદસ્ય તથા માત્રાથર્વણસ્ય પરા ગતિઃ ॥ ૩૫॥

સમસ્તગીર્વાણગણસ્ય શક્તિ-
સ્તમોમયી ધાતૃગુણૈકદૃશ્યા ।
રજઃ પ્રપઞ્ચાત્તુ ભવૈકરૂપા
યા નઃ શ્રુતા ભવ્યકરી સ્તુતેહ ॥ ૩૬॥

સંસારસાગરકરાલભવાઙ્ગદુઃખ-
નિસ્તારકારિતરણિં ચ નિવીતહીનામ્ ।
અષ્ટાઙ્ગયોગપરિપાલનકેલિદક્ષાં
વિન્ધ્યાગવાસનિરતાં પ્રણમામ તાં વૈ ॥ ૩૭॥

નાસાક્ષિવક્ત્રભુજવક્ષસિ માનસે ચ
ધૃત્યા સુખાનિ વિતનોતિ સદૈવ જન્તોઃ ।

નિદ્રેતિ યાતિ સુભગા જગતી ભવાનાં
સા નઃ પ્રસીદતુ ભવસ્થિતિપાલનાય ॥ ૩૮॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુત્વા મહેશાનીં જગદમ્બામુમાં સતીમ્ ।
સુપ્રેમમનસઃ સર્વે તસ્થુસ્તે દર્શનેપ્સવઃ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે દેવસ્તુતિર્નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૩.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪. ચતુર્થોઽધ્યાયઃ । શિવેન દેવાનાં સાન્ત્વનમ્ ।

બ્રહ્મોવાચ ।
ઇત્થં દેવૈઃ સ્તુતા દેવી દુર્ગા દુર્ગાર્તિનાશિની ।
આવિર્બભૂવ દેવાનાં પુરતો જગદમ્બિકા ॥ ૧॥

રથે રત્નમયે દિવ્યે સંસ્થિતા પરમાદ્ભુતે ।
કિઙ્કિણીજાલસંયુક્તે મૃદુસંસ્તરણે વરે ॥ ૨॥

કોટિસૂર્યાધિકાભાસરમ્યાવયવભાસિની ।
સ્વતેજોરાશિમધ્યસ્થા વરરૂપાસમચ્છવિઃ ॥ ૩॥

અનૂપમા મહામાયા સદાશિવવિલાસિની ।
ત્રિગુણા નિર્ગુણા નિત્યા શિવલોકનિવાસિની ॥ ૪॥

ત્રિદેવજનની ચણ્ડી શિવા સર્વાર્તિનાશિની ।
સર્વમાતા મહાનિદ્રા સર્વસ્વજનતારિણી ॥ ૫॥

તેજોરાશેઃ પ્રભાવાત્તુ સા તુ દૃષ્ટા સુરૈશ્શિવા ।
તુષ્ટુવુસ્તાં પુનસ્તે વૈ સુરા દર્શનકાઙ્ક્ષિણઃ ॥ ૬॥

અથ દેવગણાઃ સર્વે વિષ્ણ્વાદ્યા દર્શનેપ્સવઃ ।
દદૃશુર્જગદમ્બાં તાં તત્કૃપાં પ્રાપ્ય તત્ર હિ ॥ ૭॥

બભૂવાનન્દસન્દોહઃ સર્વેષાં ત્રિદિવૌકસામ્ ।

પુનઃ પુનઃ પ્રણેમુસ્તાં તુષ્ટુવુશ્ચ વિશેષતઃ ॥ ૮॥

દેવા ઊચુઃ ।
શિવે શર્વાણિ કલ્યાણિ જગદમ્બ મહેશ્વરિ ।
ત્વાં નતાઃ સર્વથા દેવા વયં સર્વાર્તિનાશિનીમ્ ॥ ૯॥

ન હિ જાનન્તિ દેવેશિ વેદાઃ શાસ્ત્રાણિ કૃત્સ્નશઃ ।
અતીતો મહિમા ધ્યાનં તવ વાઙ્મનસોઃ શિવે ॥ ૧૦॥

અતદ્વ્યાવૃત્તિતસ્ત્વાં વૈ ચકિતં ચકિતં સદા ।
અભિધત્તે શ્રુતિરપિ પરેષાં કા કથા મતા ॥ ૧૧॥

જાનન્તિ બહવો ભક્તાસ્ત્વત્કૃપાં પ્રાપ્ય ભક્તિતઃ ।
શરણાગતભક્તાનાં ન કુત્રાપિ ભયાદિકમ્ ॥ ૧૨॥

વિજ્ઞપ્તિં શ◌ૃણુ સુપ્રીતા યસ્યા દાસાઃ સદામ્બિકે ।
તવ દેવિ મહાદેવિ હીનતો વર્ણયામહે ॥ ૧૩॥

પુરા દક્ષસુતા ભૂત્વા સઞ્જાતા હરવલ્લભા ।
બ્રહ્મણશ્ચ પરેષાં વાનાશયત્ત્વમકં મહત્ ॥ ૧૪॥

પિતૃતોઽનાદરં પ્રાપ્યાત્યજઃ પણવશાત્તનુમ્ ।
સ્વલોકમગમસ્ત્વં વાલભદ્દુખં હરોઽપિ હિ ॥ ૧૫॥

ન હિ જાતં પ્રપૂર્ણં તદ્દેવકાર્યં મહેશ્વરિ ।
વ્યાકુલા મુનયો દેવાઃ શરણં ત્વાં ગતા વયમ્ ॥ ૧૬॥

પૂર્ણં કુરુ મહેશાનિ નિર્જરાણાં મનોરથમ્ ।
સનત્કુમારવચનં સફલં સ્યાદ્યથા શિવે ॥ ૧૭॥

અવતીર્ય ક્ષિતૌ દેવિ રુદ્રપત્ની પુનર્ભવ ।
લીલાં કુરુ યથાયોગ્યં પ્રાપ્નુયુર્નિર્જરાઃ સુખમ્ ॥ ૧૮॥

સુખી સ્યાદ્દેવિ રુદ્રોઽપિ કૈલાસાચલસંસ્થિતઃ ।
સર્વે ભવન્તુ સુખિનો દુઃખં નશ્યતુ કૃત્સ્નશઃ ॥ ૧૯॥

બ્રહ્મોવાચ ।
ઇતિ પ્રોચ્યામરાઃ સર્વે વિષ્ણ્વાદ્યાઃ પ્રેમસઙ્કુલાઃ ।
મૌનમાસ્થાય સન્તસ્થુર્ભક્તિનમ્રાત્મમૂર્તયઃ ॥ ૨૦॥

શિવાપિ સુપ્રસન્નાભૂદાકર્ણ્યામરસંસ્તુતિમ્ ।

આકલય્યાથ તદ્ધેતું સંસ્મૃત્ય સ્વપ્રભું શિવમ્ ॥ ૨૧॥

ઉવાચોમા તદા દેવી સમ્બોધ્ય વિબુધાંશ્ચ તાન્ ।
વિહસ્ય માપતિમુખાન્ સદયા ભક્તવત્સલા ॥ ૨૨॥

ઉમોવાચ
હે હરે હે વિધે દેવા મુનયશ્ચ ગતવ્યથાઃ ।
સર્વે શ‍ૃણુત મદ્વાક્યં પ્રસન્નાહં ન સંશયઃ ॥ ૨૩॥

ચરિતં મમ સર્વત્ર ત્રૈલોક્યસ્ય સુખાવહમ્ ।
કૃતં મયૈવં સકલં દક્ષમોહાદિકં ચ તત્ ॥ ૨૪॥

અવતારં કરિષ્યામિ ક્ષિતૌ પૂર્ણં ન સંશયઃ ।
બહવો હેતવોઽપ્યત્ર તદ્વદામિ મહાદરાત્ ॥ ૨૫॥

પુરા હિમાચલો દેવા મેના ચાતિસુભક્તિતઃ ।
સેવાં મે ચક્રતુસ્તાતજનનીવત્સતીતનોઃ ॥ ૨૬॥

ઇદાનીં કુરુતઃ સેવાં સુભક્ત્યા મમ નિત્યશઃ ।
મેના વિશેષતસ્તત્ર સુતાત્વે નાત્ર સંશયઃ ॥ ૨૭॥

રુદ્રો ગચ્છતુ યૂયં ચાવતારં હિમવદ્ગૃહે ।
અતશ્ચાવતરિષ્યામિ દુઃખનાશો ભવિષ્યતિ ॥ ૨૮॥

સર્વે ગચ્છત ધામ સ્વં સ્વં સુખં લભતાં ચિરમ્ ।
અવતીર્ય સુતા ભૂત્વા મેનાયા દાસ્ય ઉત્સુખમ્ ॥ ૨૯॥

હરપત્ની ભવિષ્યામિ સુગુપ્તં મતમાત્મનઃ ।
અદ્ભુતા શિવલીલા હિ જ્ઞાનિનામપિ મોહિની ॥ ૩૦॥

યાવત્પ્રભૃતિ મે ત્યક્તા સ્વતનુર્દક્ષજા સુરાઃ ।
પિતૃતોઽનાદરં દૃષ્ટ્વા સ્વામિનસ્તત્ક્રતૌ ગતા ॥ ૩૧॥

તદાપ્રભૃતિ સ સ્વામી રુદ્રઃ કાલાગ્નિસંજ્ઞકઃ ।
દિગમ્બરો બભૂવાશુ મચ્ચિન્તનપરાયણઃ ॥ ૩૨॥

મમ રોષં ક્રતૌ દૃષ્ટ્વા પિતુસ્તત્ર ગતા સતી ।
અત્યજત્સ્વતનું પ્રીત્યા ધર્મજ્ઞેતિ વિચારતઃ ॥ ૩૩॥

યોગ્યભૂત્સદનં ત્યક્ત્વા કૃત્વા વેષમલૌકિકમ્ ।
ન સેહે વિરહં સત્યા મદ્રૂપાયા મહેશ્વરઃ ॥ ૩૪॥

મમ હેતોર્મહાદુઃખી સ બભૂવ કુવેષભૃત્ ।
અત્યજત્સ તદારભ્ય કામજં સુખમુત્તમમ્ ॥ ૩૫॥

અન્યચ્છૃણુત હે વિષ્ણો હે વિધે મુનયઃ સુરાઃ ।
મહાપ્રભોર્મહેશસ્ય લીલાં ભુવનપાલિનીમ્ ॥ ૩૬॥

વિધાય માલાં સુપ્રીત્યા મમાસ્થ્નાં વિરહાકુલઃ ।
ન શાન્તિં પ્રાપ કુત્રાપિ પ્રબુદ્ધોઽપ્યેક એવ સઃ ॥ ૩૭॥

ઇતસ્તતો રુરોદોચ્ચૈરનીશ ઇવ સ પ્રભુઃ ।
યોગ્યાયોગ્યં ન બુબુધે ભ્રમન્સર્વત્ર સર્વદા ॥ ૩૮॥

ઇત્થં લીલાં હરોઽકાર્ષીદ્દર્શયન્કામિનાં પ્રભુઃ ।
ઊચે કામુકવદ્વાણીં વિરહવ્યાકુલામિવ ॥ ૩૯॥

વસ્તુતોઽવિકૃતોઽદીનોઽસ્ત્યજિતઃ પરમેશ્વરઃ ।
પરિપૂર્ણઃ શિવઃ સ્વામી માયાધીશોઽખિલેશ્વરઃ ॥ ૪૦॥

અન્યથા મોહતસ્તસ્ય કિં કામાચ્ચ પ્રયોજનમ્ ।
વિકારેણાપિ કેનાશુ માયાલિપ્તો ન સ પ્રભુઃ ॥ ૪૧॥

રુદ્રોઽતીવેચ્છતિ વિભુઃ સ મે કર્તું કરગ્રહમ્ ।
અવતારં ક્ષિતૌ મેનાહિમાચલગૃહે સુરાઃ ॥ ૪૨॥

અતશ્ચાવતરિષ્યામિ રુદ્રસન્તોષહેતવે ।
હિમાગપત્ન્યાં મેનાયાં લૌકિકીં ગતિમાશ્રિતા ॥ ૪૩॥

ભક્તા રુદ્રપ્રિયા ભૂત્વા તપઃ કૃત્વા સુદુસ્સહમ્ ।
દેવકાર્યં કરિષ્યામિ સત્યં સત્યં ન સંશયઃ ॥ ૪૪॥

ગચ્છત સ્વગૃહં સર્વે ભવં ભજત નિત્યશઃ ।
તત્કૃપાતોઽખિલં દુઃખં વિનશ્યતિ ન સંશયઃ ॥ ૪૫॥

ભવિષ્યતિ કૃપાલોસ્તુ કૃપયા મઙ્ગલં સદા ।
વન્દ્યા પૂજ્યા ત્રિલોકેઽહં તજ્જાયેતિ ચ હેતુતઃ ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા જગદમ્બા સા દેવાનાં પશ્યતાં તદા ।
અન્તર્દધે શિવા તાત સ્વં લોકં પ્રાપ વૈ દ્રુતમ્ ॥ ૪૭॥

વિષ્ણ્વાદયઃ સુરાઃ સર્વે મુનયશ્ચ મુદાન્વિતાઃ ।
કૃત્વા તદ્દિશિ સન્નામં સ્વસ્વધામાનિ સંયયુઃ ॥ ૪૮॥

ઇત્થં દુર્ગાસુચરિતં વર્ણિતં તે મુનીશ્વર ।
સર્વદા સુખદં નૃણાં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪૯॥

ય ઇદં શૃણુયાન્નિત્યં શ્રાવયેદ્વા સમાહિતઃ ।
પઠેદ્વા પાઠયેદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે દેવસાન્ત્વનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૩.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫. પઞ્ચમોઽધ્યાયઃ । મેનકયા વરપ્રાપ્તિઃ ।

નારદ ઉવાચ ।
અન્તર્હિતાયાં દેવ્યાં તુ દુર્ગાયાં સ્વગૃહેષુ ચ ।
ગતેષ્વમરવૃન્દેષુ કિમભૂત્તદનન્તરમ્ ॥ ૧॥

કથં મેનાગિરીશૌ ચ તેપાતે પરમં તપઃ ।
કથં સુતાભવત્તસ્ય મેનાયાં તાત તદ્વદ ॥ ૨॥

બ્રહ્મોવાચ
વિપ્રવર્ય સુતશ્રેષ્ઠ શૃણુ તચ્ચરિતં મહત્ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા વચ્મિ ભક્તિવિવર્ધનમ્ ॥ ૩॥

ઉપદિશ્ય ગતે તાત સુરવૃન્દે ગિરીશ્વરઃ ।
હર્યાદૌ મેનકા ચાપિ તેપાતે પરમં તપઃ ॥ ૪॥

અહર્નિશં શિવાં શમ્ભું ચિન્તયન્તૌ ચ દમ્પતી ।
સમ્યગારેધતુર્નિત્યં ભક્તિયુક્તેન ચેતસા ॥ ૫॥

ગિરિપ્રિયાતીવ મુદાનર્ચ દેવીં શિવેન સા ।
દાનં દદૌ દ્વિજેભ્યશ્ચ સદા તત્તોષહેતવે ॥ ૬॥

ચૈત્રમાસં સમારભ્ય સપ્તવિંશતિવત્સરાન્ ।

શિવાં સમ્પૂજયામાસાપત્યાર્થિન્યન્વહં રતા ॥ ૭॥

અષ્ટમ્યામુપવાસં તુ કૃત્વાદાન્નવમીતિથૌ ।
મોદકૈર્બલિપિષ્ટૈશ્ચ પાયસૈર્ગન્ધપુષ્પકૈઃ ॥ ૮॥

ગઙ્ગાયામૌષધિપ્રસ્થે કૃત્વા મૂર્તિં મહીમયીમ્ ।
ઉમાયાઃ પૂજયામાસ નાનાવસ્તુસમર્પણૈઃ ॥ ૯॥

કદાચિત્સા નિરાહારા કદાચિત્સા ધૃતવ્રતા ।
કદાચિત્પવનાહારા કદાચિજ્જલભુધ્યભૂત્ ॥ ૧૦॥

શિવાવિન્યસ્તચેતસ્કા સપ્તવિંશતિવત્સરાન્ ।
નિનાય મેનકા પ્રીત્યા પરં સા મૃષ્ટવર્ચસા ॥ ૧૧॥

સપ્તવિંશતિવર્ષાન્તે જગન્માતા જગન્મયી ।
સુપ્રીતાભવદત્યર્થમુમા શઙ્કરકામિની ॥ ૧૨॥

અનુગ્રહાય મેનાયાઃ પુરતઃ પરમેશ્વરી ।
આવિર્બભૂવ સા દેવી સન્તુષ્ટા તત્સુભક્તિતઃ ॥ ૧૩॥

દિવ્યાવયવસંયુક્તા તેજોમણ્ડલમધ્યગા ।
ઉવાચ વિહસન્તી સા મેનાં પ્રત્યક્ષતાં ગતા ॥ ૧૪॥

દેવ્યુવાચ ।
વરં બ્રૂહિ મહાસાધ્વિ યત્તે મનસિ વર્તતે ।
સુપ્રસન્ના ચ તપસા તવાહં ગિરિકામિનિ ॥ ૧૫॥

યત્પ્રાર્થિતં ત્વયા મેને તપોવ્રતસમાધિના ।
દાસ્યે તેઽહં ચ તત્સર્વં વાઞ્છિતં યદ્યદા ભવેત્ ॥ ૧૬॥

તતઃસા મેનકા દેવીં પ્રત્યક્ષાં કાલિકાં તદા ।
દૃષ્ટ્વા ચ પ્રણનામાથ વચનં ચેદમબ્રવીત્ ॥ ૧૭॥

મેનોવાચ
દેવિ પ્રત્યક્ષતો રૂપં દૃષ્ટં તવ મયાધુના ।
ત્વામહં સ્તોતુમિચ્છામિ પ્રસન્ના ભવ કાલિકે ॥ ૧૮॥

બ્રહ્મોવાચ
અથ સા મેનયેત્યુક્તા કાલિકા સર્વમોહિની ।
બાહુભ્યાં સુપ્રસન્નાત્મા મેનકાં પરિષસ્વજે ॥ ૧૯॥

તતઃ પ્રાપ્તમહાજ્ઞાના મેનકા કાલિકાં શિવમ્ ।
તુષ્ટાવ વાગ્ભિરિષ્ટાભિર્ભક્ત્યા પ્રત્યક્ષતાં ગતામ્ ॥ ૨૦॥

મેનોવાચ ।
મહામાયાં જગદ્ધાત્રીં ચણ્ડિકાં લોકધારિણીમ્ ।
પ્રણમામિ મહાદેવીં સર્વકામાર્થદાયિનીમ્ ॥ ૨૧॥

નિત્યાનન્દકરીં માયાં યોગનિદ્રાં જગત્પ્રસૂમ્ ।
પ્રણમામિ સદા સિદ્ધાં શુભસારસમાલિનીમ્ ॥ ૨૨॥

માતામહીં સદાનન્દાં ભક્તશોકવિનાશિનીમ્ ।
આકલ્પં વનિતાનાં ચ પ્રાણિનાં બુદ્ધિરૂપિણીમ્ ॥ ૨૩॥

સા ત્વં બન્ધચ્છેદહેતુર્યતીનાં
કસ્તે ગેયો માદૃશીભિઃ પ્રભાવઃ ।
હિંસાં યા વાથર્વવેદસ્ય સા ત્વં
નિત્યં કામં ત્વં મમેષ્ટં વિધેહિ ॥ ૨૪॥

નિત્યાનિત્યૈર્ભાવહીનૈઃ પરાસ્તૈ-
સ્તત્તન્માત્રૈર્યોજ્યતે ભૂતવર્ગઃ ।
તેષાં શક્તિસ્ત્વં સદા નિત્યરૂપા
કાલે યોષા યોગયુક્તા સમર્થા ॥ ૨૫॥

યોનિર્ધરિત્રી જગતાં ત્વમેવ
ત્વમેવ નિત્યા પ્રકૃતિઃ પરસ્તાત્ ।
યયા વશં ક્રિયતે બ્રહ્મરૂપં
સા ત્વં નિત્યા મે પ્રસીદાદ્ય માતઃ ॥ ૨૬॥

ત્વં જાતવેદોગતશક્તિરુગ્રા
ત્વં દાહિકા સૂર્યકરસ્ય શક્તિઃ ।
આહ્લાદિકા ત્વં બહુચન્દ્રિકા યા
તાં ત્વામહં સ્તૌમિ નમામિ ચણ્ડીમ્ ॥ ૨૭॥

યોષાણાં સત્પ્રિયા ચ ત્વં નિત્યા ત્વં ચોર્ધ્વરેતસામ્ ।
વાઞ્છા ત્વં સર્વજગતાં માયા ચ ત્વં યથા હરેઃ ॥ ૨૮॥

યા ચેષ્ટરૂપાણિ વિધાય દેવી
સૃષ્ટિસ્થિતિર્નાશમયી ચ કર્ત્રી ।

બ્રહ્માચ્યુતસ્થાણુશરીરહેતુઃ
સા ત્વં પ્રસીદાદ્ય પુનર્નમસ્તે ॥ ૨૯॥

બ્રહ્મોવાચ
તત ઇત્થં સ્તુતા દુર્ગા કાલિકા પુનરેવ હિ ।
ઉવાચ મેનકાં દેવીં વાઞ્છિતં વરયેત્યુત ॥ ૩૦॥

ઉમોવાચ
પ્રાણપ્રિયા મમ ત્વં હિ હિમાચલવિલાસિનિ ।
યદિચ્છસિ ધ્રુવં દાસ્યે નાદેયં વિદ્યતે મમ ॥ ૩૧॥

ઇતિ શ્રુત્વા મહેશાન્યાઃ પીયૂષસદૃશં વચઃ ।
ઉવાચ પરિતુષ્ટા સા મેનકા ગિરિકામિની ॥ ૩૨॥

મેનોવાચ
શિવે જય જય પ્રાજ્ઞે મહેશ્વરિ ભવામ્બિકે ।
વરયોગ્યાસ્મ્યહં ચેત્તે વૃણે ભૂયો વરં વરમ્ ॥ ૩૩॥

પ્રથમં શતપુત્રા મે ભવન્તુ જગદમ્બિકે ।
બહ્વાયુષો વીર્યવન્ત ઋદ્ધિસિદ્ધિસમન્વિતાઃ ॥ ૩૪॥

પશ્ચાત્તથૈકા તનયા સ્વરૂપગુણશાલિની ।
કુલદ્વયાનન્દકરી ભુવનત્રયપૂજિતા ॥ ૩૫॥

સુતા ભવ મમ શિવે દેવકાર્યાર્થમેવ હિ ।
રુદ્રપત્ની ભવ તથા લીલાં કુરુ ભવામ્બિકે ॥ ૩૬॥

બ્રહ્મોવાચ
તચ્છ્રુત્વા મેનકોક્તં હિ પ્રાહ દેવી પ્રસન્નધીઃ ।
સ્મિતપૂર્વં વચસ્તસ્યાઃ પૂરયન્તી મનોરથમ્ ॥ ૩૭॥

દેવ્યુવાચ ।
શતપુત્રાઃ સમ્ભવન્તુ ભવત્યા વીર્યસંયુતાઃ ।
તત્રૈકો બલવાન્મુખ્યઃ પ્રથમં સમ્ભવિષ્યતિ ॥ ૩૮॥

સુતાહં સમ્ભવિષ્યામિ સન્તુષ્ટા તવ ભક્તિતઃ ।
દેવકાર્યં કરિષ્યામિ સેવિતા નિખિલૈઃ સુરૈઃ ॥ ૩૯॥

બ્રહ્મોવાચ

એવમુક્ત્વા જગદ્ધાત્રી કાલિકા પરમેશ્વરી ।
પશ્યન્ત્યા મેનકાયાસ્તુ તત્રૈવાન્તર્દધે શિવા ॥ ૪૦॥

મેનકાપિ વરં લબ્ધ્વા મહેશાન્યા અભીપ્સિતમ્ ।
મુદં પ્રાપામિતાં તાત તપઃક્લેશોઽપ્યનશ્યત ॥ ૪૧॥

દિશિ તસ્યાં નમસ્કૃત્ય સુપ્રહૃષ્ટમનાઃ સતી ।
જયશબ્દં પ્રોચ્ચરન્તી સ્વસ્થાનં પ્રવિવેશ હ ॥ ૪૨॥

અથ તસ્મૈ સ્વપતયે શશંસ સુવરં ચ તમ્ ।
સ્વચિહ્નબુદ્ધમિવ વૈ સુવાચા પુનરુક્તયા ॥ ૪૩॥

શ્રુત્વા શૈલપતિર્હૃષ્ટોઽભવન્મેનાવચો હિ તત્ ।
પ્રશશંસ પ્રિયાં પ્રીત્યા શિવાભક્તિરતાં ચ તામ્ ॥ ૪૪॥

કાલક્રમેણાથ તયોઃ પ્રવૃત્તે સુરતે મુને ।
ગર્ભો બભૂવ મેનાયા વવૃધે પ્રત્યહં ચ સઃ ॥ ૪૫॥

અસૂત સા નાગવધૂપભોગ્યં સુતમુત્તમમ્ ।
સમુદ્રબદ્ધસત્સખ્યં મૈનાકાભિધમદ્ભુતમ્ ॥ ૪૬॥

વૃત્રશત્રાવપિ ક્રુદ્ધે વેદનાઙ્કં સપક્ષકમ્ ।
પવિક્ષતાનાં દેવર્ષે પક્ષચ્છિદિ વરાઙ્ગકમ્ ॥ ૪૭॥

પ્રવરં શતપુત્રાણાં મહાબલપરાક્રમમ્ ।
સ્વોદ્ભવાનાં મહીધ્રાણાં પર્વતેન્દ્રૈકધિષ્ઠિતમ્ ॥ ૪૮॥

આસીન્મહોત્સવસ્તત્ર હિમાચલપુરેઽદ્ભુતઃ ।
દમ્પત્યોઃ પ્રમુદાધિક્યં બભૂવ ક્લેશસઙ્ક્ષયઃ ॥ ૪૯॥

દાનં દદૌ દ્વિજાતિભ્યોઽન્યેભ્યશ્ચ પ્રદદૌ ધનમ્ ।
શિવાશિવપદદ્વન્દ્વે સ્નેહોઽભૂદધિકસ્તયોઃ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે મેનાવરલાભવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૩.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૬. ષષ્ઠોઽધ્યાયઃ । પાર્વતિજન્મવર્ણનમ્ ।

બ્રહ્મોવાચ
અથ સસ્મરતુર્ભક્ત્યા દમ્પતી તૌ ભવામ્બિકામ્ ।
પ્રસૂતિહેતવે તત્ર દેવકાર્યાર્થમાદરાત્ ॥ ૧॥

તતઃ સા ચણ્ડિકા યોગાત્ત્યક્તદેહા પુરા પિતુઃ ।
ઈહયા ભવિતું ભૂયઃ સમૈચ્છદ્ ગિરિદારતઃ ॥ ૨॥

સત્યં વિધાતું સ્વવચઃ પ્રસન્નાખિલકામદા ।
પૂર્ણાંશાચ્છૈલચિત્તે સા વિવેશાથ મહેશ્વરી ॥ ૩॥

વિરરાજ તતઃ સોઽતિ પ્રમદોઽપૂર્વસુદ્યુતિઃ ।
હુતાશન ઇવાધૃષ્યસ્તેજોરાશિર્મહામનાઃ ॥ ૪॥

તતો ગિરિઃ સ્વપ્રિયાયાં પરિપૂર્ણં શિવાંશકમ્ ।
સમાધિમત્વાત્સમયે સમધત્ત સુશઙ્કરે ॥ ૫॥

સમધત્ત ગિરેઃ પત્ની ગર્ભં દેવ્યાઃ પ્રસાદતઃ ।
ચિત્તે સ્થિતાયાઃ કરુણાકરાયાઃ સુખદં ગિરેઃ ॥ ૬॥

ગિરિપ્રિયા સર્વજગન્નિવાસાસંશ્રયાધિકમ્ ।
વિરેજે સુતરાં મેના તેજોમણ્ડલગા સદા ॥ ૭॥

સુખોદયં સ્વભર્તુશ્ચ મેના દૌર્હૃદલક્ષણમ્ ।
દધૌ નિદાનં દેવાનામાનન્દસ્યેપ્સિતં શુભમ્ ॥ ૮॥

દેહસાદાદસમ્પૂર્ણભૂષણા લોધ્રસમ્મુખા ।
સ્વલ્પભેન્દુક્ષયેકાસૌ વિચેષ્યક્ષાં વિભાવરી ॥ ૯॥

તદાનનં મૃત્સુરભિ નાયં તૃપ્તિં ગિરીશ્વરઃ ।
મુને રહસ્યુપાઘ્રાય પ્રેમાધિક્યં બભૂવ તત્ ॥ ૧૦॥

મેના સ્પૃહાવતી કેષુ ન મે શંસતિ વસ્તુષુ ।
કિઞ્ચિદિષ્ટં હ્રિયાપૃચ્છદનુવેલં સખીર્ગિરિઃ ॥ ૧૧॥

ઉપેત્ય દૌર્હૃદં શૈલ્યં યદ્વવ્રેઽપશ્યદાશુ તત્ ।
આનીતં નેષ્ટમસ્યાદ્ધા નાસાધ્યં ત્રિદિવેઽપિ હિ ॥ ૧૨॥

પ્રચીયમાનાવયવા નિસ્તીર્ય દૌર્હૃદવ્યથામ્ ।

રેજે મેના બાલલતા નદ્ધપત્રાધિકા યથા ॥ ૧૩॥

ગિરિઃ સગર્ભાં મહિષીમમંસ્ત ધરણીમિવ ।
નિધાનગર્ભામભ્યન્તર્લીનવહ્નિશમીમિવ ॥ ૧૪॥

પ્રિયાપ્રીતેશ્ચ મનસઃ સ્વાર્જિતદ્રવિણસ્ય ચ ।
સમુન્નતેઃ શ્રુતેઃ પ્રાજ્ઞઃ ક્રિયાશ્ચક્રે યથોચિતાઃ ॥ ૧૫॥

દદર્શ કાલે મેનાં સ પ્રતીતઃ પ્રસવોન્મુખીમ્ ।
અભ્રિતાં ચ દિવં ગર્ભગૃહે ભિષગધિષ્ઠિતે ॥ ૧૬॥

દૃષ્ટ્વા પ્રિયાં શુભાઙ્ગીં વૈ મુમોદાતિ ગિરીશ્વરઃ ।
ગર્ભસ્થજગદમ્બાં હિ મહાતેજોવતીં તદા ॥ ૧૭॥

તસ્મિન્નવસરે દેવા મુને વિષ્ણ્વાદયસ્તથા ।
મુનયશ્ચ સમાગમ્ય ગર્ભસ્થાં તુષ્ટુવુઃ શિવામ્ ॥ ૧૮॥

દેવા ઊચુઃ
દુર્ગે જય જય પ્રાજ્ઞે જગદમ્બ મહેશ્વરિ ।
સત્યવ્રતે સત્યપરે ત્રિસત્યે સત્યરૂપિણી ॥ ૧૯॥

સત્યસ્થે સત્યસુપ્રીતે સત્યયોને ચ સત્યતઃ ।
સત્યવક્ત્રે સત્યનેત્રે પ્રપન્નાઃ શરણં ચ તે ॥ ૨૦॥

શિવપ્રિયે મહેશાનિ દેવદુઃખક્ષયઙ્કરિ ।
ત્રૈલોક્યમાતા શર્વાણી વ્યાપિની ભક્તવત્સલા ॥ ૨૧॥

આવિર્ભૂય ત્રિલોકેશિ દેવકાર્યં કુરુષ્વ હ ।
સનાથાઃ કૃપયા તે હિ વયં સર્વે મહેશ્વરિ ॥ ૨૨॥

ત્વત્તઃ સર્વે ચ સુખિનો લભન્તે સુખમુત્તમમ્ ।
ત્વાં વિના ન હિ કિઞ્ચિદ્વૈ શોભતે ત્રિભવેષ્વપિ ॥ ૨૩॥

બ્રહ્મોવાચ
ઇત્થં કૃત્વા મહેશાન્યા ગર્ભસ્થાયા બહુસ્તુતિમ્ ।
પ્રસન્નમનસો દેવાઃ સ્વં સ્વં ધામ યયુસ્તદા ॥ ૨૪॥

વ્યતીતે નવમે માસે દશમે માસિ પૂર્ણતઃ ।
ગર્ભસ્થા સા ગતિં દધ્રે કાલિકા જગદમ્બિકા ॥ ૨૫॥

તદા સુસમયશ્ચાસીચ્છાન્તભગ્રહતારકઃ ।

નભઃ પ્રસન્નતાં યાતં પ્રકાશઃ સર્વદિક્ષુ હિ ॥ ૨૬॥

મહી મઙ્ગલભૂયિષ્ઠા સવનગ્રામસાગરા ।
સરઃસ્રવન્તીવાપીષુ પુફુલ્લુઃ પઙ્કજાનિ વૈ ॥ ૨૭॥

વવુશ્ચ વિવિધા વાતાઃ સુખસ્પર્શા મુનીશ્વર ।
મુમુદુઃ સાધવઃ સર્વેઽસતાં દુઃખમભૂદ્ દ્રુતમ્ ॥ ૨૮॥

દુન્દુભીન્વાદયામાસુર્નભસ્યાગત્ય નિર્જરાઃ ।
પુષ્પવૃષ્ટિરભૂત્તત્ર જગુર્ગન્ધર્વસત્તમાઃ ॥ ૨૯॥

વિદ્યાધરસ્ત્રિયો વ્યોમ્નિ નનૃતુશ્ચાપ્સરાસ્તથા ।
તદોત્સવો મહાનાસીદ્દેવાદીનાં નભઃસ્થલે ॥ ૩૦॥

તસ્મિન્નવસરે દેવી પૂર્વશક્તિઃ શિવા સતી ।
આવિર્બભૂવ પુરતો મેનાયા નિજરૂપતઃ ॥ ૩૧॥

વસન્તર્તૌ મધૌ માસે નવમ્યાં મૃગધિષ્ણ્યકે ।
અર્ધરાત્રે સમુત્પન્ના ગઙ્ગેવ શશિમણ્ડલાત્ ॥ ૩૨॥

સમયે તત્સ્વરૂપેણ મેનકાજઠરાચ્છિવા ।
સમુદ્ભૂય સમુત્પન્ના સા લક્ષ્મીરિવ સાગરાત્ ॥ ૩૩॥

તતસ્તસ્યાં તુ જાતાયાં પ્રસન્નોઽભૂત્તદા ભવઃ ।
અનુકૂલો વવૌ વાયુર્ગમ્ભીરો ગન્ધયુક્ શુભઃ ॥ ૩૪॥

બભૂવ પુષ્પવૃષ્ટિશ્ચ તોયવૃષ્ટિપુરસ્સરમ્ ।
જજ્વલુશ્ચાગ્નયઃ શાન્તા જગર્જુશ્ચ તદા ઘનાઃ ॥ ૩૫॥

તસ્યાં તુ જાયમાનાયાં સર્વસ્વં સમપદ્યત ।
હિમવન્નગરે તત્ર સર્વં દુઃખં ક્ષયં ગતમ્ ॥ ૩૬॥

તસ્મિન્નવસરે તત્ર વિષ્ણ્વાદ્યાઃ સકલાઃ સુરાઃ ।
આજગ્મુઃ સુખિનઃ પ્રીત્યા દદૃશુર્જગદમ્બિકામ્ ॥ ૩૭॥

તુષ્ટુવુસ્તાં શિવામમ્બાં કાલિકાં શિવકામિનીમ્ ।
દિવ્યરૂપાં મહામાયાં શિવલોકનિવાસિનીમ્ ॥ ૩૮॥ ।

દેવા ઊચુઃ
જગદમ્બ મહાદેવિ સર્વસિદ્ધિવિધાયિનિ ।
દેવકાર્યકરી ત્વં હિ સદાતસ્ત્વાં નમામહે ॥ ૩૯॥

સર્વથા કુરુ કલ્યાણં દેવાનાં ભક્તવત્સલે ।
મેનામનોરથઃ પૂર્ણઃ કૃતઃ કુરુ હરસ્ય ચ ॥ ૪૦॥

બ્રહ્મોવાચ
ઇત્થં સ્તુત્વા શિવાં દેવા વિષ્ણ્વાદ્યાઃ સુપ્રણમ્ય તામ્ ।
સ્વં સ્વં ધામ યયુઃ પ્રીતાઃ શંસન્તસ્તદ્ગતિં પરામ્ ॥ ૪૧॥

તાં તુ દૃષ્ટ્વા તથા જાતાં નીલોત્પલદલપ્રભામ ।
શ્યામાં સા મેનકા દેવીં મુદમાયાતિ નારદ ॥ ૪૨॥

દિવ્યરૂપં વિલોક્યાનુ જ્ઞાનમાપ ગિરિપ્રિયા ।
વિજ્ઞાય પરમેશાનીં તુષ્ટાવાતિપ્રહર્ષિતા ॥ ૪૩॥

મેનોવાચ
જગદમ્બ મહેશાનિ કૃતાતિકરુણા ત્વયા ।
આવિર્ભૂતા મમ પુરો વિલસન્તી યદમ્બિકે ॥ ૪૪॥

ત્વમાદ્યા સર્વશક્તીનાં ત્રિલોકજનની શિવે ।
શિવપ્રિયા સદા દેવિ સર્વદેવસ્તુતા પરા ॥ ૪૫॥

કૃપાં કુરુ મહેશાનિ મમ ધ્યાનસ્થિતા ભવ ।
એતદ્રૂપેણ પ્રત્યક્ષં રૂપં ધેહિ સુતાસમમ્ ॥ ૪૬॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય વચસ્તસ્યા મેનાયા ભૂધરસ્ત્રિયાઃ ।
પ્રત્યુવાચ શિવા દેવી સુપ્રસન્ના ગિરિપ્રિયામ્ ॥ ૪૭॥

દેવ્યુવાચ
હે મેને ત્વં પુરા માં ચ સુસેવિતવતી રતા ।
ત્વદ્ભક્ત્યા સુપ્રસન્નાહં વરં દાતું ગતાન્તિકમ્ ॥ ૪૮॥

વરં બ્રૂહીતિ મદ્વાણીં શ્રુત્વા તે તદ્વરો વૃતઃ ।
સુતા ભવ મહાદેવિ સા મે દેવહિતં કુરુ ॥ ૪૯॥

તથા દત્ત્વા વરં તેઽહં ગતા સ્વં પદમાદરાત્ ।
સમયં પ્રાપ્ય તનયાભવં તે ગિરિકામિનિ ॥ ૫૦॥

દિવ્યરૂપં ધૃતં મેઽદ્ય યત્તે મત્સ્મરણં ભવેત્ ।

અન્યથા મર્ત્યભાવેન તવાજ્ઞાનં ભવેન્મયિ ॥ ૫૧॥

યુવાં માં પુત્રિભાવેન દિવ્યભાવેન વાસકૃત્ ।
ચિન્તયન્તૌ કૃતસ્નેહૌ યાતાસ્થો મદ્ગતિં પરામ્ ॥ ૫૨॥

દેવકાર્યં કરિષ્યામિ લીલાં કૃત્વાદ્ભુતાં ક્ષિતૌ ।
શમ્ભુપત્ની ભવિષ્યામિ તારયિષ્યામિ સજ્જનાન્ ॥ ૫૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વાસીચ્છિવા તૂષ્ણીમમ્બિકા સ્વાત્મમાયયા ।
પશ્યન્ત્યાં માતરિ પ્રીત્યા સદ્યોઽભૂત્તનયાતનુઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીજન્મવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૩.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૭. સપ્તમોઽધ્યાયઃ । પાર્વત્યા બાલલીલા ।

બ્રહ્મોવાચ ।
તતો મેનાપુરઃ સા વૈ સુતા ભૂત્વા મહાદ્યુતિઃ ।
ચકાર રોદનં તત્ર લૌકિકીં ગતિમાશ્રિતા ॥ ૧॥

અરિષ્ટશય્યાં પરિતઃ સદ્વિસારિસુતેજસા ।
નિશીથદીપા વિહતત્વિષ આસન્નરં મુને ॥ ૨॥

શ્રુત્વા તદ્ રોદનં રમ્યં ગૃહસ્થાઃ સર્વયોષિતઃ ।
જહૃષુઃ સમ્ભ્રમાત્તત્રાગતાઃ પ્રીતિપુરસ્સરાઃ ॥ ૩॥

તચ્છુદ્ધાન્તચરઃ શીઘ્રં શશંસ ભૂભૃતે તદા ।
પાર્વતીજન્મ સુખદં દેવકાર્યકરં શુભમ્ ॥ ૪॥

તચ્છુદ્ધાન્તઃચરાયાશુ પુત્રીજન્મ સુશંસતે ।
સિતાતપત્રં નાદેયમાસીત્તસ્ય મહીભૃતઃ ॥ ૫॥

ગતસ્તત્ર ગિરિઃ પ્રીત્યા સપુરોહિતસદ્વિજઃ ।

દદર્શ તનયાં તાં તુ શોભમાનાં સુભાસસા ॥ ૬॥

નીલોત્પલદલશ્યામાં સુદ્યુતિં સુમનોરમામ્ ।
દૃષ્ટ્વા ચ તાદૃશીં કન્યાં મુમોદાતિ ગિરીશ્વરઃ ॥ ૭॥

સર્વે ચ મુમુદુસ્તત્ર પૌરાશ્ચ પુરુષાઃ સ્ત્રિયઃ ।
તદોત્સવો મહાનાસીન્નેદુર્વાદ્યાનિ ભૂરિશઃ ॥ ૮॥

બભૂવ મઙ્ગલં ગાનં નનૃતુર્વારયોષિતઃ ।
દાનં દદૌ દ્વિજાતિભ્યો જાતકર્મ વિધાય ચ ॥ ૯॥

અથ દ્વારં સમાગત્ય ચકાર સુમહોત્સવમ્ ।
હિમાચલઃ પ્રસન્નાત્મા ભિક્ષુભ્યો દ્રવિણં દદૌ ॥ ૧૦॥

અથો શુભમુહૂર્તેઽસ્મિન્ હિમવાન્મુનિભિઃ સહ ।
નામાકરોત્સુતાયાસ્તુ કાલીત્યાદિ સુખપ્રદમ્ ॥ ૧૧॥

દાનં દદૌ તદા પ્રીત્યા દ્વિજેભ્યો બહુ સાદરમ્ ।
ઉત્સવં કારયામાસ વિવિધં ગાનપૂર્વકમ્ ॥ ૧૨॥

ઇત્થં કૃત્વોત્સવં ભૂરિ કાલીં પશ્યન્મુહુર્મુહુઃ ।
લેભે મુદં સપત્નીકો બહુપુત્રોઽપિ ભૂધરઃ ॥ ૧૩॥

તત્ર સા વવૃધે દેવી ગિરિરાજગૃહે શિવા ।
ગઙ્ગેવ વર્ષાસમયે શરદીવાથ ચન્દ્રિકા ॥ ૧૪॥

એવં સા કાલિકા દેવી ચાર્વઙ્ગી ચારુદર્શના ।
દધ્રે ચાનુદિનં રમ્યાં ચન્દ્રબિમ્બકલામિવ ॥ ૧૫॥

કુલોચિતેન નામ્ના તાં પાર્વતીત્યાજુહાવ હ ।
બન્ધુપ્રિયાં બન્ધુજનઃ સૌશીલ્યગુણસંયુતામ્ ॥ ૧૬॥

ઉમેતિ માત્રા તપસે નિષિદ્ધા કાલિકા ચ સા ।
પશ્ચાદુમાખ્યાં સુમુખી જગામ ભુવને મુને ॥ ૧૭॥

દૃષ્ટિઃ પુત્રવતોઽપ્યદ્રેસ્તસ્મિંસ્તૃપ્તિં જગામ ન ।
અપત્યે પાર્વતીત્યાખ્યે સર્વસૌભાગ્યસંયુતે ॥ ૧૮॥

મધોરનન્તપુષ્પસ્ય ચૂતે હિ ભ્રમરાવલિઃ ।
વિશેષસઙ્ગા ભવતિ સહકારે મુનીશ્વર ॥ ૧૯॥

પૂતો વિભૂષિતશ્ચાપિ સ બભૂવ તયા ગિરિઃ ।
સંસ્કારવત્યૈવ ગિરા મનીષીવ હિમાલયઃ ॥ ૨૦॥

પ્રભામહત્યા શિખયેવ દીપો ભવનસ્ય ચ ।
ત્રિમાર્ગયેવ સન્માર્ગસ્તદ્વદ્ ગિરિજયા ગિરિઃ ॥ ૨૧॥

કન્દુકૈઃ કૃત્રિમૈઃ પુત્રૈઃ સખીમધ્યગતા ચ સા ।
ગઙ્ગાસૈકતવેદીભિર્બાલ્યે રેમે મુહુર્મુહુઃ ॥ ૨૨॥

અથ દેવી શિવા સા ચોપદેશસમયે મુને ।
પપાઠ વિદ્યાઃ સુપ્રીત્યા યતચિત્તા ચ સદ્ગુરોઃ ॥ ૨૩॥

પ્રાક્તના જન્મવિદ્યાસ્તાં શરદીવ પ્રપેદિરે ।
હંસાલિઃ સ્વર્ણદીં નક્તમાત્મભાસો મહૌષધિમ્ ॥ ૨૪॥

ઇત્થં સુવર્ણિતા લીલા શિવાયાઃ કાચિદેવ હિ ।
અન્યલીલાં પ્રવક્ષ્યેઽહં શ‍ૃણુ ત્વં પ્રેમતો મુને ॥ ૨૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીબાલ્યલીલાવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૩.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૮. અષ્ટમોઽધ્યાયઃ । નારદહિમાલયસંવાદઃ ।

બ્રહ્મોવાચ ।
એકદા ત્વં શિવજ્ઞાની શિવલીલાવિદાં વરઃ ।
હિમાચલગૃહં પ્રીત્યાગમસ્ત્વં શિવપ્રેરિતઃ ॥ ૧॥

દૃષ્ટ્વા મુને ગિરીશસ્ત્વાં નત્વાનર્ચ સ નારદ ।
આહૂય ચ સ્વતનયાં ત્વદઙ્ઘ્ર્યોસ્તામપાતયત્ ॥ ૨॥

પુનર્નત્વા મુનીશ ત્વામુવાચ હિમભૂધરઃ ।
સાઞ્જલિઃ સ્વવિધિં મત્વા બહુસન્નતમસ્તકઃ ॥ ૩॥

હિમાલય ઉવાચ ।

હે મુને નારદ જ્ઞાનિન્બ્રહ્મપુત્રવર પ્રભો ।
સર્વજ્ઞસ્ત્વં સકરુણઃ પરોપકરણે રતઃ ॥ ૪॥

મત્સુતાજાતકં બ્રૂહિ ગુણદોષસમુદ્ભવમ્ ।
કસ્ય પ્રિયા ભાગ્યવતી ભવિષ્યતિ સુતા મમ ॥ ૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્તો મુનિવર્ય ત્વં ગિરીશેન હિમાદ્રિણા ।
વિલોક્ય કાલિકાહસ્તં સર્વાઙ્ગં ચ વિશેષતઃ ॥ ૬॥

અવોચસ્ત્વં ગિરિં તાત કૌતુકી વાગ્વિશારદઃ ।
જ્ઞાની વિદિતવૃત્તાન્તો નારદઃ પ્રીતમાનસઃ ॥ ૭॥

નારદ ઉવાચ ।
એષા તે તનયા મેને સુધાંશોરિવ વર્ધિતા ।
આદ્યા કલા શૈલરાજ સર્વલક્ષણશાલિની ॥ ૮॥

સ્વપતેઃ સુખદાત્યન્તં પિત્રોઃ કીર્તિવિવર્ધિની ।
મહાસાધ્વી ચ સર્વાસુ મહાનન્દકરી સદા ॥ ૯॥

સુલક્ષણાનિ સર્વાણિ ત્વત્સુતાયાઃ કરે ગિરે ।
એકા વિલક્ષણા રેખા તત્ફલં શ ृણુ તત્ત્વતઃ ॥ ૧૦॥

યોગી નગ્નોઽગુણોઽકામી માતૃતાતવિવર્જિતઃ ।
અમાનોઽશિવવેષશ્ચ પતિરસ્યાઃ કિલેદૃશઃ ॥ ૧૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તે હિ સત્યં મત્વા ચ દમ્પતી ।
મેના હિમાચલશ્ચાપિ દુઃખિતૌ તૌ બભૂવતુઃ ॥ ૧૨॥

શિવાકર્ણ્યવચસ્તે હિ તાદૃશં જગદમ્બિકા ।
લક્ષણૈસ્તં શિવં મત્વા જહર્ષાતિ મુને હૃદિ ॥ ૧૩॥

ન મૃષા નારદવચસ્ત્વિતિ સઞ્ચિન્ત્ય સા શિવા ।
સ્નેહં શિવપદદ્વન્દ્વે ચકારાતિ હૃદા તદા ॥ ૧૪॥

ઉવાચ દુઃખિતઃ શૈલસ્ત્વાં તદા હૃદિ નારદ ।
કમુપાયં મુને કુર્યામતિદુઃખમભૂદિતિ ॥ ૧૫॥

તચ્છ્રુત્વા ત્વં મુને પ્રાત્થ મહાકૌતુકકારકઃ ।

હિમાચલં શુભૈર્વાક્યૈર્હર્ષયન્વાગ્વિશારદઃ ॥ ૧૬॥

નારદ ઉવાચ ।
સ્નેહાચ્છૃણુ ગિરે વાક્યં મમ સત્યં મૃષા ન હિ ।
કરરેખા બ્રહ્મલિપિર્ન મૃષા ભવતિ ધ્રુવમ્ ॥ ૧૭॥

તાદૃશોઽસ્યાઃ પતિઃ શૈલ ભવિષ્યતિ ન સંશયઃ ।
તત્રોપાયં શૃણુ પ્રીત્યા યં કૃત્વા લપ્સ્યસે સુખમ્ ॥ ૧૮॥

તાદૃશોઽસ્તિ વરઃ શમ્ભુઃ લીલારૂપધરઃ પ્રભુઃ ।
કુલક્ષણાનિ સર્વાણિ તત્ર તુલ્યાનિ સદ્ગુણૈઃ ॥ ૧૯॥

પ્રભૌ દોષો ન દુઃખાય દુઃખદોઽત્યપ્રભૌ હિ સઃ ।
રવિપાવકગઙ્ગાનાં તત્ર જ્ઞેયા નિદર્શના ॥ ૨૦॥

તસ્માચ્છિવાય કન્યાં સ્વાં શિવાં દેહિ વિવેકતઃ ।
શિવઃ સર્વેશ્વરઃ સેવ્યોઽવિકારી પ્રભુરવ્યયઃ ॥ ૨૧॥

શીઘ્રપ્રસાદઃ સ શિવઃ તાં ગ્રહીષ્યત્યસંશયમ્ ।
તપઃસાધ્યો વિશેષેણ યદિ કુર્યાચ્છિવા તપઃ ॥ ૨૨॥

સર્વથા સુસમર્થો હિ સ શિવઃ સકલેશ્વરઃ ।
કુલિશસ્યાપિ વિધ્વંસી બ્રહ્માધીનઃ સુખપ્રદઃ ॥ ૨૩॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા ત્વં પુનસ્તાત કૌતુકી બ્રહ્મવિન્મુને ।
શૈલરાજમવોચો હિ હર્ષયન્વચનૈઃ શુભૈઃ ॥ ૨૪॥

ભાવિની દયિતા શમ્ભોઃ સાનુકૂલા સદા હરે ।
મહાસાધ્વી સુવ્રતા ચ પિત્રોઃ સુખવિવર્ધિની ॥ ૨૫॥

શમ્ભોશ્ચિત્તં વશે ચૈષા કરિષ્યતિ તપસ્વિની ।
સ ચાપ્યેનામૃતે યોષાં ન હ્યન્યામુદ્વહિષ્યતિ ॥ ૨૬॥

એતયોઃ સદૃશં પ્રેમ ન કસ્યાપ્યેવ તાદૃશમ્ ।
ભૂતં વા ભવિતા વાપિ નાધુના ચ પ્રવર્તતે ॥ ૨૭॥

અનયોઃ સુરકાર્યાણિ કર્તવ્યાનિ મૃતાનિ ચ ।
યાનિ યાનિ નગશ્રેષ્ઠ જીવિતાનિ પુનઃ પુનઃ ॥ ૨૮॥

અનયા કન્યયા તેઽદ્રે અર્ધનારીશ્વરો હરઃ ।

ભવિષ્યતિ તથા હર્ષદિનયોર્મિલિતં પુનઃ ॥ ૨૯॥

શરીરાર્ધં હરસ્યૈષા હરિષ્યતિ સુતા તવ ।
તપઃ પ્રભાવાત્સન્તોષ્ય મહેશં સકલેશ્વરમ્ ॥ ૩૦॥

સ્વર્ણગૌરી સુવર્ણાભા તપસા તોષ્ય તં હરમ્ ।
વિદ્યુદ્ગૌરતમા ચેયં તવ પુત્રી ભવિષ્યતિ ॥ ૩૧॥

ગૌરીતિ નામ્ના કન્યા તુ ખ્યાતિમેષા ગમિષ્યતિ ।
સર્વદેવગણૈઃ પૂજ્યા હરિબ્રહ્માદિભિસ્તથા ॥ ૩૨॥

નાન્યસ્મૈ ત્વમિમાં દાતુમિહાર્હસિ નગોત્તમ ।
ઇદં ચોપાંશુ દેવાનાં ન પ્રકાશ્યં કદાચન ॥ ૩૩॥

બ્રહ્મોવાચ
ઇતિ તસ્ય વચઃ શ્રુત્વા દેવર્ષે તવ નારદ ।
ઉવાચ હિમવાન્વાક્યં મુને ત્વાં વાગ્વિશારદઃ ॥ ૩૪॥

હિમાલય ઉવાચ
હે મુને નારદ પ્રાજ્ઞ વિજ્ઞપ્તિં કાઞ્ચિદેવ હિ ।
કરોમિ તાં શ‍ૃણુ પ્રીત્યાતસ્ત્વં પ્રમુદમાવહ ॥ ૩૫॥

શ્રૂયતે ત્યક્તસઙ્ગઃ સ મહાદેવો યતાત્મવાન્ ।
તપશ્ચરતિ સન્નિત્યં દેવાનામપ્યગોચરઃ ॥ ૩૬॥

સ કથં ધ્યાનમાર્ગસ્થઃ પરબ્રહ્માર્પિતં મનઃ ।
ભ્રંશયિષ્યતિ દેવર્ષે તત્ર મે સંશયો મહાન્ ॥ ૩૭॥

અક્ષરં પરમં બ્રહ્મ પ્રદીપકલિકોપમમ્ ।
સદાશિવાખ્યં સ્વં રૂપં નિર્વિકારમજાત્પરમ્ ॥ ૩૮॥

નિર્ગુણં સગુણં તચ્ચ નિર્વિશેષં નિરીહકમ્ ।
અતઃ પશ્યતિ સર્વત્ર ન તુ બાહ્યં નિરીક્ષતે ॥ ૩૯॥

ઇતિ સ શ્રૂયતે નિત્યં કિન્નરાણાં મુખાન્મુને ।
ઇહાગતાનાં સુપ્રીત્યા કિં તન્મિથ્યાવચો ધ્રુવમ્ ॥ ૪૦॥

વિશેષતઃ શ્રૂયતે સ સાક્ષાન્નામ્ના તથા હરઃ ।
સમયં કૃતવાન્પૂર્વં તન્મયા ગદિતં શ‍ૃણુ ॥ ૪૧॥

ન ત્વામૃતેઽન્યાં વરયે દાક્ષાયણિ સતી પ્રિયે ।

ભાર્યાર્થં ન ગ્રહીષ્યામિ સત્યમેતદ્બ્રવીમિ તે ॥ ૪૨॥

ઇતિ સત્યા સમં તેન પુરૈવ સમયઃ કૃતઃ ।
તસ્યાં મૃતાયાં સ કથં સ્વયમન્યાં ગ્રહીષ્યતિ ॥ ૪૩॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા સ ગિરિસ્તૂષ્ણીમાસ તસ્ય પુરસ્તવ ।
તદાકર્ણ્યાથ દેવર્ષે ત્વં પ્રાવોચઃ સુતત્ત્વતઃ ॥ ૪૪॥

નારદ ઉવાચ
ન વૈ કાર્યા ત્વયા ચિન્તા ગિરિરાજ મહામતે ।
એષા તવ સુતા કાલી દક્ષજા હ્યભવત્પુરા ॥ ૪૫॥

સતીનામાભવત્તસ્યાઃ સર્વમઙ્ગલદં સદા ।
સતી સા વૈ દક્ષકન્યા ભૂત્વા રુદ્રપ્રિયાભવત્ ॥ ૪૬॥

પિતુર્યજ્ઞે તથા પ્રાપ્યાનાદરં શઙ્કરસ્ય ચ ।
તં દૃષ્ટ્વા કોપમાધાયાત્યાક્ષીદ્દેહં ચ સા સતી ॥ ૪૭॥

પુનઃસૈવ સમુત્પન્ના તવ ગેહેઽમ્બિકા શિવા ।
પાર્વતી હરપત્નીયં ભવિષ્યતિ ન સંશયઃ ॥ ૪૮॥

એતત્સર્વં વિસ્તરાત્ત્વં પ્રોક્તવાન્ભૂભૃતે મુને ।
પૂર્વરૂપં ચરિત્રં ચ પાર્વત્યાઃ પ્રીતિવર્ધનમ્ ॥ ૪૯॥

તં સર્વં પૂર્વવૃત્તાન્તં કાલ્યા મુનિમુખાદ્ગિરિઃ ।
શ્રુત્વા સપુત્રદારઃ સ તદા નિઃસંશયોઽભવત્ ॥ ૫૦॥

તતઃ કાલી કથાં શ્રુત્વા નારદસ્ય મુખાત્તદા ।
લજ્જયાધોમુખી ભૂત્વા સ્મિતવિસ્તારિતાનના ॥ ૫૧॥

કરેણ તાં તુ સંસ્પૃશ્ય શ્રુત્વા તચ્ચરિતં ગિરિઃ ।
મૂર્ધ્નિ શશ્વત્તથાઘ્રાય સ્વાસનાન્તે ન્યવેશયત્ ॥ ૫૨॥

તતસ્ત્વં તાં પુનર્દૃષ્ટ્વાઽવોચસ્તત્ર સ્થિતાં મુને ।
હર્ષયન્ ગિરિરાજં ચ મેનકાં તનયૈઃ સહ ॥ ૫૩॥

સિંહાસનં તુ કિન્ત્વસ્યાઃ શૈલરાજ ભવેદતઃ ।
શમ્ભોરૂરૌ સદૈતસ્યા આસનં તુ ભવિષ્યતિ ॥ ૫૪॥

હરેરૂર્વાસનં પ્રાપ્ય તનયા તવ સન્તતમ્ ।

ન યત્ર કસ્યચિદ્ દૃષ્ટિર્માનસં વા ગમિષ્યતિ ॥ ૫૫॥

બ્રહ્મોવાચ
ઇતિ વચનમુદારં નારદ ત્વં ગિરીશં
ત્રિદિવમગમ ઉક્ત્વા તત્ક્ષણાદેવ પ્રીત્યા ।
ગિરિપતિરપિ ચિત્તે ચારુસમ્મોદયુક્તઃ
સ્વગૃહમગમદેવં સર્વસમ્પત્સમૃદ્ધમ્ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે નારદહિમાલયસંવાદવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૩.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૯. નવમોઽધ્યાયઃ । પિત્રોઃ પાર્વત્યૈ શિવારાધાનોપદેશઃ તસ્યાઃ સ્વપ્ને શિવસ્યાવિર્ભાવશ્ચ ।

નારદ ઉવાચ ।
વિધે તાત ત્વયા શૈવવર પ્રાજ્ઞાદ્ભુતા કથા ।
વર્ણિતા કરુણાં કૃત્વા પ્રીતિર્મે વર્ધિતાધિકા ॥ ૧॥

વિધે ગતે સ્વકં ધામ મયિ વૈ દિવ્યદર્શને ।
તતઃ કિમભવત્તાત કૃપયા તદ્વદાધુના ॥ ૨॥

બ્રહ્મોવાચ
ગતે ત્વયિ મુને સ્વર્ગે કિયત્કાલે ગતે સતિ ।
મેના પ્રાપ્યૈકદા શૈલનિકટં પ્રણનામ સા ॥ ૩॥

સ્થિત્વા સવિનયં પ્રાહ સ્વનાથં ગિરિકામિની ।
તત્ર શૈલાધિનાથં સા પ્રાણપ્રિયસુતા સતી ॥ ૪॥

મેનોવાચ
મુનિવાક્યં ન બુદ્ધં મે સમ્યઙ્નારીસ્વભાવતઃ ।
વિવાહં કુરુ કન્યાયાઃસુન્દરેણ વરેણ હ ॥ ૫॥

સર્વથા હિ ભવેત્તત્રોદ્વાહોઽપૂર્વસુખાવહઃ ।

વરશ્ચ ગિરિજાયાસ્તુ સુલક્ષણકુલોદ્ભવઃ ॥ ૬॥

પ્રાણપ્રિયા સુતા મે હિ સુખિતા સ્યાદ્યથા પ્રિયા ।
સદ્વરં પ્રાપ્ય સુપ્રીતા તથા કુરુ નમોઽસ્તુ તે ॥ ૭॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વાશ્રુમુખી મેના પત્યઙ્ઘ્યોઃ પતિતા તદા ।
તામુત્થાપ્ય ગિરિઃ પ્રાહ યથાવત્પ્રાજ્ઞસત્તમઃ ॥ ૮॥

હિમાલય ઉવાચ ।
શ‍ૃણુ ત્વં મેનકે દેવિ યથાર્થં વચ્મિ તત્ત્વતઃ ।
ભ્રમં ત્યજ મુનેર્વાક્યં વિતથં ન કદાચન ॥ ૯॥

યદિ સ્નેહઃ સુતાયાસ્તે સુતાં શિક્ષય સાદરમ્ ।
તપઃ કુર્યાચ્છઙ્કરસ્ય સા ભક્ત્યા સ્થિરચેતસા ॥ ૧૦॥

ચેત્પ્રસન્નઃ શિવઃ કાલ્યાઃ પાણિં ગૃહ્ણાતિ મેનકે ।
સર્વં ભૂયાચ્છુભં નશ્યેન્નારદોક્તમમઙ્ગલમ્ ॥ ૧૧॥

અમઙ્ગલાનિ સર્વાણિ મઙ્ગલાનિ સદા શિવે ।
તસ્માત્સુતાં શિવપ્રાપ્ત્યૈ તપસે શિક્ષય દ્રુતમ્ ॥ ૧૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય ગિરેર્વાક્યં મેના પ્રીતતરાભવત્ ।
સુતોપકણ્ઠમગમદુપદેષ્ટું તપોરુચિમ્ ॥ ૧૩॥

સુતાઙ્ગં સુકુમારં હિ દૃષ્ટ્વાતીવાથ મેનકા ।
વિવ્યથે નેત્રયુગ્મે ચાશ્રુપૂર્ણેઽભવતાં દ્રુતમ્ ॥ ૧૪॥

સુતાં સમુપદેષ્ટું તન્ન શશાક ગિરિપ્રિયા ।
બુબુધે પાર્વતી તદ્વૈ જનનીઙ્ગિતમાશુ સા ॥ ૧૫॥

અથ સા કાલિકા દેવી સર્વજ્ઞા પરમેશ્વરી ।
ઉવાચ જનનીં સદ્યઃ સમાશ્વાસ્ય પુનઃ પુનઃ ॥ ૧૬॥

પાર્વત્યુવાચ ।
માતઃ શ‍ૃણુ મહાપ્રાજ્ઞેઽદ્યતનેઽજમુહૂર્તકે ।
રાત્રૌ દૃષ્ટો મયા સ્વપ્નસ્તં વદામિ કૃપાં કુરુ ॥ ૧૭॥

વિપ્રશ્ચૈવ તપસ્વી માં સદયઃ પ્રીતિપૂર્વકમ્ ।

ઉપાદિદેશ સુતપઃ કર્તું માતઃ શિવસ્ય વૈ ॥ ૧૮॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા મેનકા શીઘ્રં પતિમાહૂય તત્ર ચ ।
તત્સ્વપ્નં કથયામાસ સુતાદૃષ્ટમશેષતઃ ॥ ૧૯॥

સુતાસ્વપ્નમથાકર્ણ્ય મેનકાતો ગિરીશ્વરઃ ।
ઉવાચ પરમપ્રીતઃ પ્રિયાં સમ્બોધયન્ગિરા ॥ ૨૦॥

ગિરીશ્વર ઉવાચ
હે પ્રિયેઽપરરાત્રાન્તે સ્વપ્નો દૃષ્ટો મયાપિ હિ ।
તં શ ૃણુ ત્વં મહાપ્રીત્યા વચ્મ્યહં તં સમાદરાત્ ॥ ૨૧॥

એકસ્તપસ્વી પરમો નારદોક્તવરાઙ્ગધૃક્ ।
પુરોપકણ્ઠં સુપ્રીત્યા તપઃ કર્તું સમાગતઃ ॥ ૨૨॥

ગૃહીત્વા સ્વસુતાં તત્રાગમં પ્રીતતરોઽપ્યહમ્ ।
મયા જ્ઞાતઃ સ વૈ શમ્ભુર્નારદોક્તવરઃ પ્રભુઃ ॥ ૨૩॥

સેવાર્થં તસ્ય તનયામુપદિશ્ય તપસ્વિનઃ ।
તં વૈ પ્રાર્થિતવાંસ્તસ્યાં ન તદાઙ્ગીચકાર સઃ ॥ ૨૪॥

અભૂદ્વિવાદઃ સુમહાન્સાઙ્ખ્યવેદાન્તસમ્મતઃ ।
તતસ્તદાજ્ઞયા તત્ર સંસ્થિતાસીત્સુતા મમ ॥ ૨૫॥

નિધાય હૃદિ તં કામં સિષેવે ભક્તિતશ્ચ સા ।
ઇતિ દૃષ્ટં મયા સ્વપ્નં પ્રોક્તવાંસ્તે વરાનને ॥ ૨૬॥

તતો મેને કિયત્કાલં પરીક્ષ્યં તત્ફલં પ્રિયે ।
યોગ્યમસ્તીદમેવેહ બુધ્યસ્વ ત્વં મમ ધ્રુવમ્ ॥ ૨૭॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વા ગિરિરાજશ્ચ મેનકા વૈ મુનીશ્વર ।
સન્તસ્થતુઃ પરીક્ષન્તૌ તત્ફલં શુદ્ધચેતસૌ ॥ ૨૮॥

ઇત્થં વ્યતીતેઽલ્પદિને પરમેશઃ સતાં ગતિઃ ।
સતીવિરહસુવ્યગ્રો ભ્રમન્સર્વત્ર સૂતિકૃત્ ॥ ૨૯॥

તત્રાજગામ સુપ્રીત્યા કિયદ્ગણયુતઃ પ્રભુઃ ।
તપઃ કર્તું સતીપ્રેમવિરહાકુલમાનસઃ ॥ ૩૦॥

તપશ્ચકાર સ્વં તત્ર પાર્વતી સેવને રતા ।
સખીભ્યાં સહિતા નિત્યં પ્રસન્નાર્થમભૂત્તદા ॥ ૩૧॥

વિદ્ધોઽપિ માર્ગણૈઃ શમ્ભુર્વિકૃતિં નાપ સ પ્રભુઃ ।
પ્રેષિતેન સુરૈઃ સ્વાત્મમોહનાર્થં સ્મરેણ વૈ ॥ ૩૨॥

દગ્ધ્વા સ્મરં ચ તત્રૈવ સ્વવહ્નિનયનેન સઃ ।
સ્મૃત્વા મમ વચઃ ક્રુદ્ધો મહ્યમન્તર્દધે તતઃ ॥ ૩૩॥

તતઃ કાલેન કિયતા વિનાશ્ય ગિરિજામદમ્ ।
પ્રસાદિતઃ સુતપસા પ્રસન્નોઽભૂન્મહેશ્વરઃ ॥ ૩૪॥

લૌકિકાચારમાશ્રિત્ય રુદ્રો વિષ્ણુપ્રસાદિતઃ ।
કાલીં વિવાહયામાસ તતોઽભૂદ્બહુમઙ્ગલમ્ ॥ ૩૫॥

ઇત્યેતત્કથિતં તાત સમાસાચ્ચરિતં વિભોઃ ।
શઙ્કરસ્ય પરં દિવ્યં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે સ્વપ્રવર્ણનપૂર્વકં સઙ્ક્ષેપશિવચરિતવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૩.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૦. દશમોઽધ્યાયઃ । ભૌમોત્પત્તિસ્તસ્ય શિવકૃપયા ગ્રહત્વપ્રાપ્તિશ્ચ ।

નારદ ઉવાચ ।
વિષ્ણુશિષ્ય મહાભાગ વિધે શૈવવર પ્રભો ।
શિવલીલામિમાં વ્યાસાત્પ્રીત્યા મે વક્તુમર્હસિ ॥ ૧॥

સતીવિરહયુક્શમ્ભુઃ કિં ચક્રે ચરિતં તથા ।
તપઃ કર્તું કદાયાતો હિમવત્પ્રસ્થમુત્તમમ્ ॥ ૨॥

શિવાશિવવિવાદોઽભૂત્કથં કામક્ષયશ્ચ મે ।
તપઃ કૃત્વા કથં પ્રાપ શિવં શમ્ભું ચ પાર્વતી ॥ ૩॥

તત્સર્વમપરં ચાપિ શિવસચ્ચરિતં પરમ્ ।

વક્તુમર્હસિ મે બ્રહ્મન્મહાનન્દકરં શુભમ્ ॥ ૪॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા નારદસ્ય પ્રશ્નં લોકાધિપોત્તમઃ ।
વિધિઃ પ્રોવાચ સુપ્રીત્યા સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૯॥

બ્રહ્મોવાચ ।
દેવર્ષે શૈવવર્યાદ્ય તદ્યશઃ શ઼ૃણુ ચાદરાત્ ।
પાવનં મઙ્ગલકરં ભક્તિવર્ધનમુત્તમમ્ ॥ ૬॥

આગત્ય સ્વગિરિં શમ્ભુઃ પ્રિયાવિરહકાતરઃ ।
સસ્માર સ્વપ્રિયાં દેવીં સતીં પ્રાણાધિકાં હૃદા ॥ ૭॥

ગણાનાભાષ્ય શોચંસ્તાં તદ્ગુણાન્પ્રેમવર્ધનાન્ ।
વર્ણયામાસ સુપ્રીત્યા દર્શયઁલ્લૌકિકીં ગતિમ્ ॥ ૬॥

દિગમ્બરો બભૂવાથ ત્યક્ત્વા ગાર્હસ્થ્યસદ્ગતિમ્ ।
પુનર્બભ્રામ લોકાન્વૈ સર્વાન્ લીલાવિશારદઃ ॥ ૯॥

ન પ્રાપ દર્શનં ક્વાપિ સતીવિરહદુઃખિતઃ ।
પુનશ્ચ ગિરિમાયાતઃ શઙ્કરો ભક્તશઙ્કરઃ ॥ ૧૦॥

સમાધાય મનો યત્નાત્સમાધિં દુઃખનાશનમ્ ।
ચકાર ચ દદર્શાસૌ સ્વરૂપં નિજમવ્યયમ્ ॥ ૧૧॥

ઇત્થં ચિરતરં સ્થાણુસ્તસ્થૌ ધ્વસ્તગુણત્રયઃ ।
નિર્વિકારી પરં બ્રહ્મ માયાધીશઃ સ્વયં પ્રભુઃ ॥ ૧૨॥

તતઃ સમાધિં તત્યાજ વ્યતીયુર્હ્યમિતાઃ સમાઃ ।
યદા તદા બભૂવાશુ ચરિતં તદ્વદામિ વઃ ॥ ૧૩॥

પ્રભોર્લલાટદેશાત્તુ યત્પૃષચ્છ્રમસમ્ભવમ્ ।
પપાત ધરણૌ તત્ર સ બભૂવ શિશુર્દ્રુતમ્ ॥ ૧૪॥

ચતુર્ભુજોઽરુણાકારો રમણીયાકૃતિર્મુને ।
અલૌકિકદ્યુતિઃ શ્રીમાઁસ્તેજસ્વી પરદુસ્સહઃ ॥ ૧૫॥

રુરોદ સ શિશુસ્તસ્ય પુરો હિ પરમેશિતુઃ ।
પ્રાકૃતાત્મજવત્તત્ર ભવાચારરતસ્ય હિ ॥ ૧૬॥

તદા વિચાર્ય સુધિયા ધૃત્વા સુસ્ત્રીતનું ક્ષિતિઃ ।

આવિર્બભૂવ તત્રૈવ ભયમાનીય શઙ્કરાત્ ॥ ૧૭॥

તં બલં દ્રુતમુત્થાય ક્રોડાયાં નિદધે વરમ્ ।
સ્તન્યં સાપાયયત્પ્રીત્યા દુગ્ધં ચોપરિસમ્ભવમ્ ॥ ૧૮॥

ચુચુમ્બ તન્મુખં સ્નેહાત્સ્મિત્વા ક્રીડયદાત્મજમ્ ।
સત્યભાવાત્સ્વયં માતા પરમેશહિતાવહા ॥ ૧૯॥

તદ્ દૃષ્ટ્વા ચરિતં શમ્ભુઃ કૌતુકી સૂતિકૃત્કૃતી ।
અન્તર્યામી વિહસ્યાથોવાચ જ્ઞાત્વા રસાં હરઃ ॥ ૨૦॥

ધન્યા ત્વં ધરણિ પ્રીત્યા પાલયૈતં સુતં મમ ।
ત્વય્યુદ્ભૂતં શ્રમજલાન્મહાતેજસ્વિનો વરમ્ ॥ ૨૧॥

મમ શ્રમકભૂર્બાલો યદ્યપિ પ્રિયકૃત્ક્ષિતે ।
ત્વન્નામ્ના સ્યાદ્ભવેત્ખ્યાતસ્ત્રિતાપરહિતઃ સદા ॥ ૨૨॥

અસૌ બાલઃ કુદાતા હિ ભવિષ્યતિ ગુણી તવ ।
મમાપિ સુખદાતા હિ ગૃહાણૈનં યથારુચિ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વિરરામાથ કિઞ્ચિદ્વિરહમુક્તધીઃ ।
લોકાચારકરો રુદ્રો નિર્વિકારી સતાં પ્રિયઃ ॥ ૨૪॥

અપિ ક્ષિતિર્જગામાશુ શિવાજ્ઞામધિગમ્ય સા ।
સ્વસ્થાનં સસુતા પ્રાપ સુખમાત્યન્તિકં ચ વૈ ॥ ૨૫॥

સ બાલો ભૌમ ઇત્યાખ્યાં પ્રાપ્ય ભૂત્વા યુવા દ્રુતમ્ ।
તસ્યાં કાશ્યાં ચિરં કાલં સિષેવે શઙ્કરં પ્રભુમ્ ॥ ૨૬॥

વિશ્વેશ્વરપ્રસાદેન ગ્રહત્વં પ્રાપ્ય ભૂમિજઃ ।
દિવ્યં લોકં જગામાશુ શુક્રલોકાત્પરં વરમ્ ॥ ૨૭॥

ઇત્યુક્તં શમ્ભુચરિતં સતીવિરહસંયુતમ્ ।
તપસ્યાચરણં શમ્ભોઃ શ઼ૃણુ ચાદરતો મુને ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે ભૌમોત્પત્તિશિવલીલાવર્ણનં નામ દશમોऽધ્યાયઃ ॥ ૨.૩.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૧. એકાદશોઽધ્યાયઃ । શિવહિમવત્સમાગમઃ ।

બ્રહ્મોવાચ ।
વર્ધમાના ગિરેઃ પુત્રી સા શક્તિર્લોકપૂજિતા ।
અષ્ટવર્ષા યદા જાતા હિમાલયગૃહે સતી ॥ ૧॥

તજ્જન્મ ગિરિશો જ્ઞાત્વા સતીવિરહકાતરઃ ।
કૃત્વા તમદ્ભુતામન્તર્મુમોદાતીવ નારદ ॥ ૨॥

તસ્મિન્નેવાન્તરે શમ્ભુર્લૌકિકીં ગતિમાશ્રિતઃ ।
સમાધાતું મનઃસમ્યક્તપઃ કર્તું સમૈચ્છત ॥ ૩॥

કાંશ્ચિદ્ગણવરાન્ શાન્તાન્ નન્દ્યાદીનવગૃહ્ય ચ ।
ગઙ્ગાવતારમગમદ્ધિમવત્પ્રસ્થમુત્તમમ્ ॥ ૪॥

યત્ર ગઙ્ગા નિપતિતા પુરા બ્રહ્મપુરાત્સ્રુતા ।
સર્વાઘૌઘવિનાશાય પાવની પરમા મુને ॥ ૫॥

તપઃપ્રારમ્ભમકરોત્સ્થિત્વા તત્ર વશી હરઃ ।
એકાગ્રં ચિન્તયામાસ સ્વમાત્માનમતન્દ્રિતઃ ॥ ૬॥

ચેતો જ્ઞાનભવં નિત્યં જ્યોતીરૂપં નિરામયમ્ ।
જગન્મયં ચિદાનન્દં દ્વૈતહીનં નિરાશ્રયમ્ ॥ ૭॥

હરે ધ્યાનપરે તસ્મિન્પ્રમથા ધ્યાનતત્પરાઃ ।
અભવન્કેચિદપરે નન્દિભૃઙ્ગ્યાદયો ગણાઃ ॥ ૮॥

સેવાં ચક્રુસ્તદા કેચિદ્ગણાઃ શમ્ભોઃ પરાત્મનઃ ।
નૈવાકૂજંસ્તુ મૌના હિ દ્વારપાઃ કેચનાભવન્ ॥ ૯॥

એતસ્મિન્નન્તરે તત્ર જગામ હિમભૂધરઃ ।
શઙ્કરસ્યૌષધિપ્રસ્થે શ્રુત્વાગમનમાદરાત્ ॥ ૧૦॥

પ્રણનામ પ્રભું રુદ્રં સગણો ભૂધરેશ્વરઃ ।
સમાનર્ચ ચ સુપ્રીતસ્તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૧૧॥

હિમાલય ઉવાચ ।

દેવદેવ મહાદેવ કપર્દિચ્છઙ્કર પ્રભો ।
ત્વયૈવ લોકનાથેન પાલિતં ભુવનત્રયમ્ ॥ ૧૨॥

નમસ્તે દેવદેવેશ યોગિરૂપધરાય ચ ।
નિર્ગુણાય નમસ્તુભ્યં સગુણાય વિહારિણે ॥ ૧૩॥

કૈલાસવાસિને શમ્ભો સર્વલોકાટનાય ચ ।
નમસ્તે પરમેશાય લીલાકારાય શૂલિને ॥ ૧૪॥

પરિપૂર્ણગુણાધાનવિકારરહિતાય તે ।
નમોઽનીહાય વીહાય ધીરાય પરમાત્મને ॥ ૧૫॥

અબહિર્ભોગકારાય જનવત્સલતે નમઃ ।
ત્રિગુણાધીશ માયેશ બ્રહ્મણે પરમાત્મને ॥ ૧૬॥

વિષ્ણુબ્રહ્માદિસેવ્યાય વિષ્ણુબ્રહ્મસ્વરૂપિણે ।
વિષ્ણુબ્રહ્મૈકદાત્રે તે ભક્તપ્રિય નમોઽસ્તુ તે ॥ ૧૭॥

તપોરત તપઃસ્થાન સુતપઃફલદાયિને ।
તપઃપ્રિયાય શાન્તાય નમસ્તે બ્રહ્મરૂપિણે ॥ ૧૮॥

વ્યવહારકરાયૈવ લોકાચારકરાય તે ।
સગુણાય પરેશાય નમોઽસ્તુ પરમાત્મને ॥ ૧૯॥

લીલા તવ મહેશાનાવેદ્યા સાધુસુખપ્રદા ।
ભક્તાધીનસ્વરૂપોઽસિ ભક્તવશ્યો હિ કર્મકૃત્ ॥ ૨૦॥

મમ ભાગ્યોદયાત્તત્ર ત્વમાગત ઇહ પ્રભો ।
સનાથ કૃતવાન્માં ત્વં વર્ણિતો દીનવત્સલઃ ॥ ૨૧॥

અદ્ય મે સફલં જન્મ સફલં જીવનં મમ ।
અદ્ય મે સફલં સર્વં યદત્ર ત્વં સમાગતઃ ॥ ૨૨॥

જ્ઞાત્વા માં દાસમવ્યગ્રમાજ્ઞાં દેહિ મહેશ્વર ।
ત્વત્સેવાં ચ મહાપ્રીત્યા કુર્યામહમનન્યધીઃ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય ગિરીશસ્ય મહેશ્વરઃ ।
કિઞ્ચિદુન્મીલ્ય નેત્રે ચ દદર્શ સગણં ગિરિમ્ ॥ ૨૪॥

સગણં તં તથા દૃષ્ટ્વા ગિરિરાજં વૃષધ્વજઃ ।

ઉવાચ ધ્યાનયોગસ્થઃ સ્મયન્નિવ જગત્પતિઃ ॥ ૨૫॥

મહેશ્વર ઉવાચ ।
તવ પૃષ્ઠે તપસ્તપ્તું રહસ્યમહમાગતઃ ।
યથા ન કોઽપિ નિકટં સમાયાતુ તથા કુરુ ॥ ૨૬॥

ત્વં મહાત્મા તપોધામા મુનીનાં ચ સદાશ્રયઃ ।
દેવાનાં રાક્ષસાનાં ચ પરેષાં ચ મહાત્મનામ્ ॥ ૨૭॥

સદા વાસો દ્વિજાદીનાં ગઙ્ગાપૂતશ્ચ નિત્યદા ।
પરોપકારી સર્વેષાં ગિરીણામધિપઃ પ્રભુઃ ॥ ૨૮॥

અહં તપશ્ચરામ્યત્ર ગઙ્ગાવતરણે સ્થલે ।
આશ્રિતસ્તવ સુપ્રીતો ગિરિરાજ યતાત્મવાન્ ॥ ૨૯॥

નિર્વિઘ્નં મે તપશ્ચાત્ર હેતુના યેન શૈલપ ।
સર્વથા હિ ગિરિશ્રેષ્ઠ સુયત્નં કુરુ સામ્પ્રતમ્ ॥ ૩૦॥

મમેદમેવ પરમં સેવનં પર્વતોત્તમ ।
સ્વગૃહં ગચ્છ સત્પ્રીત્યા તત્સમ્પાદય યત્નતઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા જગતાં નાથસ્તૂષ્ણીમાસ સ સૂતિકૃત્ ।
ગિરિરાજસ્તદા શમ્ભું પ્રણયાદિદમબ્રવીત્ ॥ ૩૨॥

હિમાલય ઉવાચ ।
પૂજિતોઽસિ જગન્નાથ મયા ત્વં પરમેશ્વર ।
સ્વાગતેનાદ્ય વિષયે સ્થિતં ત્વાં પ્રાર્થયામિ કિમ્ ॥ ૩૩॥

મહતા તપસા ત્વં હિ દેવૈર્યત્નપરાશ્રિતૈઃ ।
ન પ્રાપ્યસે મહેશાન સ ત્વં સ્વયમુપસ્થિતઃ ॥ ૩૪॥

મત્તોઽપ્યન્યતમો નાસ્તિ ન મત્તોઽન્યોઽસ્તિ પુણ્યવાન્ ।
ભવાનિતિ ચ મત્પૃષ્ઠે તપસે સમુપસ્થિતઃ ॥ ૩૫॥

દેવેન્દ્રાદધિકં મન્યે સ્વાત્માનં પરમેશ્વર ।
સગણેન ત્વયાગત્ય કૃતોઽનુગ્રહભાગહમ્ ॥ ૩૬॥

નિર્વિઘ્નં કુરુ દેવેશ સ્વતન્ત્રઃ પરમં તપઃ ।
કરિષ્યેઽહં તથા સેવાં દાસોઽહં તે સદા પ્રભો ॥ ૩૭॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ગિરિરાજોઽસૌ સ્વં વેશ્મ દ્રુતમાગતઃ ।
વૃત્તાન્તં તં સમાચખ્યૌ પ્રિયાયૈ ચ સમાદરાત્ ॥ ૩૮॥

નીયમાનાન્પરીવારાન્ સ્વગણાનપિ નારદ ।
સમાહૂયાખિલાઞ્છૈલપતિઃ પ્રોવાચ તત્ત્વતઃ ॥ ૩૯॥

હિમાલય ઉવાચ ।
અદ્ય પ્રભૃતિ નો યાતુ કોઽપિ ગઙ્ગાવતારણમ્ ।
મચ્છાસનેન મત્પ્રસ્થં સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૪૦॥

ગમિષ્યતિ જનઃ કશ્ચિત્તત્ર ચેત્તં મહાખલમ્ ।
દણ્ડયિષ્યે વિશેષેણ સત્યમેતન્મયોદિતમ્ ॥ ૪૧॥

ઇતિ તાન્સ નિયમ્યાશુ સ્વગણાન્નિખિલાન્મુને ।
સુયત્નં કૃતવાઞ્છૈલસ્તં શ‍ૃણુ ત્વં વદામિ તે ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવશૈલસમાગમવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૩.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૨. દ્વાદશોઽધ્યાયઃ । શિવહિમવત્સંવાદઃ ।

બ્રહ્મોવાચ ।
અથ શૈલપતિર્હૃષ્ટઃ સત્પુષ્પફલસઞ્ચયમ્ ।
સમાદાય સ્વતનયાસહિતોઽગાદ્ધરાન્તિકમ્ ॥ ૧॥

સ ગત્વા ત્રિજગન્નાથં પ્રણમ્ય ધ્યાનતત્પરમ્ ।
અર્પયામાસ તનયાં કાલીં તસ્મૈ હૃદાદ્ભુતામ્ ॥ ૨॥

ફલપુષ્પાદિકં સર્વં તત્તદગ્રે નિધાય સઃ ।
અગ્રે કૃત્વા સુતાં શમ્ભુમિદમાહ ચ શૈલરાટ્ ॥ ૩॥

હિમગિરિરુવાચ ।

ભગવંસ્તનયા મે ત્વાં સેવિતું ચન્દ્રશેખરમ્ ।
સમુત્સુકા સમાનીતા ત્વદારાધનકાઙ્ક્ષયા ॥ ૪॥

સખીભ્યાં સહ નિત્યં ત્વાં સેવતામેવ શઙ્કરમ્ ।
અનુજાનીહિ તાં નાથ મયિ તે યદ્યનુગ્રહઃ ॥ ૫॥

બ્રહ્મોવાચ ।
અથ તાં શઙ્કરોઽપશ્યત્પ્રથમારૂઢયૌવનામ્ ।
ફુલ્લેન્દીવરપત્રાભાં પૂર્ણચન્દ્રનિભાનનામ્ ॥ ૬॥

સમસ્તલીલાસંસ્થાનશુભવેષવિજૃમ્ભિતામ્ ।
કમ્બુગ્રીવાં વિશાલાક્ષીં ચારુકર્ણયુગોજ્જ્વલામ્ ॥ ૭॥

મૃણાલાયતપર્યન્તબાહુયુગ્મમનોહરામ્ ।
રાજીવકુડ્મલપ્રખ્યૌ ઘનપીનૌદૃઢૌસ્તનૌ ॥ ૮॥

બિભ્રતીં ક્ષીણમધ્યાં ચ ત્રિવલીમધ્યરાજિતામ્ ।
સ્થલપદ્મપ્રતીકાશપાદયુગ્મવિરાજિતામ્ ॥ ૯॥

ધ્યાનપઞ્જરનિર્બદ્ધમુનિમાનસમપ્યલમ્ ।
દર્શનાદ્ભ્રંશને શક્તાં યોષિદ્ગણશિરોમણિમ્ ॥ ૧૦॥

દૃષ્ટ્વા તાં તાદૃશીં તાત ધ્યાનિનાં ચ મનોહરામ્ ।
વિગ્રહે તન્ત્રમન્ત્રાણાં વર્ધિનીં કામરૂપિણીમ્ ॥ ૧૧॥

ન્યમીલયદ્દૃશૌ શીઘ્રં દધ્યૌ સ્વં રૂપમુત્તમમ્ ।
પરતત્ત્વં મહાયોગી ત્રિગુણાત્પરમવ્યયમ્ ॥ ૧૨॥

દૃષ્ટ્વા તદાનીં સકલેશ્વરં વિભું
તપો જુષાણં વિનિમીલિતેક્ષણમ્ ।
કપર્દિનં ચન્દ્રકલાવિભૂષણં
વેદાન્તવેદ્યં પરમાસને સ્થિતમ્ ॥ ૩૩॥

વવન્દ શીર્ષ્ણા ચ પુનર્હિમાચલઃ
સ સંશયં પ્રાપદદીનસત્ત્વઃ ।
ઉવાચ વાક્યં જગદેકબન્ધું
ગિરીશ્વરો વાક્યવિદાં વરિષ્ઠઃ ॥ ૧૪॥

હિમાચલ ઉવાચ ।

દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
પશ્ય માં શરણં પ્રાપ્તમુન્મીલ્ય નયને વિભો ॥ ૧૫॥

શિવ શર્વ મહેશાન જગદાનન્દકૃત્પ્રભો ।
ત્વાં નતોઽહં મહાદેવ સર્વાપદ્વિનિવર્તકમ્ ॥ ૧૬॥

ન ત્વાં જાનન્તિ દેવેશ વેદાઃ શાસ્ત્રાણિ કૃત્સ્નશઃ ।
અતીતો મહિમાધ્વાનં તવ વાઙ્મનસોઃ સદા ॥ ૧૭॥

અતદ્વ્યાવૃત્તિતસ્ત્વાં વૈ ચકિતં ચકિતં સદા ।
અભિધત્તે શ્રુતિઃ સર્વા પરેષાં કા કથા મતા ॥ ૧૮॥

જાનન્તિ બહવો ભક્તાસ્ત્વત્કૃપાં પ્રાપ્ય ભક્તિતઃ ।
શરણાગત ભક્તાનાં ન કુત્રાપિ ભ્રમાદિકમ્ ॥ ૧૯॥

વિજ્ઞપ્તિં શૃણુ મત્પ્રીત્યા સ્વદાસસ્ય મમાધુના ।
તવ દેવાજ્ઞયા તાત દીનત્વાદ્વર્ણયામિ હિ ॥ ૨૦॥

સભાગ્યોઽહં મહાદેવ પ્રસાદાત્તવ શઙ્કર ।
મત્વા સ્વદાસં માં નાથ કૃપાં કુરુ નમોઽસ્તુ તે ॥ ૨૧॥

પ્રત્યહં ચાગમિષ્યામિ દર્શનાર્થં તવ પ્રભો ।
અનયા સુતયા સ્વામિન્નિદેશં દાતુમર્હસિ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યોન્મીલ્ય નેત્રે મહેશ્વરઃ ।
ત્યક્તધ્યાનઃ પરામૃશ્ય દેવદેવોઽબ્રવીદ્વચઃ ॥ ૨૩॥

મહેશ્વર ઉવાચ ।
આગન્તવ્યં ત્વયા નિત્યં દર્શનાર્થં મમાચલ ।
કુમારીં સદને સ્થાપ્ય નાન્યથા મમ દર્શનમ્ ॥ ૨૪॥

બ્રહ્મોવાચ ।
મહેશવચનં શ્રુત્વા શિવાતાતસ્તથાવિધમ્ ।
અચલઃ પ્રત્યુવાચેદં ગિરિશં નતકન્ધરઃ ॥ ૨૫॥

હિમાચલ ઉવાચ ।
કસ્માન્મયાનયા સાર્ધં નાગન્તવ્યં તદુચ્યતામ્ ।
સેવને કિમયોગ્યેયં નાહં વેદ્મ્યત્ર કારણમ્ ॥ ૨૬॥

બ્રહ્મોવાચ ।
તતોઽબ્રવીદ્ગિરિં શમ્ભુઃ પ્રહસન્વૃષભધ્વજઃ ।
લોકાચારં વિશેષેણ દર્શયન્હિ કુયોગિનામ્ ॥ ૨૭॥

શમ્ભુરુવાચ ।
ઇયં કુમારી સુશ્રોણી તન્વી ચન્દ્રાનના શુભા ।
નાનેતવ્યા મત્સમીપે વારયામિ પુનઃ પુનઃ ॥ ૨૮॥

માયારૂપા સ્મૃતા નારી વિદ્વદ્ભિર્વેદપારગૈઃ ।
યુવતી તુ વિશેષેણ વિઘ્નકર્ત્રી તપસ્વિનામ્ ॥ ૨૯॥

અહં તપસ્વી યોગી ચ નિર્લિપ્તો માયયા સદા ।
પ્રયોજનં ન યુવત્યા વૈ સ્ત્રિયા કિં મેઽસ્તિ ભૂધર ॥ ૩૦॥

એવં પુનર્ન વક્તવ્યં તપસ્વિવરસંશ્રિત ।
વેદધર્મપ્રવીણસ્ત્વં યતો જ્ઞાનિવરો બુધઃ ॥ ૩૧॥

ભવત્યચલ તત્સઙ્ગાદ્વિષયોત્પત્તિરાશુ વૈ ।
વિનશ્યતિ ચ વૈરાગ્યં તતો ભ્રશ્યતિ સત્તપઃ ॥ ૩૨॥

અતસ્તપસ્વિના શૈલ ન કાર્યા સ્ત્રીષુ સઙ્ગતિઃ ॥

મહાવિષયમૂલં સા જ્ઞાનવૈરાગ્યનાશિની ॥ ૩૩॥

બ્રહ્મોવાચ ।
ઇત્યાદ્યુક્ત્વા બહુતરં મહાયોગી મહેશ્વરઃ ।
વિરરામ ગિરીશં તં મહાયોગિવરઃ પ્રભુઃ ॥ ૩૪॥

એતચ્છ્રુત્વા વચનં તસ્ય શમ્ભો-
ર્નિરામયં નિઃસ્પૃહં નિષ્ઠુરં ચ ।
કાલીતાતશ્ચકિતોઽભૂત્સુરર્ષે
તદ્વત્કિઞ્ચિદ્વ્યાકુલશ્ચાસ તૂષ્ણીમ્ ॥ ૩૫॥

તપસ્વિનોક્તં વચનં નિશમ્ય
તથા ગિરીશં ચકિતં વિચાર્ય ।
અતઃ પ્રણમ્યૈવ શિવં ભવાની
જગાદ વાક્યં વિશદન્તદાનીમ્ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવહિમાચલસંવાદવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૩.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૩. ત્રયોદશોઽધ્યાયઃ । શિવપાર્વતીસંવાદઃ ।

ભવાન્યુવાચ ।
કિમુક્તં ગિરિરાજાય ત્વયા યોગિંસ્તપસ્વિના ।
તદુત્તરં શ ૃણુ વિભો મત્તો જ્ઞાનિવિશારદ ॥ ૧॥

તપઃશક્ત્યાન્વિતઃ શમ્ભો કરોષિ વિપુલં તપઃ ।
તવ બુદ્ધિરિયં જાતા તપસ્તપ્તું મહાત્મનઃ ॥ ૨॥

સા શક્તિઃ પ્રકૃતિર્જ્ઞેયા સર્વેષામપિ કર્મણામ્ ।
તયા વિરચ્યતે સર્વં પાલ્યતે ચ વિનાશ્યતે ॥ ૩॥

કસ્ત્વં કા પ્રકૃતિઃસૂક્ષ્મા ભગવંસ્તદ્વિમૃશ્યતામ્ ।
વિના પ્રકૃત્યા ચ કથં લિઙ્ગરૂપી મહેશ્વરઃ ॥ ૪॥

અર્ચનીયોઽસિ વન્દ્યોઽસિ ધ્યેયોઽસિ પ્રાણિનાં સદા ।
પ્રકૃત્યા ચ વિચાર્યેતિ હૃદા સર્વં તદુચ્યતામ્ ॥ ૫॥

બ્રહ્મોવાચ ।
પાર્વત્યાસ્તદ્વચઃ શ્રુત્વા મહોતિકરણે રતઃ ।
સુવિહસ્ય પ્રસન્નાત્મા મહેશો વાક્યમબ્રવીત્ ॥ ૬॥

મહેશ્વર ઉવાચ ।
તપસા પરમેણૈવ પ્રકૃતિં નાશયામ્યહમ્ ।
પ્રકૃત્યા રહિતઃ શમ્ભુરહં તિષ્ઠામિ તત્ત્વતઃ ॥ ૭॥

તસ્માચ્ચ પ્રકૃતેઃ સદ્ભિર્ન કાર્યઃ સઙ્ગ્રહઃ ક્વચિત્ ।
સ્થાતવ્યં નિર્વિકારૈશ્ચ લોકાચારવિવર્જિતૈઃ ॥ ૮॥

બ્રહ્મોવાચ ।

ઇત્યુક્ત્વા શમ્ભુના તાત લૌકિકવ્યવહારતઃ ।
સુવિહસ્ય હૃદા કાલી જગાદ મધુરં વચઃ ॥ ૯॥

કાલ્યુવાચ ।
યદુક્તં ભવતા યોગિન્વચનં શઙ્કર પ્રભો ।
સા ચ કિં પ્રકૃતિર્ન સ્યાદતીતસ્તાં ભવાન્કથમ્ ॥ ૧૦॥

એતદ્વિચાર્ય વક્તવ્યં તત્ત્વતો હિ યથાતથમ્ ।
પ્રકૃત્યા સર્વમેતચ્ચ બદ્ધમસ્તિ નિરન્તરમ્ ॥ ૧૧॥

તસ્માત્ત્વયા ન વક્તવ્યં ન કાર્યં કિઞ્ચિદેવ હિ ।
વચનં રચનં સર્વં પ્રાકૃતં વિદ્ધિ ચેતસા ॥ ૧૨॥

યચ્છૃણોષિ યદશ્નાસિ યત્પશ્યસિ કરોષિ યત્ ।
તત્સર્વં પ્રકૃતેઃ કાર્યં મિથ્યાવાદો નિરર્થકઃ ॥ ૧૩॥

પ્રકૃતેઃ પરમશ્ચેત્ત્વં કિમર્થં તપ્યસે તપઃ ।
ત્વયા શમ્ભોઽધુના હ્યસ્મિન્ગિરૌ હિમવતિ પ્રભો ॥ ૧૪॥

પ્રકૃત્યા ગિલિતોઽસિ ત્વં ન જાનાસિ નિજં હર ।
નિજં જાનાસિ ચેદીશ કિમર્થં તપ્યસે તપઃ ॥ ૧૫॥

વાગ્વાદેન ચ કિં કાર્યં મમ યોગિંસ્ત્વયા સહ ।
પ્રત્યક્ષે હ્યનુમાનસ્ય ન પ્રમાણં વિદુર્બુધાઃ ॥ ૧૬॥

ઇન્દ્રિયાણાં ગોચરત્વં યાવદ્ભવતિ દેહિનામ્ ।
તાવત્સર્વં વિમન્તવ્યં પ્રાકૃતં જ્ઞાનિભિર્ધિયા ॥ ૧૭॥

કિં બહૂક્તેન યોગીશ શૃણુ મદ્વચનં પરમ્ ।
સા ચાહં પુરુષોઽસિ ત્વં સત્યં સત્યં ન સંશયઃ ॥ ૧૮॥

મદનુગ્રહતસ્ત્વં હિ સગુણો રૂપવાન્મતઃ ।
માં વિના ત્વં નિરીહોઽસિ ન કિઞ્ચિત્કર્તુમર્હસિ ॥ ૧૯॥

પરાધીનઃસદા ત્વં હિ નાનાકર્મકરો વશી ।
નિર્વિકારી કથં ત્વં હિ ન લિપ્તશ્ચ મયા કથમ્ ॥ ૨૦॥

પ્રકૃતેઃ પરમોઽસિ ત્વં યદિ સત્યં વચસ્તવ ।
તર્હિ ત્વયા ન ભેતવ્યં સમીપે મમ શઙ્કર ॥ ૨૧॥

બ્રહ્મોવાચ ।

ઇત્યાકર્ણ્ય વચસ્તસ્યાઃ સાઙ્ખ્યશાસ્ત્રોદિતં શિવઃ ।
વેદાન્તમતસંસ્થો હિ વાક્યમૂચે શિવાં પ્રતિ ॥ ૨૨॥

શ્રીશિવ ઉવાચ ।
ઇત્યેવં ત્વં યદિ બ્રૂષે ગિરિજે સાઙ્ખ્યધારિણી ।
પ્રત્યહં કુરુ મે સેવામનિષિદ્ધાં સુભાષિણિ ॥ ૨૩॥

યદ્યહં બ્રહ્મ નિર્લિપ્તો માયયા પરમેશ્વરઃ ।
વેદાન્તવેદ્યો માયેશસ્ત્વં કરિષ્યસિ કિં તદા ॥ ૨૪॥

બ્રહ્મોવાચ ।
ઇત્યેવમુક્ત્વા ગિરિજાં વાક્યમૂચે ગિરિં પ્રભુઃ ।
ભક્તાનુરઞ્જનકરો ભક્તાનુગ્રહકારકઃ ॥ ૨૫॥

શ્રીશિવ ઉવાચ ।
અત્રૈવ સોઽહં તપસા પરેણ
ગિરે તવ પ્રસ્થવરેઽતિરમ્યે ।
ચરામિ ભૂમૌ પરમાર્થભાવ-
સ્વરૂપમાનન્દમયં સુલોચયન્ ॥ ૨૬॥

તપસ્તમ્નુમનુજ્ઞા મે દાતવ્યા પર્વતાધિપ ।
અનુજ્ઞયા વિના કિઞ્ચિત્તપઃ કર્તું ન શક્યતે ॥ ૨૭॥

બ્રહ્મોવાચ ।
એતચ્છ્રુત્વા વચસ્તસ્ય દેવદેવસ્ય શૂલિનઃ ।
પ્રણમ્ય હિમવાઞ્છમ્ભુમિદં વચનમબ્રવીત્ ॥ ૨૮॥

હિમવાનુવાચ ।
ત્વદીયં હિ જગત્સર્વં સદેવાસુરમાનુષમ્ ।
કિમપ્યહં મહાદેવ તુચ્છો ભૂત્વા વદામિ તે ॥ ૨૯॥

બ્રહ્મોવાચ ।
એવમુક્તો હિમવતા શઙ્કરો લોકશઙ્કરઃ ।
વિહસ્ય ગિરિરાજં તં પ્રાહ યાહીતિ સાદરમ્ ॥ ૩૦॥

શઙ્કરેણાભ્યનુજ્ઞાતઃસ્વગૃહં હિમવાન્યયૌ ।
સાર્ધં ગિરિજયા વૈ સ પ્રત્યહં દર્શને સ્થિતઃ ॥ ૩૧॥

પિત્રા વિનાપિ સા કાલી સખીભ્યાં સહ નિત્યશઃ ।

જગામ શઙ્કરાભ્યાશં સેવાયૈ ભક્તિતત્પરા ॥ ૩૨॥

નિષિષેધ ન તાં કોઽપિ ગણો નન્દીશ્વરાદિકઃ ।
મહેશશાસનાત્તાત તચ્છાસનકરઃ શુચિઃ ॥ ૩૩॥

સાઙ્ખ્યવેદાન્તમતયોઃ શિવયોઃ શિવદઃ સદા ।
સંવાદઃ સુખકૃચ્ચોક્તોઽભિન્નયોઃ સુવિચારતઃ ॥ ૩૪॥

ગિરિરાજસ્ય વચનાત્તનયાં તસ્ય શઙ્કરઃ ।
પાર્શ્વે સમીપે જગ્રાહ ગૌરવાદપિ ગોપરઃ ॥ ૩૫॥

ઉવાચેદં વચઃ કાલીં સખીભ્યાં સહ ગોપતિઃ ।
નિત્યં માં સેવતાં યાતુ નિર્ભીતા હ્યત્ર તિષ્ઠતુ ॥ ૩૬॥

એવમુક્ત્વા તુ તાં દેવીં સેવાયૈ જગૃહે હરઃ ।
નિર્વિકારો મહાયોગી નાનાલીલાકરઃ પ્રભુઃ ॥ ૩૭॥

ઇદમેવ મહદ્ધૈર્યં ધીરાણાં સુતપસ્વિનામ્ ।
વિઘ્નવન્ત્યપિ સમ્પ્રાપ્ય યદ્વિઘ્નૈર્ન વિહન્યતે ॥ ૩૮॥

તતઃ સ્વપુરમાયાતો ગિરિરાટ્ પરિચારકૈઃ ।
મુમોદાતીવ મનસિ સપ્રિયઃ સ મુનીશ્વર ॥ ૩૯॥

હરશ્ચ ધ્યાનયોગેન પરમાત્માનમાદરાત્ ।
નિર્વિઘ્નેન સ્વમનસા ત્વાસીચ્ચિન્તયિતું સ્થિતઃ ॥ ૪૦॥

કાલી સખીભ્યાં સહિતા પ્રત્યહં ચન્દ્રશેખરમ્ ।
સેવમાના મહાદેવં ગમનાગમને સ્થિતા ॥ ૪૧॥

પ્રક્ષાલ્ય ચરણૌ શમ્ભોઃ પપૌ તચ્ચરણોદકમ્ ।
વહ્નિશૌચેન વસ્ત્રેણ ચક્રે તદ્ગાત્રમાર્જનમ્ ॥ ૪૨॥

ષોડશેનોપચારેણ સમ્પૂજ્ય વિધિવદ્ધરમ્ ।
પુનઃપુનઃ સુપ્રણમ્ય યયૌ નિત્યં પિતુર્ગૃહમ્ ॥ ૪૩॥

એવં સંસેવમાનાયાઃ શઙ્કરં ધ્યાનતત્પરમ્ ।
વ્યતીયાય મહાન્કાલઃ શિવાયા મુનિસત્તમ ॥ ૪૪॥

કદાચિત્સહિતા કાલી સખીભ્યાં શઙ્કરાશ્રમે ।
વિતેને સુન્દરં ગાનં સુતાલં સ્મરવર્ધનમ્ ॥ ૪૫॥

કદાચિત્કુશપુષ્પાણિ સમિધં નયતિ સ્વયમ્ ।
સખીભ્યાં સ્થાનસંસ્કારં કુર્વતી ન્યવસત્તદા ॥ ૪૬॥

કદાચિન્નિયતા ગેહે સ્થિતા ચન્દ્રભૃતો ભૃશમ્ ।
વીક્ષન્તી વિસ્મયામાસ સકામા ચન્દ્રશેખરમ્ ॥ ૪૭॥

તતસ્તમેન ભૂતેશસ્તાં નિસ્સઙ્ગાં પરિસ્થિતામ્ ।
સોઽચિન્તયત્તદા વીક્ષ્ય ભૂતદેહે સ્થિતેતિ ચ ॥ ૪૮॥

નાગ્રહીદ્ગિરિશઃ કાલીં ભાર્યાર્થે નિકટે સ્થિતામ્ ।
મહાલાવણ્યનિચયાં મુનીનામપિ મોહિનીમ્ ॥ ૪૯॥

મહાદેવઃ પુનર્દૃષ્ટ્વા તથા તાં સંયતેન્દ્રિયામ્ ।
સ્વસેવને રતાં નિત્યં સદયઃ સમચિન્તયત્ ॥ ૫૦॥

યદૈવૈષા તપશ્ચર્યાવ્રતં કાલી કરિષ્યતિ ।
તદા ચ તાં ગ્રહીષ્યામિ ગર્વબીજવિવર્જિતામ્ ॥ ૫૧॥

બ્રહ્મોવાચ ।
ઇતિ સઞ્ચિન્ત્ય ભૂતેશો દ્રુતં ધ્યાનસમાશ્રિતઃ ।
મહયોગીશ્વરોઽભૂદ્વૈ મહાલીલાકરઃ પ્રભુઃ ॥ ૫૨॥

ધ્યાનાસક્તસ્ય તસ્યાથ શિવસ્ય પરમાત્મનઃ ।
હૃદિ નાસીન્મુને કાચિદન્યા ચિન્તા વ્યવસ્થિતા ॥ ૫૩॥

કાલી ત્વનુદિનં શમ્ભું સદ્ભક્ત્યા સમસેવત ।
વિચિન્તયન્તી સતતં તસ્ય રૂપં મહાત્મનઃ ॥ ૫૪॥

હરો ધ્યાનપરઃ કાલીં નિત્યં પ્રૈક્ષત સુસ્થિતામ્ ।
વિસ્મૃત્ય પૂર્વચિન્તાં તાં પશ્યન્નપિ ન પશ્યતિ ॥ ૫૫॥

એતસ્મિન્નન્તરે દેવાઃ શક્રાદ્યા મુનયશ્ચ તે ।
બ્રહ્માજ્ઞયા સ્મરં તત્ર પ્રેષયામાસુરાદરાત્ ॥ ૫૬॥

તેન કારયિતું યોગં કાલ્યા રુદ્રેણ કામતઃ ।
મહાવીર્યેણાસુરેણ તારકેણ પ્રપીડિતાઃ ॥ ૫૭॥

ગત્વા તત્ર સ્મરઃ સર્વમુપાયમકરોન્નિજમ્ ।
ચુક્ષુભે ન હરઃ કિઞ્ચિત્તં ચ ભસ્મીચકાર હ ॥ ૫૮॥

પાર્વત્યપિ વિગર્વાભૂન્મુને તસ્ય નિદેશતઃ ।

તતસ્તપો મહત્કૃત્વા શિવં પ્રાપ પતિં સતી ॥ ૫૯॥

બભૂવતુસ્તૌ સુપ્રીતૌ પાર્વતીપરમેશ્વરૌ ।
ચક્રતુર્દેવકાર્યં હિ પરોપકરણે રતૌ ॥ ૬૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીપરમેશ્વરસંવાદવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૩.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૪. ચતુર્દશોઽધ્યાયઃ । તારકવજાઙ્ગયોરુપત્તિસ્તત્તપોવર્ણનઞ્ચ ।

નારદ ઉવાચ ।
વિષ્ણુશિષ્ય મહાશૈવ સમ્યગુક્તં ત્વયા વિધે ।
ચરિતં પરમં હ્યેતચ્છિવાયાશ્ચ શિવસ્ય ચ ॥ ૧॥

કસ્તારકાસુરો બ્રહ્મન્યેન દેવાઃ પ્રપીડિતાઃ ।
કસ્ય પુત્રસ્ય વૈ બ્રૂહિ તત્કથાં ચ શિવાશ્રયામ્ ॥ ૨॥

ભસ્મીચકાર સ કથં શઙ્કરશ્ચ સ્મરં વશી ।
તદપિ બ્રૂહિ સુપ્રીત્યાઽદ્ભુતં તચ્ચરિતં વિભોઃ ॥ ૩॥

કથં શિવા તપોઽત્યુગ્રં ચકાર સુખહેતવે ।
કથં પ્રાપ પતિં શમ્ભુમાદિશક્તિર્જગત્પરા ॥ ૪॥

એતત્સર્વમશેષેણ વિશેષેણ મહાબુધ ।
બ્રૂહિ મે શ્રદ્દધાનાય સ્વપુત્રાય શિવાત્મને ॥ ૫॥

બ્રહ્મોવાચ
પુત્રવર્ય મહાપ્રાજ્ઞ સુરર્ષે શંસિતવ્રત ।
વચ્મ્યહં શઙ્કરં સ્મૃત્વા સર્વં તચ્ચરિતં શ ૃણુ ॥ ૬॥

પ્રથમં તારકસ્યૈવ ભવં સંશ ૃણુ નારદ ।
યદ્વધાર્થં મહાયત્નઃ કૃતો દેવૈઃ શિવાશ્રયૈઃ ॥ ૭॥

મમ પુત્રો મરીચિર્યઃ કશ્યપસ્તસ્ય ચાત્મજઃ ।

ત્રયોદશમિતાસ્તસ્ય સ્ત્રિયો દક્ષસુતાશ્ચ યાઃ ॥ ૮॥

દિતિર્જ્યેષ્ઠા ચ તત્સ્ત્રી હિ સુષુવે સા સુતદ્વયમ્ ।
હિરણ્યકશિપુર્જ્યેષ્ઠો હિરણ્યાક્ષોઽનુજસ્તતઃ ॥ ૯॥

તૌ હતૌ વિષ્ણુના દૈત્યૌ નૃસિંહક્રોડરૂપતઃ ।
સુદુઃખદૌ તતો દેવાઃ સુખમાપુશ્ચ નિર્ભયાઃ ॥ ૧૦॥

દિતિશ્ચ દુઃખિતાસીત્સા કશ્યપં શરણં ગતા ।
પુનઃસંસેવ્ય તં ભક્ત્યા ગર્ભમાધત્ત સુવ્રતા ॥ ૧૧॥

તદ્વિજ્ઞાય મહેન્દ્રોઽપિ લબ્ધચ્છિદ્રો મહોદ્યમી ।
તદ્ગર્ભં વ્યચ્છિનત્તત્ર પ્રવિશ્ય પવિના મુહુઃ ॥ ૧૨॥

તદ્વ્રતસ્ય પ્રભાવેણ ન તદ્ગર્ભો મમાર હ ।
સ્વપન્ત્યા દૈવયોગેન સપ્ત સપ્તાભવન્સુતાઃ ॥ ૧૩॥

દેવા આસન્સુતાસ્તે ચ નામતો મરુતોઽખિલાઃ ।
સ્વર્ગં યયુસ્તદેન્દ્રેણ દેવરાજાત્મસાત્કૃતાઃ ॥ ૧૪॥

પુનર્દિતિઃ પતિં ભેજેઽનુતપ્તા નિજકર્મતઃ ।
ચકાર સુપ્રસન્નં તં મુનિં પરમસેવયા ॥ ૧૫॥

કશ્યપ ઉવાચ
તપઃ કુરુ શુચિર્ભૂત્વા બ્રહ્મણશ્ચાયુતં સમાઃ ।
ચેદ્ભવિષ્યતિ તત્પૂર્ણં ભવિતા તે સુતસ્તદા ॥ ૧૬॥

તથા દિત્યા કૃતં પૂર્ણં તત્તપઃ શ્રદ્ધયા મુને ।
તતઃ પત્યુઃ પ્રાપ્ય ગર્ભં સુષુવે તાદૃશં સુતમ્ ॥ ૧૭॥

વજ્રાઙ્ગનામા સોઽભૂદ્વૈ દિતિપુત્રોઽમરોપમઃ ।
નામતુલ્યતનુર્વીરઃ સુપ્રતાપ્યુદ્ભવાદ્બલી ॥ ૧૮॥

જનનીશાસનાત્સદ્યઃ સ સુતો નિર્જરાધિપમ્ ।
બલાદ્ધૃત્વા દદૌ દણ્ડં વિવિધં નિર્જરાનપિ ॥ ૧૯॥

દિતિઃ સુખમતીવાપ દૃષ્ટ્વા શક્રાદિદુર્દશામ્ ।
અમરા અપિ શક્રાદ્યા જગ્મુર્દુઃખં સ્વકર્મતઃ ॥ ૨૦॥

તદાહં કશ્યપેનાશુ તત્રાગત્ય સુસામગીઃ ।
દેવાનત્યાજયંસ્તસ્માત્સદા દેવહિતે રતઃ ॥ ૨૧॥

દેવાન્મુક્ત્વા સ વજ્રાઙ્ગસ્તતઃ પ્રોવાચ સાદરમ્ ।
શિવભક્તોઽતિશુદ્ધાત્મા નિર્વિકારઃ પ્રસન્નધીઃ ॥ ૨૨॥

વજ્રાઙ્ગ ઉવાચ
ઇન્દ્રો દુષ્ટઃ પ્રજાઘાતી માતુર્મે સ્વાર્થસાધકઃ ।
સ ફલં પ્રાપ્તવાનદ્ય સ્વરાજ્યં હિ કરોતુ સઃ ॥ ૨૩॥

માતુરાજ્ઞાવશાદ્બ્રહ્મન્કૃતમેતન્મયાખિલમ્ ।
ન મે ભોગાભિલાષો વૈ કસ્યચિદ્ભુવનસ્ય હિ ॥ ૨૪॥

તત્ત્વસારં વિધે બ્રૂહિ મહ્યં વેદવિદાંવર ।
યેન સ્યાં સુસુખી નિત્યં નિર્વિકારઃ પ્રસન્નધીઃ ॥ ૨૫॥

તચ્છ્રુત્વાહં મુનેઽવોચં સાત્ત્વિકો ભાવ ઉચ્યતે ।
તત્ત્વસાર ઇતિ પ્રીત્યા સૃજામ્યેકાં વરાં સ્ત્રિયમ્ ॥ ૨૬॥

વરાઙ્ગીં નામ તાં દત્ત્વા તસ્મૈ દિતિસુતાય વૈ ।
અયાં સ્વધામ સુપ્રીતઃ કશ્યપસ્તત્પિતાપિ ચ ॥ ૨૭॥

તતો દૈત્યઃ સ વજ્રાઙ્ગઃ સાત્ત્વિકં ભાવમાશ્રિતઃ ।
આસુરં ભાવમુત્સૃજ્ય નિર્વૈરઃ સુખમાપ્તવાન્ ॥ ૨૮॥

ન બભૂવ વરાઙ્ગ્યા હિ હૃદિ ભાવોઽથ સાત્ત્વિકઃ ।
સકામા સ્વપતિં ભેજે શ્રદ્ધયા વિવિધં સતી ॥ ૨૯॥

અથ તત્સેવનાદાશુ સન્તુષ્ટોઽભૂન્મહાપ્રભુઃ ।
સ વજ્રાઙ્ગઃ પતિસ્તસ્યા ઉવાચ વચનં તદા ॥ ૩૦॥

વજ્રાઙ્ગ્યુવાચ ।
કિમિચ્છસિ પ્રિયે બ્રૂહિ કિં તે મનસિ વર્તતે ।
તચ્છ્રુત્વાનમ્ય તં પ્રાહ સા પતિં સ્વમનોરથમ્ ॥ ૩૧॥

વરાઙ્ગ્યુવાચ ।
ચેત્ પ્રસન્નોઽભવસ્ત્વં વૈ સુતં મે દેહિ સત્પતે ।
મહાબલં ત્રિલોકસ્ય જેતારં હરિદુઃખદમ્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા પ્રિયાવાક્યં વિસ્મિતોઽભૂત્સ આકુલઃ ।

ઉવાચ હૃદિ સ જ્ઞાની સાત્ત્વિકો વૈરવર્જિતઃ ॥ ૩૩॥

પ્રિયેચ્છતિ વિરોધં વૈ સુરૈર્મે ન હિ રોચતે ।
કિં કુર્યાં હિ ક્વ ગચ્છેયં કથં નશ્યેન્ન મે પણઃ ॥ ૩૪॥

પ્રિયામનોરથશ્ચૈવ પૂર્ણઃ સ્યાત્ત્રિજગદ્ભવેત્ ।
ક્લેશયુઙ્નિતરાં ભૂયો દેવાશ્ચ મુનયસ્તથા ॥ ૩૫॥

ન પૂર્ણઃ સ્યાત્પ્રિયાકામસ્તદા મે નરકો ભવેત્ ।
દ્વિધાપિ ધર્મહાનિર્વૈ ભવતીત્યનુશુશ્રુવાન્ ॥ ૩૬॥

વજ્રાઙ્ગ ઇત્થં બભ્રામ સ મુને ધર્મસઙ્કટે ।
બલાબલં દ્વયોસ્તત્ર વિચિચિન્ત ચ બુદ્ધિતઃ ॥ ૩૭॥

શિવેચ્છયા સ હિ મુને વાક્યં મેને સ્ત્રિયો બુધઃ ।
તથાસ્ત્વિતિ વચઃ પ્રાહ પ્રિયાં પ્રતિ સ દૈત્યરાટ્ ॥ ૩૮॥

તદર્થમકરોત્તીવ્રં તપોઽન્યદ્દુષ્કરં સ તુ ।
માં સમુદ્દિશ્ય સુપ્રીત્યા બહુવર્ષં જિતેન્દ્રિયઃ ॥ ૩૯॥

વરં દાતુમગાં તસ્મૈ દૃષ્ટ્વાહં તત્તપો મહત્ ।
વરં બ્રૂહિ હ્યવોચં તં સુપ્રસન્નેન ચેતસા ॥ ૪૦॥

વજ્રાઙ્ગસ્તુ તદા પ્રીતં માં દૃષ્ટ્વા ખે સ્થિતં વિભુમ્ ।
સુપ્રણમ્ય બહુસ્તુત્વા વરં વવ્રે પ્રિયાહિતમ્ ॥ ૪૧॥

વજ્રાઙ્ગ ઉવાચ ।
સુતં દેહિ સ્વમાતુર્મે મહાહિતકરં પ્રભો ।
મહાબલં સુપ્રતાપં સુસમર્થં તપોનિધિમ્ ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય ચ તદ્વાક્યં તથાસ્ત્વિત્યબ્રવં મુને ।
અયાં સ્વધામ તદ્દત્ત્વા વિમનાઃ સંસ્મરચ્છિવમ્ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે તારકોત્પત્તૌ વજ્રાઙ્ગોત્પત્તિતપોવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૩.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૫. પઞ્ચદશોઽધ્યાયઃ । તારકાસુરતપોરાજ્યમ્ ।

બ્રહ્મોવાચ ।
અથ સા ગર્ભમાધત્ત વરાઙ્ગી તત્પુરાદરાત્ ।
સ વવર્ધાભ્યન્તરે હિ બહુવર્ષૈઃ સુતેજસા ॥ ૧॥

તતઃ સા સમયે પૂર્ણે વરાઙ્ગી સુષુવે સુતમ્ ।
મહાકાયં મહાવીર્યં પ્રજ્વલન્તં દિશો દશ ॥ ૨॥

તદૈવ ચ મહોત્પાતા બભૂવુર્દુઃખહેતવઃ ।
જાયમાને સુતે તસ્મિન્વરાઙ્ગ્યાઃ સુરદુઃખદે ॥ ૩॥

દિવિ ભુવ્યન્તરિક્ષે ચ સર્વલોકભયઙ્કરાઃ ।
અનર્થસૂચકાસ્તાત ત્રિવિધાઃ તાન્બ્રવીમ્યહમ્ ॥ ૪॥

સોલ્કાશ્ચાશનયઃ પેતુર્મહાશબ્દા ભયઙ્કરાઃ ।
ઉદયં ચક્રુરુત્કૃષ્ટાઃ કેતવો દુઃખદાયકાઃ ॥ ૫॥

ચચાલ વસુધા સાદ્રિર્જજ્વલુઃ સકલા દિશઃ ।
ચુક્ષુભુઃ સરિતઃ સર્વાઃ સાગરાશ્ચ વિશેષતઃ ॥ ૬॥

હૂત્કારાનીરયન્ ઘોરાન્ખરસ્પર્શો મરુદ્વવૌ ।
ઉન્મૂલયન્મહાવૃક્ષાન્વાત્યાનીકો રજોધ્વજઃ ॥ ૭॥

સરાહ્વોઃસૂર્યવિધ્વોસ્તુ મુહુઃ પરિધયોઽભવન્ ।
મહાભયસ્ય વિપ્રેન્દ્ર સૂચકાઃસુખહારકાઃ ॥ ૮॥

મહીધ્રવિવરેભ્યશ્ચ નિર્ઘાતા ભયસૂચકાઃ ।
રથનિર્હ્રાદતુલ્યાશ્ચ જજ્ઞિરેઽવસરે તતઃ ॥ ૯॥

સૃગાલોલૂકટઙ્કારૈર્વમન્ત્યો મુખતોઽનલમ્ ।
અન્તર્ગ્રામેષુ વિકટં પ્રણેદુરશિવાઃ શિવાઃ ॥ ૧૦॥

યતસ્તતો ગ્રામસિંહા ઉન્નમય્ય શિરોધરામ્ ।
સઙ્ગીતવદ્રોદનવદ્વ્યમુઞ્ચન્વિવિધાન્રવાન્ ॥ ૧૧॥

ખાર્કારરભસા મત્તાઃ ખુરૈર્ઘ્નન્તો રસાં ખરાઃ ।
વરૂથશઃ તદા તાત પર્યધાવન્નિતસ્તતઃ ॥ ૧૨॥

ખગા ઉદપતન્નીડાદ્ત્રાસભત્રસ્તમાનસાઃ ।
ક્રોશન્તો વ્યગ્રચિત્તાશ્ચ સ્થિતિમાપુર્ન કુત્રચિત્ ॥ ૧૩॥

શકૃન્મૂત્રમકાર્ષુશ્ચ ગોષ્ઠેઽરણ્યે ભયાકુલાઃ ।
બભ્રમુઃ સ્થિતિમાપુર્નો પશવસ્તાડિતા ઇવ ॥ ૧૪॥

ગાવોઽત્રસન્નસૃગ્દોહા બાષ્પનેત્રા ભયાકુલાઃ ।
તોયદા અભવંસ્તત્ર ભયદાઃ પૂયવર્ષિણઃ ॥ ૧૫॥

વ્યરુદન્પ્રતિમાસ્તત્ર દેવાનામુત્પતિષ્ણવઃ ।
વિનાનિલં દ્રુમાઃ પેતુર્ગ્રહયુદ્ધં બભૂવ ખે ॥ ૧૬॥

ઇત્યાદિકા બહૂત્પાતા જજ્ઞિરે મુનિસત્તમ ।
અજ્ઞાનિનો જનાસ્તત્ર મેનિરે વિશ્વસમ્પ્લવમ્ ॥ ૧૭॥

અથ પ્રજાપતિર્નામાકરોત્તસ્યાસુરસ્ય વૈ ।
તારકેતિ વિચાર્યૈવ કશ્યપો હિ મહૌજસઃ ॥ ૧૮॥

મહાવીરઃ સ સહસા વ્યજ્યમાનાત્મપૌરુષઃ ।
વવૃધેઽત્યશ્મસારેણ કાયેનાદ્રિપતિર્યથા ॥ ૧૯॥

અથો સ તારકો દૈત્યો મહાબલપરાક્રમઃ ।
તપઃ કર્તું જનન્યાશ્ચાજ્ઞાં યયાચે મહામનાઃ ॥ ૨૦॥

પ્રાપ્તાજ્ઞઃ સ મહામાયી માયિનામપિ મોહકઃ ।
સર્વદેવજયં કર્તું તપોઽર્થં મન આદધે ॥ ૨૧॥

મધોર્વનમુપાગમ્ય ગુર્વાજ્ઞાપ્રતિપાલકઃ ।
વિધિમુદ્દિશ્ય વિધિવત્તપસ્તેપે સુદારુણમ્ ॥ ૨૨॥

ઊર્ધ્વબાહુશ્ચૈકપાદો રવિં પશ્યન્સ ચક્ષુષા ।
શતવર્ષં તપશ્ચક્રે દૃઢચિત્તો દૃઢવ્રતઃ ॥ ૨૩॥

અઙ્ગુષ્ઠેન ભુવં સ્પૃષ્ટ્વા શતવર્ષં ચ તાદૃશઃ ।
તેપે તપો દૃઢાત્મા સ તારકોઽસુરરાટ્ પ્રભુઃ ॥ ૨૪॥

શતવર્ષં જલં પ્રાશ્નન્ શતવર્ષં ચ વાયુભુક્ ।
શતવર્ષં જલે તિષ્ઠચ્છતં ચ સ્થણ્ડિલેઽતપત્ ॥ ૨૫॥

શતવર્ષં તથા ચાગ્નૌ શતવર્ષમધોમુખઃ ।
શતવર્ષં તુ હસ્તસ્ય તલેન ચ ભુવં સ્થિતઃ ॥ ૨૬॥

શતવર્ષં તુ વૃક્ષસ્ય શાખામાલમ્બ્ય વૈ મુને ।
પાદાભ્યાં શુચિધૂમં હિ પિબંશ્ચાધોમુખસ્તથા ॥ ૨૭॥

એવં કષ્ટતરં તેપે સુતપઃ સ તુ દૈત્યરાટ્ ।
કામમુદ્દિશ્ય વિધિવચ્છૃણ્વતામપિ દુસ્સહમ્ ॥ ૨૮॥

તત્રૈવં તપતસ્તસ્ય મહત્તેજો વિનિસ્સૃતમ્ ।
શિરસઃ સર્વસંસર્પિ મહોપદ્રવકૃન્મુને ॥ ૨૯॥

તેનૈવ દેવલોકાસ્તે દગ્ધપ્રાયા બભૂવિરે ।
અભિતો દુઃખમાપન્નાઃ સર્વે દેવર્ષયો મુને ॥ ૩૦॥

ઇન્દ્રશ્ચ ભયમાપેદેઽધિકં દેવેશ્વરસ્તદા ।
તપસ્યત્યદ્ય કશ્ચિદ્વૈ મત્પદં ધર્ષયિષ્યતિ ॥ ૩૧॥

અકાણ્ડે ચૈવ બ્રહ્માણ્ડં સંહરિષ્યત્યયં પ્રભુઃ ।
ઇતિ સંશયમાપન્ના નિશ્ચયં નોપલેભિરે ॥ ૩૨॥

તતઃ સર્વે સુસમ્મન્ત્ર્ય મિથસ્તે નિર્જરર્ષયઃ ।
મલ્લોકમગમન્ભીતા દીના માં સમુપસ્થિતાઃ ॥ ૩૩॥

માં પ્રણમ્ય સુસંસ્તૂય સર્વે તે ક્લિષ્ટચેતસઃ ।
કૃતસ્ત્વઞ્જલયો મહ્યં વૃત્તં સર્વં ન્યવેદયન્ ॥ ૩૪॥

અહં સર્વં સુનિશ્ચિત્ય કારણં તસ્ય સદ્ધિયા ।
વરં દાતું ગતસ્તત્ર યત્ર તપ્યતિ સોઽસુરઃ ॥ ૩૫॥

અવોચં વચનં તં વૈ વરં બ્રૂહીત્યહં મુને ।
તપસ્તપ્તં ત્વયા તીવ્રં નાદેયં વિદ્યતે તવ ॥ ૩૬॥

ઇત્યેવં મદ્વચઃ શ્રુત્વા તારકઃ સ મહાસુરઃ ।
માં પ્રણમ્ય સુસંસ્તૂય વરં વવ્રેઽતિદારુણમ્ ॥ ૩૭॥

તારક ઉવાચ ।
ત્વયિ પ્રસન્ને વરદે કિમસાધ્યં ભવેન્મમ ।
અતો યાચે વરં ત્વત્તઃ શ ૃણુ તન્મે પિતામહ ॥ ૩૮॥

યદિ પ્રસન્નો દેવેશ યદિ દેયો વરો મમ ।
દેયં વરદ્વયં મહ્યં કૃપાં કૃત્વા મમોપરિ ॥ ૩૯॥

ત્વયા ચ નિર્મિતે લોકે સકલેઽસ્મિન્મહાપ્રભો ।
મત્તુલ્યો બલવાન્નૂનં ન ભવેત્કોઽપિ વૈ પુમાન્ ॥ ૪૦॥

શિવવીર્યસમુત્પન્નઃ પુત્રઃસેનાપતિર્યદા ।
ભૂત્વા શસ્ત્રં ક્ષિપેન્મહ્યં તદા મે મરણં ભવેત્ ॥ ૪૧॥

ઇત્યુક્તોઽથ તદા તેન દૈત્યેનાહં મુનીશ્વર ।
વરં ચ તાદૃશં દત્ત્વા સ્વલોકમગમં દ્રુતમ્ ॥ ૪૨॥

દૈત્યોઽપિ સ વરં લબ્ધ્વા મનસેપ્સિતમુત્તમમ્ ।
સુપ્રસન્નતરો ભૂત્વા શોણિતાખ્યપુરં ગતઃ ॥ ૪૩॥

અભિષિક્તસ્તદા રાજ્યે ત્રૈલોક્યસ્યાસુરૈઃ સહ ।
શુક્રેણ દૈત્યગુરુણાજ્ઞયા મે સ મહાસુરઃ ॥ ૪૪॥

તતસ્તુ સ મહાદૈત્યોઽભવત્ ત્રૈલોક્યનાયકઃ ।
સ્વાજ્ઞાં પ્રવર્તયામાસ પીડયન્સચરાચરમ્ ॥ ૪૫॥

રાજ્યં ચકાર વિધિવત્ત્રિલોકસ્ય સ તારકઃ ।
પ્રજાશ્ચ પાલયામાસ પીડયન્નિર્જરાદિકાન્ ॥ ૪૬॥

તતઃ સ તારકો દૈત્યસ્તેષાં રત્નાન્યુપાદદે ।
ઇન્દ્રાદિલોકપાલાનાં સ્વતો દત્તાનિ તદ્ભયાત્ ॥ ૪૭॥

ઇન્દ્રેણૈરાવતસ્તસ્ય ભયાત્તસ્મૈ સમર્પિતઃ ।
કુબેરેણ તદા દત્તા નિધયો નવસઙ્ખ્યકાઃ ॥ ૪૮॥

વરુણેન હયાઃ શુભ્રા ઋષિભિઃ કામકૃત્તથા ।
ઇન્દ્રેણોચ્ચૈઃ શ્રવા દિવ્યો ભયાત્તસ્મૈ સમર્પિતઃ ॥ ૪૯॥

યત્ર યત્ર શુભં વસ્તુ દૃષ્ટં તેનાસુરેણ હિ ।
તત્તદ્ગૃહીતં તરસા નિસ્સારસ્ત્રિભવોઽભવત્ ॥ ૫૦॥

સમુદ્રાશ્ચ તથા રત્નાન્યદુસ્તસ્મૈ ભયાન્મુને ।
અકૃષ્ટપચ્યાસીત્પૃથ્વી પ્રજાઃ કામદુઘાખિલાઃ ॥ ૫૧॥

સૂર્યશ્ચ તપતે તદ્વત્તદ્દુઃખં ન યથા ભવેત્ ।
ચન્દ્રસ્તુ પ્રભયા દૃશ્યો વાયુઃ સર્વાનુકૂલ્યવાન્ ॥ ૫૨॥

દેવાનાં ચૈવ યદ્દ્રવ્યં પિતૃણાં ચ પરસ્ય ચ ।
તત્સર્વં સમુપાદત્તમસુરેણ દુરાત્મના ॥ ૫૩॥

વશીકૃત્ય સ લોકાંસ્ત્રીન્સ્વયમિન્દ્રો બભૂવ હ ।
અદ્વિતીયઃ પ્રભુશ્ચાસીદ્રાજ્યં ચક્રેઽદ્ભુતં વશી ॥ ૫૪॥

નિસ્સાર્ય સકલાન્દેવાન્દૈત્યાનસ્થાપયત્તતઃ ।
સ્વયં નિયોજયામાસ દેવયોનિન્ સ્વકર્મણિ ॥ ૫૫॥

અથ તદ્બાધિતા દેવાઃ સર્વે શક્રપુરોગમાઃ ।
મુને માં શરણં જગ્મુરનાથા અતિવિહ્વલાઃ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે તારકાસુરતપોરાજ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૩.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૬. ષોડશોઽધ્યાયઃ । તારકાસુરભીતાનાં દેવાનાં કૃતે શિવેન સાન્ત્વનાદાનમ્ ।

બ્રહ્મોવાચ ।
અથ તે નિર્જરાઃ સર્વે સુપ્રણમ્ય પ્રજેશ્વરમ્ ।
તુષ્ટુવુઃ પરયા ભક્ત્યા તારકેણ પ્રપીડિતાઃ ॥ ૧॥

અહં શ્રુત્વામરનુતિં યથાર્થાં હૃદયઙ્ગમામ્ ।
સુપ્રસન્નતરો ભૂત્વા પ્રત્યવોચં દિવૌકસઃ ॥ ૨॥

સ્વાગતં સ્વાધિકારા વૈ નિર્વિઘ્નાઃ સન્તિ વઃ સુરાઃ ।
કિમર્થમાગતા યૂયમત્ર સર્વે વદન્તુ મે ॥ ૩॥

ઇતિ શ્રુત્વા વચો મે તે નત્વા સર્વે દિવૌકસઃ ।
મામૂચુર્નતકા દીનાસ્તારકેણ પ્રપીડિતાઃ ॥ ૪॥

દેવા ઊચુઃ ।
લોકેશ તારકો દૈત્યો વરેણ તવ દર્પિતઃ ।
નિરસ્યાસ્માન્હઠાત્સ્થાનાન્ચગ્રહીન્નો બલાત્ સ્વયમ્ ॥ ૫॥

ભવતઃ કિમુ ન જ્ઞાતં દુઃખં યન્નઃ ઉપસ્થિતમ્ ।

તદ્દુઃખં નાશય ક્ષિપ્રં વયં તે શરણં ગતાઃ ॥ ૬॥

અહર્નિશં બાધતેઽસ્માન્ યત્ર તત્રાસ્થિતાન્સ વૈ ।
પલાયમાનાઃ પશ્યામો યત્ર તત્રાપિ તારકમ્ ॥ ૭॥

તારકાન્નશ્ચ યદ્દુઃખં સમ્ભૂતં સકલેશ્વર ।
તેન સર્વે વયં તાત પીડિતા વિકલા અતિ ॥ ૮॥

અગ્નિર્યમોઽથ વરુણો નિરૃતિર્વાયુરેવ ચ ।
અન્યે દિક્પતયશ્ચાપિ સર્વે યદ્વશગામિનઃ ॥ ૯॥

સર્વે મનુષ્યધર્માણઃસર્વૈઃ પરિકરૈર્યુતાઃ ।
સેવન્તે તં મહાદૈત્યં ન સ્વતન્ત્રાઃ કદાચન ॥ ૧૦॥

એવં તેનાર્દિતા દેવા વશગાસ્તસ્ય સર્વદા ।
તદિચ્છાકાર્યનિરતાઃ સર્વે તસ્યાનુજીવિનઃ ॥ ૧૧॥

યાવત્યો વનિતાઃ સર્વા યે ચાપ્યપ્સરસાં ગણાઃ ।
સર્વાંસ્તાનગ્રહીદ્દૈત્યસ્તારકોઽસૌ મહાબલી ॥ ૧૨॥

ન યજ્ઞાઃસમ્પ્રવર્તન્તે ન તપસ્યન્તિ તાપસાઃ ।
દાનધર્માદિકં કિઞ્ચિન્ન લોકેષુ પ્રવર્ત્તતે ॥ ૧૩॥

તસ્ય સેનાપતિઃ ક્રૌઞ્ચો મહાપાપ્યસ્તિ દાનવઃ ।
સ પાતાલતલં ગત્વા બાધતે ત્વનિશં પ્રજાઃ ॥ ૧૪॥

તેન નસ્તારકેણેદં સકલં ભુવનત્રયમ્ ।
હૃતં હઠાજ્જગદ્ધાતઃ પાપેનાકરુણાત્મના ॥ ૧૫॥

વયં ચ તત્ર યાસ્યામો યત્સ્થાનં ત્વં વિનિર્દિશેઃ ।
સ્વસ્થાસ્તદ્વારિતાસ્તેન લોકનાથ સુરારિણા ॥ ૧૬॥

ત્વં નો ગતિશ્ચ શાસ્તા ચ ધાતા ત્રાતા ત્વમેવ હિ ।
વયં સર્વે તારકાખ્યવહ્નૌ દગ્ધાઃ સુવિહ્વલાઃ ॥ ૧૭॥

તેન ક્રૂરા ઉપાય નઃ સર્વે હતબલાઃ કૃતાઃ ।
વિકારે સાન્નિપાતે વા વીર્યવન્ત્યૌષધાનિ ચ ॥ ૧૮॥

યત્રાસ્માકં જયાશા હિ હરિચક્રે સુદર્શને ।
તત્કુણ્ઠિતમભૂત્તસ્ય કણ્ઠે પુષ્પમિવાર્પિતમ્ ॥ ૧૯॥

બ્રહ્મોવાચ
ઇત્યેતદ્વચનં શ્રુત્વા નિર્જરાણામહં મુને ।
પ્રત્યવોચં સુરાન્સર્વાંસ્તત્કાલસદૃશં વચઃ ॥ ૨૦॥

બ્રહ્મોવાચ
મમૈવ વચસા દૈત્યસ્તારકાખ્યઃ સમેધિતઃ ।
ન મત્તસ્તસ્ય હનનં યુજ્યતે હિ દિવૌકસઃ ॥ ૨૧॥

તતો નૈવ વધો યોગ્યો યતો વૃદ્ધિમુપાગતઃ ।
વિષવૃક્ષોઽપિ સંવર્ધ્ય સ્વયં છેત્તુમસામ્પ્રતમ્ ॥ ૨૨॥

યુષ્માકં ચાખિલં કાર્યં કર્તું યોગ્યો હિ શઙ્કરઃ ।
કિન્તુ સ્વયં ન શક્તો હિ પ્રતિકર્તું પ્રચોદિતઃ ॥ ૨૩॥

તારકાખ્યસ્તુ પાપેન સ્વયમેષ્યતિ સઙ્ક્ષયમ્ ।
યથા યૂયં સંવિદધ્વમુપદેશકરસ્ત્વહમ્ ॥ ૨૪॥

ન મયા તારકો વધ્યો હરિણાપિ હરેણ ચ ।
નાન્યેનાપિ સુરૈર્વાપિ મદ્વરાત્સત્યમુચ્યતે ॥ ૨૫॥

શિવવીર્યસમુત્પન્નો યદિ સ્યાત્તનયઃ સુરાઃ ।
સ એવ તારકાખ્યસ્ય હન્તા દૈત્યસ્ય નાપરઃ ॥ ૨૬॥

યમુપાયમહં વચ્મિ તં કુરુધ્વં સુરોત્તમાઃ ।
મહાદેવપ્રસાદેન સિદ્ધિમેષ્યતિ સ ધ્રુવમ્ ॥ ૨૭॥

સતી દાક્ષાયણી પૂર્વં ત્યક્તદેહા તુ યાભવત્ ।
સોત્પન્ના મેનકાગર્ભાત્સા કથા વિદિતા હિ વઃ ॥ ૨૮॥

તસ્યા અવશ્યં ગિરિશઃ કરિષ્યતિ કરગ્રહમ્ ।
તત્કુરુધ્વમુપાયં ચ તથાપિ ત્રિદિવૌકસઃ ॥ ૨૯॥

તથા વિધધ્વં સુતરાં તસ્યાં તુ પરિયત્નતઃ ।
પાર્વત્યાં મેનકાજાયાં રેતઃપ્રતિનિપાતને ॥ ૩૦॥

તમૂર્ધ્વરેતસં શમ્ભું સૈવ પ્રચ્યુતરેતસમ્ ।
કર્તું સમર્થા નાન્યાસ્તિ તથા કાપ્યબલા બલાત્ ॥ ૩૧॥

સા સુતા ગિરિરાજસ્ય સામ્પ્રતં પ્રૌઢયૌવના ।
તપસ્યન્તં હિમગિરૌ નિત્યં સંસેવતે હરમ્ ॥ ૩૨॥

વાક્યાદ્ધિમવતઃ કાલી સ્વપિતુર્હઠતશ્શિવા ।
સખીભ્યાં સેવતે સાર્ધં ધ્યાનસ્થં પરમેશ્વરમ્ ॥ ૩૩॥

તામગ્રતોઽર્ચમાનાં વૈ ત્રૈલોક્યે વરવર્ણિનીમ્ ।
ધ્યાનાસક્તો મહેશો હિ મનસાપિ ન હીયતે ॥ ૩૪॥

ભાર્યાં સમીહેત યથા સ કાલીં ચન્દ્રશેખરઃ ।
તથા વિધધ્વં ત્રિદશા ન ચિરાદેવ યત્નતઃ ॥ ૩૫॥

સ્થાનં ગત્વાથ દૈત્યસ્ય તમહં તારકં તતઃ ।
નિવારયિષ્યે કુહઠાત્સ્વસ્થાનં ગચ્છતામરાઃ ॥ ૩૬॥

ઇત્યુક્ત્વાહં સુરાન્ શીઘ્રં તારકાખ્યાસુરસ્ય વૈ ।
ઉપસઙ્ગમ્ય સુપ્રીત્યા સમાભાષ્યેદમબ્રવમ્ ॥ ૩૭॥

બ્રહ્મોવાચ
તેજોઃસારમિમં સ્વર્ગં રાજ્યં ત્વં પરિપાસિ નઃ ।
યદર્થં સુતપસ્તપ્તં વાઞ્છસિ ત્વં તતોઽધિકમ્ ॥ ૩૮॥

વરશ્ચાપ્યવરો દત્તો ન મયા સ્વર્ગરાજ્યતા ।
તસ્માત્સ્વર્ગં પરિત્યજ્ય ક્ષિતૌ રાજ્યં સમાચર ॥ ૩૯॥

દેવયોગ્યાનિ તત્રૈવ કાર્યાણિ નિખિલાન્યપિ ।
ભવિષ્યન્ત્યસુરશ્રેષ્ઠ નાત્ર કાર્યા વિચારણા ॥ ૪૦॥

ઇત્યુક્ત્વાહં ચ સમ્બોધ્યાસુરં તં સકલેશ્વરઃ ।
સ્મૃત્વા શિવાં ચ સશિવં તત્રાન્તર્ધાનમાગતઃ ॥ ૪૧॥

તારકોઽપિ પરિત્યજ્ય સ્વર્ગં ક્ષિતિમથાભ્યગાત્ ।
શોણિતાખ્યપુરે સ્થિત્વા સર્વરાજ્યં ચકાર સઃ ॥ ૪૨॥

દેવાઃસર્વેઽપિ તચ્છ્રુત્વા મદ્વાક્યં સુપ્રણમ્ય મામ્ ।
શક્રસ્થાનં યયુઃ પ્રીત્યા શક્રેણ સુસમાહિતાઃ ॥ ૪૩॥

તત્ર ગત્વા મિલિત્વા ચ વિચાર્ય ચ પરસ્પરમ્ ।
તે સર્વે મરુતઃ પ્રીત્યા મઘવન્તં વચોઽબ્રુવન્ ॥ ૪૪॥

દેવા ઊચુઃ ।
શમ્ભોર્યથા શિવાયાં વૈ રુચિર્જાયેત કામતઃ ।
મઘવંસ્તે પ્રકર્તવ્યં બ્રહ્મોક્તં સર્વમેવ તત્ ॥ ૪૫॥

બ્રહ્મોવાચ ।
ઇત્યેવં સર્વવૃત્તાન્તં વિનિવેદ્ય સુરેશ્વરમ્ ।
જગ્મુસ્તે સર્વતો દેવાઃ સ્વં સ્વં સ્થાનં મુદાન્વિતાઃ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે દેવસાન્ત્વનવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૩.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૭. સપ્તદશોઽધ્યાયઃ । ઇન્દ્રકામદેવસંવાદઃ ।

બ્રહ્મોવાચ ।
ગતેષુ તેષુ દેવેષુ શક્રઃ સસ્માર વૈ સ્મરમ્ ।
પીડિતસ્તારકેનાતિ દૈત્યેન ચ દુરાત્મના ॥ ૧॥

આગતસ્તત્ક્ષણાત્કામઃ સવસન્તો રતિપ્રિયઃ ।
સાવલેપો યુતો રત્યા ત્રૈલોક્યવિજયી પ્રભુઃ ॥ ૨॥

પ્રણામં ચ તતઃ કૃત્વા સ્થિત્વા તત્પુરતઃ સ્મરઃ ।
મહોન્નતમનાસ્તાત સાઞ્જલિઃ શક્રમબ્રવીત્ ॥ ૩॥

કામ ઉવાચ ।
કિં કાર્યં તે સમુત્પન્નં સ્મૃતોઽહં કેન હેતુના ।
તત્ ત્વં કથય દેવેશ તત્કર્તું સમુપાગતઃ ॥ ૪॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય કન્દર્પસ્ય સુરેશ્વરઃ ।
ઉવાચ વચનં પ્રીત્યા યુક્તં યુક્તમિતિ સ્તુવન્ ॥ ૫॥

શક્ર ઉવાચ ।
તવ સાધુ સમારમ્ભો યન્મે કાર્યમુપસ્થિતમ્ ।
તત્કર્તુમુદ્યતોઽસિ ત્વં ધન્યોઽસિ મકરધ્વજ ॥ ૬॥

પ્રસ્તુતં શૃણુ મદ્વાક્યં કથયામિ તવાગ્રતઃ ।
મદીયં ચૈવ યત્કાર્યં ત્વદીયં તન્ન ચાન્યથા ॥ ૭॥

મિત્રાણિ મમ સન્ત્યેવ બહૂનિ સુમહાન્તિ ચ ।
પરં તુ સ્મર સન્મિત્રં ત્વત્તુલ્યં ન હિ કુત્રચિત્ ॥ ૮॥

જયાર્થં મે દ્વયં તાત નિર્મિતં વજ્રમુત્તમમ્ ।
વજ્રં ચ નિષ્ફલં સ્યાદ્વૈ ત્વં તુ નૈવ કદાચન ॥ ૯॥

યતો હિતં પ્રજાયેત તતઃ કો નુ પ્રિયઃ પરઃ ।
તસ્માન્મિત્રવરસ્ત્વં હિ મત્કાર્યં કર્તુમર્હસિ ॥ ૧૦॥

મમ દુઃખં સમુત્પન્નમસાધ્યં ચાપિ કાલજમ્ ।
કેનાપિ નૈવ તચ્છક્યં દૂરીકર્તું ત્વયા વિના ॥ ૧૧॥

દાતુઃ પરીક્ષા દુર્ભિક્ષે રણે શૂરસ્ય જાયતે ।
આપત્કાલે તુ મિત્રસ્યાશક્તૌ સ્ત્રીણાં કુલસ્ય હિ ॥ ૧૨॥

વિનયે સઙ્કટે પ્રાપ્તેઽવિતથસ્ય પરોક્ષતઃ ।
સુસ્નેહસ્ય તથા તાત નાન્યથા સત્યમીરિતમ્ ॥ ૧૩॥

પ્રાપ્તાયાં વૈ મમાપત્તાવવાર્યાયાં પરેણ હિ ।
પરીક્ષા ચ ત્વદીયાદ્યા મિત્રવર્ય ભવિષ્યતિ ॥ ૧૪॥

ન કેવલં મદીયં ચ કાર્યમસ્તિ સુખાવહમ્ ।
કિં તુ સર્વસુરાદીનાં કાર્યમેતન્ન સંશયઃ ॥ ૧૫॥

બ્રહ્મોવાચ ।
ઇત્યેતન્મઘવદ્વાક્યં શ્રુત્વા તુ મકરધ્વજઃ ।
ઉવાચ પ્રેમગમ્ભીરં વાક્યં સુસ્મિતપૂર્વકમ્ ॥ ૧૬॥

કામ ઉવાચ ।
કિમર્થમિત્થં વદસિ નોત્તરં વચ્મ્યહં તવ ।
ઉપકૃત્કૃત્રિમં લોકે દૃશ્યતે કથ્યતે ન ચ ॥ ૧૭॥

સઙ્કટે બહુ યો બ્રૂતે સ કિં કાર્યં કરિષ્યતિ ।
તથાપિ ચ મહારાજ કથયામિ શૃણુ પ્રભો ॥ ૧૮॥

પદં તે કર્ષિતું યો વૈ તપસ્તપતિ દારુણમ્ ।
પાતયિષ્યામ્યહં તં ચ શત્રું તે મિત્ર સર્વથા ॥ ૧૯॥

ક્ષણેન ભ્રંશયિષ્યામિ કટાક્ષેણ વરસ્ત્રિયાઃ ।

દેવર્ષિદાનવાદીંશ્ચ નરાણાં ગણના ન મે ॥ ૨૦॥

વજ્રં તિષ્ઠતુ દૂરે વૈ શસ્ત્રાણ્યન્યાન્યનેકશઃ ।
કિં તે કાર્યં કરિષ્યન્તિ મયિ મિત્ર ઉપસ્થિતે ॥ ૨૧॥

બ્રહ્માણં વા હરિં વાપિ ભ્રષ્ટં કુર્યાં ન સંશયઃ ।
અન્યેષાં ગણના નાસ્તિ પાતયેયં હરં ત્વપિ ॥ ૨૨॥

પઞ્ચૈવ મૃદવો બાણાસ્તે ચ પુષ્પમયા મમ ।
ચાપસ્ત્રિધા પુષ્પમયશ્શિઞ્જિની ભ્રમરાર્જિતા ॥ ૨૩॥

બલં સુદયિતા મે હિ વસન્તઃ સચિવઃ સ્મૃતઃ ।
અહં પઞ્ચબલો દેવ મિત્રં મમ સુધાનિધિઃ । ૨૪॥

સેનાધિપશ્ચ શ‍ૃઙ્ગારો હાવભાવાશ્ચ સૈનિકાઃ ।
સર્વે મે મૃદવઃ શક્ર અહં ચાપિ તથાવિધઃ ॥ ૨૫॥

યદ્યેન પૂર્યતે કાર્યં ધીમાંસ્તત્તેન યોજયેત્ ।
મમ યોગ્યં તુ યત્કાર્યં સર્વં તન્મે નિયોજય ॥ ૨૬॥

બ્રહ્મોવાચ ।
ઇત્યેવં તુ વચસ્તસ્ય શ્રુત્વા શક્રઃ સુહર્ષિતઃ ।
ઉવાચ પ્રણમન્વાચા કામં કાન્તાસુખાવહમ્ ॥ ૨૭॥

શક્ર ઉવાચ ।
યત્કાર્યં મનસોદ્દિષ્ટં મયા તાત મનોભવ ।
કર્ત્તું તત્ ત્વં સમર્થોઽસિ નાન્યસ્માત્તસ્ય સમ્ભવઃ ॥ ૨૮॥

શ‍ૃણુ કામ પ્રવક્ષ્યામિ યથાર્થં મિત્રસત્તમ ।
યદર્થે ચ સ્પૃહા જાતા તવ ચાદ્ય મનોભવ ॥ ૨૯॥

તારકાખ્યો મહાદૈત્યો બ્રહ્મણો વરમદ્ભુતમ્ ।
અભૂતજેયઃ સમ્પ્રાપ્ય સર્વેષામપિ દુઃખદઃ ॥ ૩૦॥

તેન સમ્પીડ્યતે લોકો નષ્ટા ધર્મા હ્યનેકશઃ ।
દુઃખિતા નિર્જરાઃ સર્વે ઋષયશ્ચ તથાખિલાઃ ॥ ૩૧॥

દેવૈશ્ચ સકલૈસ્તેન કૃતં યુદ્ધં યથાબલમ્ ।
સર્વેષાં ચાયુધાન્યત્ર વિફલાન્યભવન્પુરા ॥ ૩૨॥

ભગ્નઃ પાશો જલેશસ્ય હરિચક્રં સુદર્શનમ્ ।

તત્કુણ્ઠિતમભૂત્તસ્ય કણ્ઠે ક્ષિપ્તં ચ વિષ્ણુના ॥ ૩૩॥

એતસ્ય મરણં પ્રોક્તં પ્રજેશેન દુરાત્મનઃ ।
શમ્ભોર્વીર્યોદ્ભવાદ્બાલાન્મહાયોગીશ્વરસ્ય હિ ॥ ૩૪॥

એતત્કાર્યં ત્વયા સાધુ કર્તવ્યં સુપ્રયત્નતઃ ।
તતઃસ્યાન્મિત્રવર્યાતિ દેવાનાં નઃ પરં સુખમ્ ॥ ૩૫॥

મમાપિ વિહિતં તસ્માત્સર્વલોકસુખાવહમ્ ।
મિત્રધર્મં હૃદિ સ્મૃત્વા કર્તુમર્હસિ સામ્પ્રતમ્ ॥ ૩૬॥

શમ્ભુઃસ ગિરિરાજે હિ તપઃ પરમમાસ્થિતઃ ।
સ પ્રભુર્નાપિ કામેન સ્વતન્ત્રઃ પરમેશ્વરઃ ॥ ૩૭॥

તત્સમીપે ચ દેવાર્થં પાર્વતી સ્વસખીયુતા ।
સેવમાના તિષ્ઠતીતિ પિત્રાજ્ઞયા મયા શ્રુતમ્ ॥ ૩૮॥

યથા તસ્યાં રુચિસ્તસ્ય શિવસ્ય નિયતાત્મનઃ ।
જાયેત નિતરાં માર તથા કાર્યં ત્વયા ધ્રુવમ્ ॥ ૩૯॥

ઇતિ કૃત્વા કૃતી સ્યાસ્ત્વં સર્વં દુઃખં વિનઙ્ક્ષ્યતિ ।
લોકે સ્થાયી પ્રતાપસ્તે ભવિષ્યતિ ન ચાન્યથા ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્તઃ સ તુ કામો હિ પ્રફુલ્લમુખપઙ્કજઃ ।
પ્રેમ્ણોવાચેતિ દેવેશં કરિષ્યામિ ન સંશયઃ ॥ ૪૧॥

ઇત્યુક્ત્વા વચનં તસ્મૈ તથેત્યોમિતિ તદ્વચઃ ।
અગ્રહીત્તરસા કામઃ શિવમાયાવિમોહિતઃ ॥ ૪૨॥

યત્ર યોગીશ્વરઃ સાક્ષાત્તપ્યતે પરમં તપઃ ।
જગામ તત્ર સુપ્રીતઃ સદારઃ સવસન્તકઃ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શક્રકામસંવાદવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૨.૩.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

# ૨.૩.૧૮. અષ્ટાદશોઽધ્યાયઃ । કામકૃતવિકારવર્ણનમ્ ।

કામવિકારવર્ણનં

બ્રહ્મોવાચ ।

તત્ર ગત્વા સ્મરો ગર્વી શિવમાયાવિમોહિતઃ ।
મોહકઃ સ મધોશ્ચાદૌ ધર્મં વિસ્તારયન્સ્થિતઃ ॥ ૧॥

વસન્તસ્ય ચ યો ધર્મઃ પ્રસસાર સ સર્વતઃ ।
તપઃસ્થાને મહેશસ્યૌષધિપ્રસ્થે મુનીશ્વર ॥ ૨॥

વનાનિ ચ પ્રફુલ્લાનિ પાદપાનાં મહામુને ।
આસન્વિશેષતસ્તત્ર તત્પ્રભાવાન્મુનીશ્વર ॥ ૩॥

પુષ્પાણિ સહકારાણામશોકવનિકાસુ વૈ ।
વિરેજુસ્સુસ્મરોદ્દીપકરાણિ સુરભીણ્યપિ ॥ ૪॥

કૈરવાણિ ચ પુષ્પાણિ ભ્રમરાકલિતાનિ ચ ।
બભૂવુર્મદનાવેશકરાણિ ચ વિશેષતઃ ॥ ૫॥

સુકામોદ્દીપનકરં કોકિલાકલકૂજિતમ્ ।
આસીદતિ સુરમ્યં હિ મનોહરમતિપ્રિયમ્ ॥ ૬॥

ભ્રમરાણાં તથા શબ્દા વિવિધા અભવન્મુને ।
મનોહરાશ્ચ સર્વેષાં કામોદ્દીપકરા અપિ ॥ ૭॥

ચન્દ્રસ્ય વિશદા કાન્તિર્વિકીર્ણા હિ સમન્તતઃ ।
કામિનાં કામિનીનાં ચ દૂતિકા ઇવ સાભવત્ ॥ ૮॥

માનિનાં પ્રેરણાયાસીત્તત્કાલે કાલદીપિકા ।
મારુતશ્ચ સુખઃ સાધો વવૌ વિરહિણોઽપ્રિયઃ ॥ ૯॥

એવં વસન્તવિસ્તારો મદનાવેશકારકઃ ।
વનૌકસાં તદા તત્ર મુનીનાં દુસ્સહોઽત્યભૂત્ ॥ ૧૦॥

અચેતસામપિ તદા કામાસક્તિરભૂન્મુને ।
સુચેતસાં હિ જીવાનાં સેતિ કિં વર્ણ્યતે કથા ॥ ૧૧॥

એવં ચકાર સ મધુઃ સ્વપ્રભાવં સુદુસ્સહમ્ ।
સર્વેષાં ચૈવ જીવાનાં કામોદ્દીપનકારકઃ ॥ ૧૨॥

અકાલનિર્મિતં તાત મધોર્વીક્ષ્ય હરસ્તદા ।
આશ્ચર્યં પરમં મેને સ્વલીલાત્તતનુઃ પ્રભુઃ ॥ ૧૩॥

અથ લીલાકરસ્તત્ર તપઃ પરમદુષ્કરમ્ ।
તતાપ સ વશીશો હિ હરો દુઃખહરઃ પ્રભુઃ ॥ ૧૪॥

વસન્તે પ્રસૃતે તત્ર કામો રતિસમન્વિતઃ ।
ચૂતં બાણં સમાકૃષ્ય સ્થિતસ્તદ્વામપાર્શ્વતઃ ॥ ૧૫॥

સ્વપ્રભાવં વિતસ્તાર મોહયન્સકલાન્ જનાન્ ।
રત્યા યુક્તં તદા કામં દૃષ્ટ્વા કો વા ન મોહિતઃ ॥ ૧૬॥

એવં પ્રવૃત્તસુરતૌ શ‍ૃઙ્ગારોઽપિ ગણૈઃ સહ ।
હાવભાવયુતસ્તત્ર પ્રવિવેશ હરાન્તિકમ્ ॥ ૧૭॥

મદનઃ પ્રકટસ્તત્ર ન્યવસચ્ચિત્તગો બહિઃ ।
ન દૃષ્ટવાંસ્તદા શમ્ભોશ્છિદ્રં યેન પ્રવિશ્યતે ॥ ૧૮॥

યદા ચાપ્રાપ્તવિવરસ્તસ્મિન્યોગિવરે સ્મરઃ ।
મહાદેવે તદા સોઽભૂન્મહાભયવિમોહિતઃ ॥ ૧૯॥

જ્વલજ્જ્વાલાગ્નિસઙ્કાશભાલનેત્રસમન્વિતમ્ ।
ધ્યાનસ્થં શઙ્કરં કો વા સમાસાદયિતું ક્ષમઃ ॥ ૨૦॥

એતસ્મિન્નન્તરે તત્ર સખીભ્યાં સંયુતા શિવા ।
જગામ શિવપૂજાર્થં નીત્વા પુષ્પાણ્યનેકશઃ ॥ ૨૧॥

પૃથિવ્યાં યાદૃશં લોકૈઃ સૌન્દર્યં વર્ણ્યતે મહત્ ।
તત્સર્વમધિકં તસ્યાં પાર્વત્યામસ્તિ નિશ્ચિતમ્ ॥ ૨૨॥

આર્તવાણિ સુપુષ્પાણિ ધૃતાનિ ચ તયા યદા ।
તત્સૌન્દર્યં કથં વર્ણ્યમપિ વર્ષશતૈરપિ ॥ ૨૩॥

યદા શિવસમીપે તુ ગતા સા પર્વતાત્મજા ।
તદૈવ શઙ્કરો ધ્યાનં ત્યક્ત્વા ક્ષણમવસ્થિતઃ ॥ ૨૪॥

તચ્છિદ્રં પ્રાપ્ય મદનઃ પ્રથમં હર્ષણેન તુ ।
બાણેન હર્ષયામાસ પાર્શ્વસ્થં ચન્દ્રશેખરમ્ ॥ ૨૫॥

શ‍ૃઙ્ગારૈશ્ચ તદા ભાવૈઃ સહિતા પાર્વતી હરમ્ ।
જગામ કામસાહાય્યે મુને સુરભિણા સહ ॥ ૨૬॥

તદૈવાકૃષ્ય તચ્ચાપં રુચ્યર્થં શૂલધારિણઃ ।
દ્રુતં પુષ્પશરં તસ્મૈ સ્મરોઽમુઞ્ચત્સુસંયતઃ ॥ ૨૭॥

યથા નિરન્તરં નિત્યમાગચ્છતિ તથા શિવમ્ ।
તં નમસ્કૃત્ય તત્પૂજાં કૃત્વા તત્પુરતઃ સ્થિતા ॥ ૨૮॥

સા દૃષ્ટા પાર્વતી તત્ર પ્રભુણા ગિરિશેન હિ ।
વિવૃણ્વતી તદાઙ્ગાનિ સ્ત્રીસ્વભાવાત્સુલજ્જયા ॥ ૨૯॥

સુસંસ્મૃત્ય વરં તસ્યા વિધિદત્તં પુરા પ્રભુઃ ।
શિવોઽપિ વર્ણયામાસ તદઙ્ગાનિ મુદા મુને ॥ ૩૦॥

શિવ ઉવાચ ।
કિં મુખં કિં શશાઙ્કશ્ચ કિં નેત્રે ચોત્પલે ચ કિમ્ ।
ભ્રુકુટ્યૌ ધનુષી ચૈતે કન્દર્પસ્ય મહાત્મનઃ ॥ ૩૧॥

અધરઃ કિં ચ બિમ્બં કિં કિં નાસા શુકચઞ્ચુકા ।
કિં સ્વરઃ કોકિલાલાપઃ કિં મધ્યં ચાથ વેદિકા ॥ ૩૨॥

કિં ગતિર્વર્ણ્યતે હ્યસ્યાઃ કિં રૂપં વર્ણ્યતે મુહુઃ ।
પુષ્પાણિ કિં ચ વર્ણ્યન્તે વસ્ત્રાણિ ચ તથા પુનઃ ॥ ૩૩॥

લાલિત્યં ચારુ યત્સૃષ્ટૌ તદેકત્ર વિનિર્મિતમ્ ।
સર્વથા રમણીયાનિ સર્વાઙ્ગાનિ ન સંશયઃ ॥ ૩૪॥

અહો ધન્યતરા ચેયં પાર્વત્યદ્ભુતરૂપિણી ।
એતત્સમા ન ત્રૈલોક્યે નારી કાપિ સુરૂપિણી ॥ ૩૫॥

સુલાવણ્યનિધિશ્ચેયમદ્ભુતાઙ્ગાનિ બિભ્રતી ।
વિમોહિની મુનીનાં ચ મહાસુખવિવર્ધીની ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇત્યેવં વર્ણયિત્વા તુ તદઙ્ગાનિ મુહુર્મુહુઃ ।
વિધિદત્તવરાધ્યાસાદ્ધરસ્તુ વિરરામ હ ॥ ૩૭॥

હસ્તં વસ્ત્રાન્તરે યાવદચાલયત શઙ્કરઃ ।
સ્ત્રીસ્વભાવાચ્ચ સા તત્ર લજ્જિતા દૂરતો ગતા ॥ ૩૮॥

વિવૃણ્વતી નિજાઙ્ગાનિ પશ્યન્તી ચ મુહુર્મુહુઃ ।

સુવીક્ષણૈર્મહામોદાત્સુસ્મિતાભૂચ્છિવા મુને ॥ ૩૯॥

એવં ચેષ્ટાં તદા દૃષ્ટ્વા શમ્ભુર્મોહમુપાગતઃ ।
ઉવાચ વચનં ચૈવં મહાલીલો મહેશ્વરઃ ॥ ૪૦॥

અસ્યા દર્શનમાત્રેણ મહાનન્દો ભવત્યલમ્ ।
યદાલિઙ્ગનમેતસ્યાઃ કુર્યાં કિન્તુ તતઃ સુખમ્ ॥ ૪૧॥

ક્ષણમાત્રં વિચાર્યેત્થં સમ્પૂજ્ય ગિરિજાં તતઃ ।
પ્રબુદ્ધઃ સ મહાયોગી સુવિરક્તો જગાવિતિ ॥ ૪૨॥

કિં જાતં ચરિતં ચિત્રં કિમહં મોહમાગતઃ ।
કામેન વિકૃતશ્ચાદ્ય ભૂત્વાપિ પ્રભુરીશ્વરઃ ॥ ૪૩॥

ઈશ્વરોઽહં યદીચ્છેયં પરાઙ્ગસ્પર્શનં ખલુ ।
તર્હિ કોઽન્યોઽક્ષમઃ ક્ષુદ્રઃ કિં કિં નૈવ કરિષ્યતિ ॥ ૪૪॥

એવં વૈરાગ્યમાસાદ્ય પર્યઙ્કાસાદનં ચ તત્ ।
વારયામાસ સર્વાત્મા પરેશઃ કિં પતેદિહ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે કામકૃતવિકારવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૩.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૧૯. એકોનવિંશોઽધ્યાયઃ । શિવેન કામદેવવિનાશઃ ।

નારદ ઉવાચ ।
બ્રહ્મન્વિધે મહાભાગ કિં જાતં તદનન્તરમ્ ।
કથય ત્વં પ્રસાદેન તાં કથાં પાપનાશિનીમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
શ્રૂયતાં સા કથા તાત યજ્જાતં તદનન્તરમ્ ।
તવ સ્નેહાત્પ્રવક્ષ્યામિ શિવલીલાં મુદાવહામ્ ॥ ૨॥

ધૈર્યસ્ય વ્યસનં દૃષ્ટ્વા મહાયોગી મહેશ્વરઃ ।

વિચિચિન્ત મનસ્યેવં વિસ્મિતોઽતિ તતઃ પરમ્ ॥ ૩॥

શિવ ઉવાચ ।
કિમુ વિઘ્નાઃ સમુત્પન્નાઃ કુર્વતસ્તપ ઉત્તમમ્ ।
કેન મે વિકૃતં ચિત્તં કૃતમત્ર કુકર્મિણા ॥ ૪॥

કુવર્ણનં મયા પ્રીત્યા પરસ્ત્ર્યુપરિ વૈ કૃતમ્ ।
જાતો ધર્મવિરોધોઽત્ર શ્રુતિસીમા વિલઙ્ઘિતા ॥ ૫॥

બ્રહ્મોવાચ ।
વિચિન્ત્યેત્થં મહાયોગી પરમેશઃ સતાં ગતિઃ ।
દિશો વિલોકયામાસ પરિતઃ શઙ્કિતસ્તદા ॥ ૬॥

વામભાગે સ્થિતં કામં દદર્શાકૃષ્ટબાણકમ્ ।
સ્વશરં ક્ષેપ્તુકામં હિ ગર્વિતં મૂઢચેતસમ્ ॥ ૭॥

તં દૃષ્ટ્વા તાદૃશં કામં ગિરીશસ્ય પરાત્મનઃ ।
સઞ્જાતઃ ક્રોધસમ્મર્દસ્તત્ક્ષણાદપિ નારદ ॥ ૮॥

કામઃ સ્થિતોઽન્તરિક્ષે સ ધૃત્વા તત્સશરં ધનુઃ ।
ચિક્ષેપાસ્ત્રં દુર્નિવારમમોઘં શઙ્કરે મુને ॥ ૯॥

બભૂવામોઘમસ્ત્રં તુ મોઘં તત્પરમાત્મનિ ।
સમશામ્યત્તતસ્તસ્મિન્સઙ્ક્રુદ્ધે પરમેશ્વરે ॥ ૧૦॥

મોઘીભૂતે શિવે સ્વેઽસ્ત્રે ભયમાપાશુ મન્મથઃ ।
ચકમ્પે ચ પુરઃ સ્થિત્વા દૃષ્ટ્વા મૃત્યુઞ્જયં પ્રભુમ્ ॥ ૧૧॥

સસ્માર ત્રિદશાન્સર્વાન્શક્રાદીન્ભયવિહ્વલઃ ।
સ સ્મરો મુનિશાર્દૂલ સ્વપ્રયાસે નિરર્થકે ॥ ૧૨॥

કામેન સુસ્મૃતા દેવાઃ શક્રાદ્યાસ્તે મુનીશ્વર ।
આયયુઃ સકલાસ્તે હિ શમ્ભું નત્વા ચ તુષ્ટુવુઃ ॥ ૧૩॥

સ્તુતિં કુર્વત્સુ દેવેષુ ક્રુદ્ધસ્યાતિ હરસ્ય હિ ।
તૃતીયાત્તસ્ય નેત્રાદ્વૈ નિસ્સસાર તતો મહાન્ ॥ ૧૪॥

લલાટમધ્યગાત્તસ્માત્સવહ્નિર્દ્રુતસમ્ભવઃ ।
જજ્વાલોર્ધ્વશિખો દીપ્તઃ પ્રલયાગ્નિસમપ્રભઃ ॥ ૧૫॥

ઉત્પત્ય ગગને તૂર્ણં નિપત્ય ધરણી તલે ।

ભ્રામં ભ્રામં સ્વપરિતઃ પપાત મેદિનીં પરિ ॥ ૧૬॥

ભસ્મસાત્કૃતવાન્સાધો મદનં તાવદેવ હિ ।
યાવચ્ચ મરુતાં વાચઃ ક્ષમ્યતાં ક્ષમ્યતામિતિ ॥ ૧૭॥

હતે તસ્મિન્સ્મરે વીરે દેવ દુઃખમુપાગતાઃ ।
રુરુદુર્વિહ્વલાશ્ચાતિક્રોશન્તઃ કિમભૂદિતિ ॥ ૧૮॥

શ્વેતાઙ્ગા વિકૃતાત્મા ચ ગિરિરાજસુતા તદા ।
જગામ મન્દિરં સ્વં ચ સમાદાય સખીજનમ્ ॥ ૧૯॥

ક્ષણમાત્રં રતિસ્તત્ર વિસંજ્ઞા સાભવત્તદા ।
ભર્તૃમૃત્યુજદુઃખેન પતિતા સા મૃતા ઇવ ॥ ૨૦॥

જાતાયાં ચૈવ સંજ્ઞાયાં રતિરત્યન્તવિહ્વલા ।
વિલલાપ તદા તત્રોચ્ચરન્તી વિવિધં વચઃ ॥ ૨૧॥

રતિરુવાચ ।
કિં કરોમિ ક્વ ગચ્છામિ કિં કૃતં દૈવતૈરિહ ।
મત્સ્વામિનં સમાહૂય નાશયામાસુરુદ્ધતમ્ ॥ ૨૨॥

હા હા નાથ સ્મર સ્વામિન્પ્રાણપ્રિય સુખપ્રદ ।
ઇદં તુ કિમભૂદત્ર હા હા પ્રિય પ્રિયેતિ ચ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇત્થં વિલપતી સા તુ વદન્તી બહુધા વચઃ ।
હસ્તૌ પાદૌ તદાસ્ફાલ્ય કેશાનત્રોટયત્તદા ॥ ૨૪॥

તદ્વિલાપં તદા શ્રુત્વા તત્ર સર્વે વનેચરાઃ ।
અભવન્દુઃખિતાઃ સર્વે સ્થાવરા અપિ નારદ ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર દેવાઃ શક્રાદયોઽખિલાઃ ।
રતિમૂચુઃ સમાશ્વાસ્ય સંસ્મરન્તો મહેશ્વરમ્ ॥ ૨૬॥

દેવા ઊચુઃ ।
કિઞ્ચિદ્ભસ્મ ગૃહીત્વા તુ રક્ષ યત્નાદ્ભયં ત્યજ ।
જીવયિષ્યતિ સ સ્વામી લપ્સ્યસે ત્વં પુનઃ પ્રિયમ્ ॥ ૨૭॥

સુખદાતા ન કોઽપ્યસ્તિ દુઃખદાતા ન કશ્ચન ।
સર્વોઽપિ સ્વકૃતં ભુઙ્ક્તે દેવાન્ શોચસિ વૈ વૃથા ॥ ૨૮॥

બ્રહ્મોવાચ ।
ઇત્યાશ્વાસ્ય રતિં દેવાઃ સર્વે શિવમુપાગતાઃ ।
સુપ્રસાદ્ય શિવં ભક્ત્યા વચનં ચેદમબ્રુવન્ ॥ ૨૯॥

દેવા ઊચુઃ ।
ભગવન્ શ્રૂયતામેતદ્વચનં નઃ શુભં પ્રભો ।
કૃપાં કૃત્વા મહેશાન શરણાગતવત્સલ ॥ ૩૦॥

સુવિચારય સુપ્રીત્યા કૃતિં કામસ્ય શઙ્કર ।
કામેનૈતત્કૃતં યત્ર ન સ્વાર્થં તન્મહેશ્વર ॥ ૩૧॥

દુષ્ટેન પીડિતૈર્દેવૈસ્તારકેણાખિલૈર્વિભો ।
કર્મ તત્કારિતં નાથ નાન્યથા વિદ્ધિ શઙ્કર ॥ ૩૨॥

રતિરેકાકિની દેવ વિલાપં દુઃખિતા સતી ।
કરોતિ ગિરિશ ત્વં ચ તામાશ્વાસય સર્વદ ॥ ૩૩॥

સંહારં કર્તુકામોઽસિ ક્રોધેનાનેન શઙ્કર ।
દૈવતૈઃ સહ સર્વેષાં હતવાંસ્તં યદિ સ્મરમ્ ॥ ૩૪॥

દુઃખં તસ્યા રતેર્દૃષ્ટ્વા નષ્ટપ્રાયાશ્ચ દેવતાઃ ।
તસ્માત્ત્વયા ચ કર્તવ્યં રત્યાશ્શોકાપનોદનમ્ ॥ ૩૫॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં પ્રસન્નો ભગવાન્ શિવઃ ।
દેવાનાં સકલાનાં ચ વચનં ચેદમબ્રવીત્ ॥ ૩૬॥

શિવ ઉવાચ ।
દેવાશ્ચ ઋષયઃ સર્વે મદ્વચઃ શ‍ૃણુતાદરાત્ ।
મત્કોપેન ચ યજ્જાતં તત્તથા નાન્યથા ભવેત્ ॥ ૩૭॥

અનઙ્ગસ્તાવદેવ સ્યાત્કામો રતિપતિઃ પ્રભુઃ ।
યાવચ્ચાવતરેત્કૃષ્ણો ધરણ્યાં રુક્મિણીપતિઃ ॥ ૩૮॥

દ્વારકાયાં યદા સ્થિત્વા પુત્રાનુત્પાદયિષ્યતિ ।
તદા કૃષ્ણસ્તુ રુક્મિણ્યાં કામમુત્પાદયિષ્યતિ ॥ ૩૯॥

પ્રદ્યુમ્નં નામ તસ્યૈવ ભવિષ્યતિ ન સંશયઃ ।
જાતમાત્રં તુ તં પુત્રં શમ્બરઃ સંહરિષ્યતિ ॥ ૪૦॥

હૃત્વા પ્રાસ્ય સમુદ્રે તં શમ્બરો દાનવોત્તમઃ ।
મૃતં જ્ઞાત્વા વૃથા મૂઢો નગરં સ્વં ગમિષ્યતિ ॥ ૪૧॥

તાવચ્ચ નગરં તસ્ય રતે સ્થેયં યથાસુખમ્ ।
તત્રૈવ સ્વપતેઃ પ્રાપ્તિઃ પ્રદ્યુમ્નસ્ય ભવિષ્યતિ ॥ ૪૨॥

તત્ર કામો મિલિત્વા તં હત્વા શમ્બરમાહવે ।
ભવિષ્યતિ સુખી દેવાઃ પ્રદ્યુમ્નાખ્યઃ સ્વકામિનીમ્ ॥ ૪૩॥

તદીયં ચૈવ યદ્ દ્રવ્યં નીત્વા સ નગરં પુનઃ ।
ગમિષ્યતિ તયા સાર્ધં દેવાઃ સત્યં વચો મમ ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચઃ શમ્ભોર્દેવા ઊચુઃ પ્રણમ્ય તમ્ ।
કિઞ્ચિદુચ્છ્વસિતાશ્ચિત્તે કરૌ બદ્ધ્વા નતાઙ્ગકાઃ ॥ ૪૫॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
શીઘ્રં જીવય કામં ત્વં રક્ષ પ્રાણાન્ રતેર્હર ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્યામરવચઃ પ્રસન્નઃ પરમેશ્વરઃ ।
પુનર્બભાષે કરુણાસાગરઃ સકલેશ્વરઃ ॥ ૪૭॥

શિવ ઉવાચ ।
હે દેવાઃ સુપ્રસન્નોઽસ્મિ જીવયિષ્યામિ ચાન્તરે ।
કામઃ સ મદ્ગણો ભૂત્વા વિહરિષ્યતિ નિત્યશઃ ॥ ૪૮॥

નાખ્યેયમિદમાખ્યાનં કસ્યચિત્પુરતઃ સુરાઃ ।
ગચ્છત સ્વસ્થલં દુખં નાશયિષ્યામિ સર્વતઃ ॥ ૪૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વાન્તર્દધે રુદ્રો દેવાનાં સ્તુવતાં તદા ।
સર્વે દેવાઃ સુપ્રસન્ના બભૂવુર્ગતવિસ્મયાઃ ॥ ૫૦॥

તતસ્તાં ચ સમાશ્વાસ્ય રુદ્રસ્ય વચને સ્થિતાઃ ।
ઉક્ત્વા વચસ્તદીયં ચ સ્વં સ્વં ધામ યયુર્મુને ॥ ૫૧॥

કામપત્ની સમાદિષ્ટં નગરં સા ગતા તદા ।

પ્રતીક્ષમાણા તં કાલં રુદ્રાદિષ્ટં મુનીશ્વર ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે કામનાશવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૩.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૦. વિંશોઽધ્યાયઃ । વડવાનલચરિતમ્ ।

નારદ ઉવાચ ।
વિધે નેત્રસમુદ્ભૂતવહ્નિજ્વાલા હરસ્ય સા ।
ગતા કુત્ર વદ ત્વં તચ્ચરિતં શશિમૌલિનઃ ॥ ૧॥

બ્રહ્મોવાચ ।
યદા ભસ્મ ચકારાશુ તૃતીયનયનાનલઃ ।
શમ્ભોઃ કામં પ્રજજ્વાલ સર્વતો વિફલસ્તદા ॥ ૨॥

હાહાકારો મહાનાસીત્ ત્રૈલોક્યે સચરાચરે ।
સર્વે દેવર્ષયસ્તાત શરણં માં યયુર્દ્રુતમ્ । ૩॥

સર્વે નિવેદયામાસુસ્તદ્દુઃખં મહ્યમાકુલાઃ ।
સુપ્રણમ્ય સુસંસ્તૂય કરૌ બદ્ધ્વા નતાનનાઃ ॥ ૪॥

તચ્છ્રુત્વાહં શિવં સ્મૃત્વા તદ્ધેતું સુવિમૃશ્ય ચ ।
ગતસ્તત્ર વિનીતાત્મા ત્રિલોકાવનહેતવે ॥ ૫॥

સન્દગ્ધુકામઃ સ શુચિર્જ્વાલામાલાતિદીપિતઃ ।
સ્તમ્ભિતોઽરં મયા શમ્ભુપ્રસાદાત્પ્રસુતેજસા ॥ ૬॥

અથ ક્રોધમયં વહ્નિં દગ્ધુકામં જગત્ત્રયમ્ ।
વાડવં તમકર્ષં ચ સૌમ્યજ્વાલામુખં મુને ॥ ૭॥

તં વાડવતનુમહં સમાદાય શિવેચ્છયા ।
સાગરં સમગાં લોકહિતાય જગતાં પતિઃ ॥ ૮॥

આગતં માં સમાલોક્ય સાગરસ્સાઞ્જલિર્મુને ।

ધૃત્વા ચ પૌરુષં રૂપમાગતઃ સન્નિધિં મમ ॥ ૯॥

સુપ્રણમ્યાથ માં સિન્ધુઃ સંસ્તૂય ચ યથાવિધિ ।
સ મામુવાચ સુપ્રીત્યા સર્વલોકપિતામહમ્ ॥ ૧૦॥

સાગર ઉવાચ ।
કિમર્થમાગતોઽસિ ત્વં બ્રહ્મન્નત્રાખિલાધિપ ।
તન્નિદેશય સુપ્રીત્યા મત્વા માં ચ સ્વસેવકમ્ ॥ ૧૧॥

અથાહં સાગરવચઃ શ્રુત્વા પ્રીતિપુરસ્સરમ્ ।
પ્રાવોચં શઙ્કરં સ્મૃત્વા લૌકિકં હિતમાવહન્ ॥ ૧૨॥

બ્રહ્મોવાચ ।
શ‍ૃણુ તાત મહાધીમન્સર્વલોકહિતાવહ ।
વચ્મ્યહં પ્રીતિતઃસિન્ધો શિવેચ્છાપ્રેરિતો હૃદા ॥ ૧૩॥

અયં ક્રોધો મહેશસ્ય વાડવાત્મા મહાપ્રભુઃ ।
દગ્ધ્વા કામં દ્રુતં સર્વં દગ્ધુકામોઽભવત્તતઃ ॥ ૧૪॥

પ્રાર્થિતોઽહં સુરૈઃ શીઘ્રં પીડિતૈઃ શઙ્કરેચ્છયા ।
તત્રાગત્ય દ્રુતં તં વૈ તાત સ્તમ્ભિતવાન્ શુચિમ્ ॥ ૧૫॥

વાડવં રૂપમાધત્ત તમાદાયાગતોઽત્ર હ ।
નિર્દિશામિ જલાધાર ત્વામહં કરુણાકરઃ ॥ ૧૬॥

અયં ક્રોધી મહેશસ્ય વાડવં રૂપમાશ્રિતઃ ।
જ્વાલામુખસ્ત્વયા ધાર્યો યાવદાભૂતસમ્પ્લવમ્ ॥ ૧૭॥

યદાત્રાહં સમાગમ્ય વત્સ્યામિ સરિતાં પતે ।
તદા ત્વયા પરિત્યાજ્યઃ ક્રોધોઽયં શાઙ્કરોઽદ્ભુતઃ ॥ ૧૮॥

ભોજનં તોયમેતસ્ય તવ નિત્યં ભવિષ્યતિ ।
યત્નાદેવાવધાર્યોઽયં યથા નોપૈતિ ચાન્તરમ્ ॥ ૧૯॥

ઇત્યુક્તો હિ મયા સિન્ધુરઙ્ગીચક્રે તદા ધ્રુવમ્ ।
ગ્રહીતું વાડવં વહ્નિં રૌદ્રં ચાશક્યમન્યતઃ ॥ ૨૦॥

તતઃ પ્રવિષ્ટો જલધૌ સ વાડવતનુઃ શુચિઃ ।
વાર્યોઘાન્સુદહંસ્તસ્ય જ્વાલામાલાભિદીપિતઃ ॥ ૨૧॥

તતઃસન્તુષ્ટચેતસ્કઃ સ્વં ધામાહં ગતો મુને ।

અન્તર્ધાનમગાત્સિન્ધુર્દિવ્યરૂપઃ પ્રણમ્ય મામ્ ॥ ૨૨॥

સ્વાસ્થ્યં પ્રાપ જગત્સર્વં નિર્મુક્તં તદ્ભવાદ્ભયાત્ ।
દેવા બભૂવુઃ સુખિનો મુનયશ્ચ મહામુને ॥ ૨૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે વડવાનલચરિતવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૨.૩.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૧. એકવિંશોઽધ્યાયઃ । પાર્વત્યૈ નારદોપદેશઃ ।

નારદ ઉવાચ ।
વિધે તાત મહાપ્રાજ્ઞ વિષ્ણુશિષ્ય ત્રિલોકકૃત્ ।
અદ્ભુતેયં કથા પ્રોક્તા શઙ્કરસ્ય મહાત્મનઃ ॥ ૧॥

ભસ્મીભૂતે સ્મરે શમ્ભુતૃતીયનયનાગ્નિના ।
તસ્મિન્પ્રવિષ્ટે જલધૌ વદ ત્વં કિમભૂત્તતઃ ॥ ૨॥

કિં ચકાર તતો દેવી પાર્વતી કુધરાત્મજા ।
ગતા કુત્ર સખીભ્યાં સા તદ્વદાદ્ય દયાનિધે ॥ ૩॥

બ્રહ્મોવાચ ।
શ‍ૃણુ તાત મહાપ્રાજ્ઞ ચરિતં શશિમૌલિનઃ ।
મહોતિકારકસ્યૈવ સ્વામિનો મમ ચાદરાત્ ॥ ૪॥

યદાદહચ્છમ્ભુનેત્રોદ્ભવો હિ મદનં શુચિઃ ।
મહાશબ્દોઽદ્ભુતોઽભૂદ્વૈ યેનાકાશઃ પ્રપૂરિતઃ ॥ ૫॥

તેન શબ્દેન મહતા કામં દગ્ધં સમીક્ષ્ય ચ ।
સખીભ્યાં સહ ભીતા સા યયૌ સ્વગૃહમાકુલા ॥ ૬॥

તેન શબ્દેન હિમવાન્પરિવારસમન્વિતઃ ।
વિસ્મિતોઽભૂદતિક્લિષ્ટઃ સુતાં સ્મૃત્વા ગતાં તતઃ ॥ ૭॥

જગામ શોકં શૈલેશો સુતાં દૃષ્ટ્વાતિવિહ્વલામ્ ।

રુદન્તીં શમ્ભુવિરહાદાસસાદાચલેશ્વરઃ ॥ ૮॥

આસાદ્ય પાણિના તસ્યા માર્જયન્નયનદ્વયમ્ ।
મા બિભીહિ શિવેઽરોદીરિત્યુક્ત્વા તાં તદાગ્રહીત્ ॥ ૯॥

ક્રોડે કૃત્વા સુતાં શીઘ્રં હિમવાનચલેશ્વરઃ ।
સ્વમાલયમથાનિન્યે સાન્ત્વયન્નતિવિહ્વલામ્ ॥ ૧૦॥

અન્તર્હિતે સ્મરં દગ્ધ્વા હરે તદ્વિરહાચ્છિવા ।
વિકલાભૂદ્ ભૃશં સા વૈ લેભે શર્મ ન કુત્રચિત્ ॥ ૧૧॥

પિતુર્ગૃહં તદા ગત્વા મિલિત્વા માતરં શિવા ।
પુનર્જાતં તદા મેને સ્વાત્માનં સા ધરાત્મજા ॥ ૧૨॥

નિનિન્દ ચ સ્વરૂપં સા હા હતાસ્મીત્યથાબ્રવીત્ ।
સખીભિર્બોધિતા ચાપિ ન બુબોધ ગિરીન્દ્રજા ॥ ૧૩॥

સ્વપતી ચ પિબન્તી ચ સા સ્નાતી ગચ્છતી શિવા ।
તિષ્ઠન્તી ચ સખીમધ્યે ન કિઞ્ચિત્સુખમાપ હ ॥ ૧૪॥

ધિક્સ્વરૂપં મદીયં ચ તથા જન્મ ચ કર્મ ચ ।
ઇતિ બ્રુવન્તી સતતં સ્મરન્તી હરચેષ્ટિતમ્ ॥ ૧૫॥

એવં સા પાર્વતી શમ્ભુવિરહોત્ક્લિષ્ટમાનસા ।
સુખં ન લેભે કિઞ્ચિદ્વાબ્રવીચ્છિવશિવેતિ ચ ॥ ૧૬॥

નિવસન્તી પિતુર્ગેહે પિનાકિગતચેતના ।
શુશોચાથ શિવા તાત મુમોહ ચ મુહુર્મુહુઃ ॥ ૧૭॥

શૈલાધિરાજોઽપ્યથ મેનકાપિ
મૈનાકમુખ્યાસ્તનયાશ્ચ સર્વે ।
તાં સાન્ત્વયામાસુરદીનસત્ત્વા
હરં વિસસ્માર તથાપિ નો સા ॥ ૧૮॥

અથ દેવમુને ધીમન્હિમવત્પ્રસ્તરે તદા ।
નિયોજિતો બલભિદાગમસ્ત્વં કામચારતઃ ॥ ૧૯॥

તતસ્ત્વં પૂજિતસ્તેન ભૂધરેણ મહાત્મના ।
કુશલં પૃષ્ટવાંસ્તં વૈ તદાવિષ્ટો વરાસને ॥ ૨૦॥

તતઃ પ્રોવાચ શૈલેશઃ કન્યાચરિતમાદિતઃ ।

હરસેવાન્વિતં કામદહનં ચ હરેણ હ ॥ ૨૧॥

શ્રુત્વાવોચો મુને ત્વં તુ તં શૈલેશં શિવં ભજ ।
તમામન્ત્ર્યોદતિષ્ઠસ્ત્વં સંસ્મૃત્ય મનસા શિવમ્ ॥ ૨૨॥

તં સમુત્સૃજ્ય રહસિ કાલીં તામગમસ્ત્વરા ।
લોકોપકારકો જ્ઞાની ત્વં મુને શિવવલ્લભઃ ॥ ૨૩॥

આસાદ્ય કાલીં સમ્બોધ્ય તદ્ધિતે સ્થિત આદરાત્ ।
અવોચસ્ત્વં વચસ્તથ્યં સર્વેષાં જ્ઞાનિનાં વરઃ ॥ ૨૪॥

નારદ ઉવાચ ।
શ઼ૃણુ કાલિ વચો મે હિ સત્યં વચ્મિ દયારતઃ ।
સર્વથા તે હિતકરં નિર્વિકારં સુકામદમ્ ॥ ૨૫॥

સેવિતશ્ચ મહાદેવસ્ત્વયેહ તપસા વિના ।
ગર્વવત્યા યદધ્વંસીદ્દીનાનુગ્રહકારકઃ ॥ ૨૬॥

વિરક્તશ્ચ સ તે સ્વામી મહાયોગી મહેશ્વરઃ ।
વિસૃષ્ટવાન્સ્મરં દગ્ધ્વા ત્વાં શિવે ભક્તવત્સલઃ ॥ ૨૭॥

તસ્માત્ત્વં સુતપોયુક્તા ચિરમારાધયેશ્વરમ્ ।
તપસા સંસ્કૃતાં રુદ્રઃ સ દ્વિતીયાં કરિષ્યતિ ॥ ૨૮॥

ત્વં ચાપિ શઙ્કરં શમ્ભું ન ત્યક્ષ્યસિ કદાચન ।
નાન્યં પતિં હઠાદ્દેવિ ગ્રહીષ્યસિ શિવાદૃતે ॥ ૨૯॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્યવચસ્તે હિ મુને સા ભૂધરાત્મજા ।
કિઞ્ચિદુચ્છ્વસિતા કાલી પ્રાહ ત્વાં સાઞ્જલિર્મુદા ॥ ૩૦॥

શિવોવાચ ।
ત્વં તુ સર્વજ્ઞ જગતામુપકારકર પ્રભો ।
રુદ્રસ્યારાધનાર્થાય મન્ત્રં દેહિ મુને હિ મે ॥ ૩૧॥

ન સિધ્યતિ ક્રિયા કાપિ સર્વેષાં સદ્ગુરું વિના ।
મયા શ્રુતા પુરા સત્યં શ્રુતિરેષા સનાતની ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્યાઃ પાર્વત્યા મુનિસત્તમઃ ।

પઞ્ચાક્ષરં શમ્ભુમન્ત્રં વિધિપૂર્વમુપાદિશઃ ॥ ૩૩॥

અવોચશ્ચ વચસ્તાં ત્વં શ્રદ્ધામુત્પાદયન્મુને ।
પ્રભાવં મન્ત્રરાજસ્ય તસ્ય સર્વાધિકં મુને ॥ ૩૪॥

નારદ ઉવાચ ।
શ‍ૃણુ દેવિ મનોરસ્ય પ્રભાવં પરમાદ્ભુતમ્ ।
યસ્ય શ્રવણમાત્રેણ શઙ્કરઃ સુપ્રસીદતિ ॥ ૩૫॥

મન્ત્રોઽયં સર્વમન્ત્રાણામધિરાજશ્ચ કામદઃ ।
ભુક્તિમુક્તિપ્રદોઽત્યન્તં શઙ્કરસ્ય મહાપ્રિયઃ ॥ ૩૬॥

સુભગે યેન જપ્તેન વિધિના સોઽચિરાદ્ દ્રુતમ્ ।
આરાધિતસ્તે પ્રત્યક્ષો ભવિષ્યતિ શિવો ધ્રુવમ્ ॥ ૩૭॥

ચિન્તયન્તી ચ તદ્રૂપં નિયમસ્થા શરાક્ષરમ્ ।
જપ મન્ત્રં શિવે ત્વં હિ સન્તુષ્યતિ શિવો દ્રુતમ્ ॥ ૩૮॥

એવં કુરુ તપઃ સાધ્વિ તપઃસાધ્યો મહેશ્વરઃ ।
તપસ્યેવ ફલં સર્વૈઃ પ્રાપ્યતે નાન્યથા ક્વચિત્ ॥ ૩૯॥

બ્રહ્મોવાચ ।
એવમુક્ત્વા તદા કાલીં નારદ ત્વં શિવપ્રિયઃ ।
યાદૃચ્છિકોઽગમસ્ત્વં તુ સ્વર્ગં દેવહિતે રતઃ ॥ ૪૦॥

પાર્વતી ચ તદા શ્રુત્વા વચનં તવ નારદ ।
સુપ્રસન્ના તદા પ્રાપ પઞ્ચાક્ષરમનૂત્તમમ્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે નારદોપદેશો નામૈકવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૨. દ્વાવિંશોઽધ્યાયઃ । પાર્વતીતપોવર્ણનમ્ ।

બ્રહ્મોવાચ ।

ત્વયિ દેવમુને યાતે પાર્વતી હૃષ્ટમાનસા ।
તપઃસાધ્યં હરં મેને તપોઽર્થં મન આદધે ॥ ૧॥

તતઃ સખ્યૌ સમાદાય જયાં ચ વિજયાં તથા ।
માતરં પિતરં ચૈવ સખીભ્યાં પર્યપૃચ્છત ॥ ૨॥

પ્રથમં પિતરં ગત્વા હિમવન્તં નગેશ્વરમ્ ।
પર્યપૃચ્છત્સુપ્રણમ્ય વિનયેન સમન્વિતા ॥ ૩॥

સખ્યાવૂચતુઃ -
હિમવન્ શ્રૂયતાં પુત્રીવચનં કથ્યતેઽધુના ॥

સા સ્વયં ચૈવ દેહસ્ય રૂપસ્યાપિ તથા પુનઃ । ૪॥

ભવતો હિ કુલસ્યાસ્ય સાફલ્યં કર્તુમિચ્છતિ ।
તપસા સાધનીયોઽસૌ નાન્યથા દૃશ્યતાં વ્રજેત્ ॥ ૫॥

તસ્માચ્ચ પર્વતશ્રેષ્ઠ દેયાજ્ઞા ભવતાધુના ।
તપઃ કરોતુ ગિરિજા વનં ગત્વેતિ સાદરમ્ ॥ ૬॥

બ્રહ્મોવાચ ।
ઇત્યેવં ચ તદા પૃષ્ટઃ સખીભ્યાં મુનિસત્તમ ।
પાર્વત્યા સુવિચાર્યાથ ગિરિરાજોઽબ્રવીદિદમ્ ॥ ૭॥

હિમાલય ઉવાચ ।
મહ્યં ચ રોચતેઽત્યર્થં મેનાયૈ રુચ્યતાં પુનઃ ।
યથેદં ભવિતવ્યં ચ કિમતઃ પરમુત્તમમ્ ॥ ૮॥

સાફલ્યં તુ મદીયસ્ય કુલસ્ય ચ ન સંશયઃ ।
માત્રે તુ રુચ્યતે ચેદ્વૈ તતઃ શુભતરં નુ કિમ્ ॥ ૯॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં પિત્રા પ્રોક્તં શ્રુત્વા તુ તે તદા ।
જગ્મતુર્માતરં સખ્યૌ તદાજ્ઞપ્તે તયા સહ ॥ ૧૦॥

ગત્વા તુ માતરં તસ્યાઃ પાર્વત્યાસ્તે ચ નારદ ।
સુપ્રણમ્ય કરૌ બધ્વોચતુર્વચનમાદરાત્ ॥ ૧૧॥

સખ્યાવૂચતુઃ
માતસ્ત્વં વચનં પુત્ર્યાઃ શ઼ૃણુ દેવિ નમોઽસ્તુ તે ॥

સુપ્રસન્નતયા તદ્વૈ શ્રુત્વા કર્તુમિહાર્હસિ । ૧૨॥

તપ્તુકામા તુ તે પુત્રી શિવાર્થં પરમં તપઃ ।
પ્રાપ્તાનુજ્ઞા પિતુશ્ચૈવ તુભ્યં ચ પરિપૃચ્છતિ ॥ ૧૩॥

ઇયં સ્વરૂપસાફલ્યં કર્તુકામા પતિવ્રતે ।
ત્વદાજ્ઞા યદિ જાયેત તપ્યતે ચ તથા તપઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ચ તતઃસખ્યૌ તૂષ્ણીમાસ્તાં મુનીશ્વર ।
નાઙ્ગીચકાર મેના સા તદ્વાક્યં ખિન્નમાનસા ॥ ૧૫॥

તતઃ સા પાર્વતી પ્રાહ સ્વયમેવાથ માતરમ્ ।
કરૌ બદ્ધ્વા વિનીતાત્મા સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૧૬॥

પાર્વત્યુવાચ ।
માતસ્તપ્તું ગમિષ્યામિ પ્રાતઃ પ્રાપ્તું મહેશ્વરમ્ ।
અનુજાનીહિ માં ગન્તું તપસેઽદ્ય તપોવનમ્ ॥ ૧૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચઃ પુત્ર્યા મેના દુઃખમુપાગતા ।
સોપાહૂય તદા પુત્રીમુવાચ વિકલા સતી ॥ ૧૮॥

મેનોવાચ ।
દુઃખિતાસિ શિવે પુત્રી તપસ્તપ્તું પુરા યદિ ।
તપશ્ચર ગૃહેઽદ્ય ત્વં ન બહિર્ગચ્છ પાર્વતિ ॥ ૧૯॥

કુત્ર યાસિ તપઃ કર્તું દેવાઃ સન્તિ ગૃહે મમ ।
તીર્થાનિ ચ સમસ્તાનિ ક્ષેત્રાણિ વિવિધાનિ ચ ॥ ૨૦॥

કર્તવ્યો ન હઠઃ પુત્રિ ગન્તવ્યં ન બહિઃ ક્વચિત્ ।
સાધિતં કિં ત્વયા પૂર્વં પુનઃ કિં સાધયિષ્યસિ ॥ ૨૧॥

શરીરં કોમલં વત્સે તપસ્તુ કઠિનં મહત્ ।
એતસ્માત્તુ ત્વયા કાર્યં તપોઽત્ર ન બહિર્વ્રજ ॥ ૨૨॥

સ્ત્રીણાં તપોવનગતિર્ન શ્રુતા કામનાર્થિની ।
તસ્માત્ત્વં પુત્રિ મા કાર્ષીઃ તપોઽર્થં ગમનં પ્રતિ ॥ ૨૩॥

બ્રહ્મોવાચ ।

ઇત્યેવં બહુધા પુત્રી તન્માત્રા વિનિવારિતા ।
સંવદે ન સુખં કિઞ્ચિદ્વિનારાધ્ય મહેશ્વરમ્ ॥ ૨૪॥

તપોનિષિદ્ધા તપસે વનં ગન્તું ચ મેનયા ।
હેતુના તેન સોમેતિ નામ પ્રાપ શિવા તદા ॥ ૨૫॥

અથ તાં દુઃખિતાં જ્ઞાત્વા મેના શૈલપ્રિયા શિવામ્ ।
નિદેશં સા દદૌ તસ્યાઃ પાર્વત્યાસ્તપસે મુને ॥ ૨૬॥

માતુરાજ્ઞાં ચ સમ્પ્રાપ્ય સુવ્રતા મુનિસત્તમ ।
તતઃ સ્વાન્તે સુખં લેભે પાર્વતી સ્મૃતશઙ્કરા ॥ ૨૭॥

માતરં પિતરં સાથ પ્રણિપત્ય મુદા શિવા ।
સખીભ્યાં ચ શિવં સ્મૃત્વા તપસ્તમું સમુદ્યતા ॥ ૨૮॥

હિત્વા મતાન્યનેકાનિ વસ્ત્રાણિ વિવિધાનિ ચ ।
વલ્કલાનિ ધૃતાન્યાશુ મૌઞ્જીં બદ્ધ્વા તુ શોભનામ્ ॥ ૨૯॥

હિત્વા હારં તથા ચર્મ મૃગસ્ય પરમં ધૃતમ્ ।
જગામ તપસે તત્ર ગઙ્ગાવતરણં પ્રતિ ॥ ૩૦॥

શમ્ભુના કુર્વતા ધ્યાનં યત્ર દગ્ધો મનોભવઃ ।
ગઙ્ગાવતરણો નામ પ્રસ્થો હિમવતઃસ ચ ॥ ૩૧॥

હરશૂન્યોઽથ દદૃશે સ પ્રસ્થો હિમભૂભૃતઃ ।
કાલ્યા તત્રેત્ય ભોસ્તાત પાર્વત્યા જગદમ્બયા ॥ ૩૨॥

યત્ર સ્થિત્વા પુરા શમ્ભુઃ તપ્તવાન્દુસ્તરં તપઃ ।
તત્ર ક્ષણં તુ સા સ્થિત્વા બભૂવ વિરહાર્દિતા ॥ ૩૩॥

હા હરેતિ શિવા તત્ર રુદન્તી સા ગિરેઃ સુતા ।
વિલલાપાતિદુઃખાર્તા ચિન્તાશોકસમન્વિતા ॥ ૩૪॥

તતશ્ચિરેણ સા મોહં ધૈર્યાત્સંસ્તભ્ય પાર્વતી ।
નિયમાયાભવત્તત્ર દીક્ષિતા હિમવત્સુતા ॥ ૩૫॥

તપશ્ચકાર સા તત્ર શૃઙ્ગિતીર્થે મહોત્તમે ।
ગૌરીશિખર નામાસીત્તત્તપઃકરણાદ્ધિ તત્ ॥ ૩૬॥

સુન્દરાશ્ચ દ્રુમાસ્તત્ર પવિત્રાશ્શિવયા મુને ।
આરોપિતાઃ પરીક્ષાર્થં તપસઃ ફલભાગિનઃ ॥ ૩૭॥

ભૂમિશુદ્ધિં તતઃ કૃત્વા વેદીં નિર્માય સુન્દરી ।
તથા તપઃસમારબ્ધં મુનીનામપિ દુષ્કરમ્ ॥ ૩૮॥

વિગૃહ્ય મનસા સર્વાણીન્દ્રિયાણિ સહાશુ સા ।
સમુપસ્થાનિકે તત્ર ચકાર પરમં તપઃ ॥ ૩૯॥

ગ્રીષ્મે ચ પરિતો વહ્નિં પ્રજ્વલન્તં દિવાનિશમ્ ।
કૃત્વા તસ્થૌ ચ તન્મધ્યે સતતં જપતી મનુમ્ ॥ ૪૦॥

સતતં ચૈવ વર્ષાસુ સ્થણ્ડિલે સુસ્થિરાસના ।
શિલાપૃષ્ઠે ચ સંસિક્તા બભૂવ જલધારયા ॥ ૪૧॥

શીતે જલાન્તરે શશ્વત્તસ્થૌ સા ભક્તિતત્પરા ।
અનાહારાતપત્તત્ર નીહારેષુ નિશાસુ ચ ॥ ૪૨॥

એવં તપઃ પ્રકુર્વાણા પઞ્ચાક્ષરજપે રતા ।
દધ્યૌ શિવં શિવા તત્ર સર્વકામફલપ્રદમ્ ॥ ૪૩॥

સ્વારોપિતાન્ શુભાન્વૃક્ષાન્સખીભિસ્સિઞ્ચતી મુદા ।
પ્રત્યહં સાવકાશે સા તત્રાતિથ્યમકલ્પયત્ ॥ ૪૪॥

વાતશ્ચૈવ તથા શીતવૃષ્ટિશ્ચ વિવિધા તથા ।
દુસ્સહોઽપિ તથા ઘર્મસ્તયા સેહે સુચિત્તયા ॥ ૪૫॥

દુઃખં ચ વિવિધં તત્ર ગણિતં ન તયાગતમ્ ।
કેવલં મન આધાય શિવે સાસીત્સ્થિતા મુને ॥ ૪૬॥

પ્રથમં ફલભોગેન દ્વિતીયં પર્ણભોજનૈઃ ।
તપઃ પ્રકુર્વતી દેવી ક્રમાન્નિન્યેઽમિતાઃ સમાઃ ॥ ૪૭॥

તતઃ પર્ણાન્યપિ શિવા નિરસ્ય હિમવત્સુતા ।
નિરાહારાભવદ્દેવી તપશ્ચરણસંરતા ॥ ૪૮॥

આહારે ત્યક્તપર્ણાભૂદ્યસ્માદ્ધિમવતઃ સુતા ।
તેન દેવૈરપર્ણેતિ કથિતા નામતઃ શિવા ॥ ૪૯॥

એકપાદસ્થિતા સાસીચ્છિવં સંસ્મૃત્ય પાર્વતી ।
પઞ્ચાક્ષરં જપન્તી ચ મનું તેપે તપો મહત્ ॥ ૫૦॥

ચીરવલ્કલસંવીતા જટાસઙ્ઘાતધારિણી ।

શિવચિન્તનસંસક્તા જિગાય તપસા મુનીન્ ॥ ૫૧॥

એવં તસ્યાસ્તપસ્યન્ત્યા ચિન્તયન્ત્યા મહેશ્વરમ્ ।
ત્રીણિ વર્ષસહસ્રાણિ જગ્મુઃ કાલ્યાસ્તપોવને ॥ ૫૨॥

ષષ્ટિવર્ષસહસ્રાણિ યત્ર તેપે તપો હરઃ ।
તત્ર ક્ષણમથોષિત્વા ચિન્તયામાસ સા શિવા ॥ ૫૩॥

નિયમસ્થાં મહાદેવ કિં માં જાનાસિ નાધુના ।
યેનાહં સુચિરં તેન નાનુયાતા તપોરતા ॥ ૫૪॥

લોકે વેદે ચ ગિરિશો મુનિભિર્ગીયતે સદા ।
શઙ્કરઃ સ હિ સર્વજ્ઞઃ સર્વાત્મા સર્વદર્શનઃ ॥ ૫૫॥

સર્વભૂતિપ્રદો દેવઃ સર્વભાવાનુભાવનઃ ।
ભક્તાભીષ્ટપ્રદો નિત્યં સર્વક્લેશનિવારણઃ ॥ ૫૬॥

સર્વકામાન્પરિત્યજ્ય યદિ ચાહં વૃષધ્વજે ।
અનુરક્તા તદા સોઽત્ર સમ્પ્રસીદતુ શઙ્કરઃ ॥ ૫૭॥

યદિ નારદતન્ત્રોક્તમન્ત્રો જપ્તઃ શરાક્ષરઃ ।
સુભક્ત્યા વિધિના નિત્યં સમ્પ્રસીદતુ શઙ્કરઃ ॥ ૫૮॥

યદિ ભક્ત્યા શિવસ્યાહં નિર્વિકારા યથોદિતમ્ ।
સર્વેશ્વરસ્ય ચાત્યન્તં સમ્પ્રસીદતુ શઙ્કરઃ ॥ ૫૯॥

એવં ચિન્તયતી નિત્યં તેપે સા સુચિરં તપઃ ।
અધોમુખી નિર્વિકારા જટાવલ્કલધારિણી ॥ ૬૦॥

તથા તયા તપસ્તપ્તં મુનીનામપિ દુષ્કરમ્ ।
સ્મૃત્વા ચ પુરુષાસ્તત્ર પરમં વિસ્મયં ગતાઃ ॥ ૬૧॥

તત્તપોદર્શનાર્થં હિ સમાજગ્મુશ્ચ તેઽખિલાઃ ।
ધન્યાન્નિજાન્મન્યમાના જગદુશ્ચેતિ સમ્મતાઃ ॥ ૬૨॥

મહતાં ધર્મવૃદ્ધેષુ ગમનં શ્રેય ઉચ્યતે ।
પ્રમાણં તપસો નાસ્તિ માન્યો ધર્મઃસદા બુધૈઃ ॥ ૬૩॥

શ્રુત્વા દૃષ્ટ્વા તપોઽસ્યાસ્તુ કિમન્યૈઃ ક્રિયતે તપઃ ।
અસ્માત્તપોઽધિકં લોકે ન ભૂતં ન ભવિષ્યતિ ॥ ૬૪॥

જલ્પન્ત ઇતિ તે સર્વે સુપ્રશસ્ય શિવાતપઃ ।
જગ્મુઃ સ્વં ધામ મુદિતાઃ કઠિનાઙ્ગાશ્ચ યે હ્યપિ ॥ ૬૫॥

અન્યચ્છૃણુ મહર્ષે ત્વં પ્રભાવં તપસોઽધુના ।
પાર્વત્યા જગદમ્બાયાઃ પરાશ્ચર્યકરં મહત્ ॥ ૬૬॥

તદાશ્રમગતા યે ચ સ્વભાવેન વિરોધિનઃ ।
તેઽપ્યાસઁસ્તત્પ્રભાવેણ વિરોધરહિતાસ્તદા ॥ ૬૭॥

સિંહા ગાવશ્ચ સતતં રાગાદિદોષસંયુતાઃ ।
તન્મહિમ્ના ચ તે તત્ર નાબાધન્ત પરસ્પરમ્ ॥ ૬૮॥

અથાન્યે ચ મુનિશ્રેષ્ઠ માર્જારા મૂષકાદયઃ ।
નિસર્ગાદ્વૈરિણો યત્ર વિક્રિયન્તે સ્મ ન ક્વચિત્ ॥ ૬૯॥

વૃક્ષાશ્ચ સફલાસ્તત્ર તૃણાનિ વિવિધાનિ ચ ।
પુષ્પાણિ ચ વિચિત્રાણિ તત્રાસન્મુનિસત્તમ ॥ ૭૦॥

તદ્વનં ચ તદા સર્વં કૈલાસેનોપમાન્વિતમ્ ।
જાતં ચ તપસસ્તસ્યાઃ સિદ્ધિરૂપમભૂત્તદા ॥ ૭૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીતપોવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૩. ત્રયોવિંશોઽધ્યાયઃ । શિવેન પાર્વતીસાન્ત્વનમ્ ।

બ્રહ્મોવાચ ।
એવં તપત્યાં પાર્વત્યાં શિવપ્રાપ્તૌ મુનીશ્વર ।
ચિરકાલો વ્યતીયાય પ્રાદુર્ભૂતો હરો ન હિ ॥ ૧॥

હિમાલયસ્તદાગત્ય પાર્વતીં કૃતનિશ્ચયામ્ ।
સભાર્યઃ સસુતામાત્ય ઉવાચ પરમેશ્વરીમ્ ॥ ૨॥

હિમાલય ઉવાચ ।

મા ખિદ્યતાં મહાભાગે તપસાનેન પાર્વતી ।
રુદ્રો ન દૃશ્યતે બાલે વિરક્તો નાત્ર સંશયઃ ॥ ૩॥

ત્વં તન્વી સુકુમારાઙ્ગી તપસા ચ વિમોહિતા ।
ભવિષ્યસિ ન સન્દેહઃ સત્યં સત્યં વદામિ તે ॥ ૪॥

તસ્માદુત્તિષ્ઠ ચૈહિ ત્વં સ્વગૃહં વરવર્ણિનિ ।
કિં તેન તવ રુદ્રેણ યેન દગ્ધઃ પુરા સ્મરઃ ॥ ૫॥

અતો હિ નિર્વિકારત્વાત્ત્વામાદાતું વરાં હરઃ ।
નાગમિષ્યતિ દેવેશિ તં કથં પ્રાર્થયિષ્યસિ ॥ ૬॥

ગગનસ્થો યથા ચન્દ્રો ગ્રહીતું ન હિ શક્યતે ।
તથૈવ દુર્ગમં શમ્ભું જાનીહિ ત્વમિહાનઘે ॥ ૭॥

બ્રહ્મોવાચ ।
તથૈવ મેનયા ચોક્તા તથા સહ્યાદ્રિણા સતી ।
મેરુણા મન્દરેણૈવ મૈનાકેન તથૈવ સા ॥ ૮॥

એવમન્યૈઃ ક્ષિતિધ્રૈશ્ચ ક્રૌઞ્ચાદિભિરનાતુરા ।
તથૈવ ગિરિજા પ્રોક્તા નાનાવાદવિધાયિભિઃ ॥ ૯॥

એવં પ્રોક્તા યદા તન્વી સા સર્વૈઃ તપસિ સ્થિતા ।
ઉવાચ પ્રહસન્ત્યેવ હિમવન્તં શુચિસ્મિતા ॥ ૧૦॥

પાર્વત્યુવાચ ।
પુરા પ્રોક્તં મયા તાત માતઃ કિં વિસ્મૃતં ત્વયા ।
અધુનાપિ પ્રતિજ્ઞાં ચ શ઼ૃણુધ્વં મમ બાન્ધવાઃ ॥ ૧૧॥

વિરક્તોઽસૌ મહાદેવો યેન દગ્ધો રુષા સ્મરઃ ।
તં તોષયામિ તપસા શઙ્કરં ભક્તવત્સલમ્ ॥ ૧૨॥

સર્વે ભવન્તો ગચ્છન્તુ સ્વં સ્વં ધામ પ્રહર્ષિતાઃ ।
ભવિષ્યત્યેવ તુષ્ટોઽસૌ નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

દગ્ધો હિ મદનો યેન યેન દગ્ધં ગિરેર્વનમ્ ।
તમાનયિષ્યે ચાત્રૈવ તપસા કેવલેન હિ ॥ ૧૪॥

તપોબલેન મહતા સુસેવ્યો હિ સદાશિવઃ ।
જાનીધ્વં હિ મહાભાગાઃ સત્યં સત્યં વદામિ વઃ ॥ ૧૫॥

આભાષ્ય ચૈવં ગિરિજા ચ મેનકાં
મૈનાકબન્ધું પિતરં હિમાલયમ્ ।
તૂષ્ણીં બભૂવાશુ સુભાષિણી શિવા
સમન્દરં પર્વતરાજબાલિકા ॥ ૧૬॥

જગ્મુસ્તથોક્તાઃ શિવયા હિ પર્વતા
યથાગતેનાપિ વિચક્ષણાસ્તે ।
પ્રશંસમાના ગિરિજાં મુહુર્મુહુઃ
સુવિસ્મિતા હેમનગેશ્વરાદ્યાઃ ॥ ૧૭॥

ગતેષુ તેષુ સર્વેષુ સખીભિઃ પરિવારિતા ।
તપસ્તેપે તદધિકં પરમાર્થસુનિશ્ચયા ॥ ૧૮॥

તપસા મહતા તેન તપ્તમાસીચ્ચરાચરમ્ ।
ત્રૈલોક્યં હિ મુનિશ્રેષ્ઠ સદેવાસુરમાનુષમ્ ॥ ૧૯॥

તદા સુરાસુરાઃ સર્વે યક્ષકિન્નરચારણાઃ ।
સિદ્ધાઃસાધ્યાશ્ચ મુનયો વિદ્યાધરમહોરગાઃ ॥ ૨૦॥

સપ્રજાપતયશ્ચૈવ ગુહ્યકાશ્ચ તથાપરે ।
કષ્ટાત્ કષ્ટતરં પ્રાપ્તાઃ કારણં ન વિદુઃ સ્મ તત્ ॥ ૨૧॥

સર્વે મિલિત્વા શક્રાદ્યા ગુરુમામન્ત્ર્ય વિહ્વલાઃ ।
સુમેરૌ તપ્તસર્વાઙ્ગા વિધિં માં શરણં યયુઃ ॥ ૨૨॥

તત્ર ગત્વા પ્રણમ્યાશુ વિહ્વલા નષ્ટસુત્વિષઃ ।
ઊચુઃસર્વે ચ સંસ્તૂય હ્યૈકપદ્યેન માં હિ તે ॥ ૨૩॥

દેવા ઊચુઃ ।
ત્વયા સૃષ્ટમિદં સર્વં જગદેતચ્ચરાચરમ્ ।
સન્તપ્તમતિ કસ્માદ્ધૈ ન જ્ઞાતં કારણં વિભો ॥ ૨૪॥

તદ્ બ્રૂહિ કારણં બ્રહ્મન્ જ્ઞાતુમર્હસિ નઃ પ્રભો ।
દગ્ધીભૂતતનૂન્દેવાન્ ત્વત્તો નાન્યોઽસ્તિ રક્ષકઃ ॥ ૨૫॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષામહં સ્મૃત્વા શિવં હૃદા ।
વિચાર્ય મનસા સર્વં ગિરિજાયાસ્તપઃ ફલમ્ ॥ ૨૬॥

દગ્ધં વિશ્વમિતિ જ્ઞાત્વા તૈઃ સર્વૈરિહ સાદરાત્ ।
હરયે તત્કથયિતું ક્ષીરાબ્ધિમગમં દ્રુતમ્ ॥ ૨૭॥

તત્ર ગત્વા હરિં દૃષ્ટ્વા વિલસન્તં સુખાસને ।
સુપ્રણમ્ય સુસંસ્તૂય પ્રાવોચં સાઞ્જલિઃ સુરૈઃ ॥ ૨૮॥

ત્રાહિ ત્રાહિ મહાવિષ્ણો તપ્તાન્નઃ શરણાગતાન્ ।
તપસોગ્રેણ પાર્વત્યાસ્તપન્ત્યાઃ પરમેણ હિ ॥ ૨૯॥

ઇત્યાકર્ણ્ય વચસ્તેષામસ્મદાદિદિવૌકસામ્ ।
શેષાસને સમાવિષ્ટોઽસ્માનુવાચ રમેશ્વરઃ ॥ ૩૦॥

વિષ્ણુરુવાચ ।
જ્ઞાતં સર્વં નિદાનં મે પાર્વતીતપસોઽદ્ય વૈ ।
યુષ્માભિઃ સહિતસ્ત્વદ્ય વ્રજામિ પરમેશ્વરમ્ ॥ ૩૧॥

મહાદેવં પ્રાર્થયામો ગિરિજાપ્રાપણાય તમ્ ।
પાણિગ્રહાર્થમધુના લોકાનાં સ્વસ્તયેઽમરાઃ ॥ ૩૨॥

વરં દાતું શિવાયૈ હિ દેવદેવઃ પિનાકધૃક્ ।
યથા ચેષ્યતિ તત્રૈવ કરિષ્યામોઽધુના હિ તત્ ॥ ૩૩॥

તસ્માદ્ વયં ગમિષ્યામો યત્ર રુદ્રો મહાપ્રભુઃ ।
તપસોગ્રેણ સંયુક્તોઽદ્યાસ્તે પરમમઙ્ગલઃ ॥ ૩૪॥

બ્રહ્મોવાચ ।
વિષ્ણોસ્તદ્વચનં શ્રુત્વા સર્વ ઊચુઃ સુરાદયઃ ।
મહાભીતા હઠાત્ ક્રુદ્ધાદ્દગ્ધુકામાત્ લયઙ્કરાત્ ॥ ૩૫॥

દેવા ઊચુઃ ।
મહાભયઙ્કરં ક્રુદ્ધં કાલાનલસમપ્રભમ્ ।
ન યાસ્યામો વયં સર્વે વિરૂપાક્ષં મહાપ્રભુમ્ ॥ ૩૬॥

યથા દગ્ધઃ પુરા તેન મદનો દુરતિક્રમઃ ।
તથૈવ ક્રોધયુક્તો નઃ સ ધક્ષ્યતિ ન સંશયઃ ॥ ૩૭॥

બ્રહ્મોવાચ
તદાકર્ણ્ય વચસ્તેષાં શક્રાદીનાં રમેશ્વરઃ ।
સાન્ત્વયંસ્તાન્સુરાન્સર્વાન્પ્રોવાચ સ હરિર્મુને ॥ ૩૮॥

હરિરુવાચ ।
હે સુરા મદ્વચઃ પ્રીત્યા શૃણુતાદરતોઽખિલાઃ ।
ન વો ધક્ષ્યતિ સ સ્વામી દેવાનાં ભયનાશનઃ ॥ ૩૯॥

તસ્માદ્ભવદ્ભિર્ગન્તવ્યં મયા સાર્ધં વિચક્ષણૈઃ ।
શમ્ભું શુભકરં મત્વા શરણં તસ્ય સુપ્રભોઃ ॥ ૪૦॥

શિવં પુરાણં પુરુષં હ્યધીશં
વરેણ્યરૂપં હિ પરં પુરાણમ્ ।
તપો જુષાણં પરમાત્મરૂપં
પરાત્પરં તં શરણં વ્રજામઃ ॥ ૪૧॥

બ્રહ્મોવાચ ।
એવમુક્તાસ્તદા દેવા વિષ્ણુના પ્રભવિષ્ણુના ।
જગ્મુઃ સર્વે તેન સહ દ્રષ્ટુકામાઃ પિનાકિનમ્ ॥ ૪૨॥

પ્રથમં શૈલપુત્ર્યાસ્તત્તપો દ્રષ્ટું તદાશ્રમમ્ ।
જગ્મુર્માર્ગવશાત્સર્વે વિષ્ણ્વાદ્યાઃ સકુતૂહલાઃ ॥ ૪૩॥

પાર્વત્યાઃ સુતપો દૃષ્ટ્વા તેજસા વ્યાપૃતાસ્તદા ।
પ્રણેમુસ્તાં જગદ્ધાત્રીં તેજોરૂપાં તપઃસ્થિતામ્ ॥ ૪૪॥

પ્રશંસન્તસ્તપસ્તસ્યાઃ સાક્ષાત્સિદ્ધિતનોઃ સુરાઃ ।
જગ્મુસ્તત્ર તદા તે ચ યત્રાસ્તે વૃષભધ્વજઃ ॥ ૪૫॥

તત્ર ગત્વા ચ તે દેવાસ્ત્વાં મુને પ્રૈષયંસ્તદા ।
પશ્યન્તો દૂરતસ્તસ્થુઃ કામભસ્મકૃતો હરાત્ ॥ ૪૬॥

નારદ ત્વં શિવસ્થાનં તદા ગત્વાભયઃ સદા ।
શિવભક્તો વિશેષેણ પ્રસન્નં દૃષ્ટવાન્ પ્રભુમ્ ॥ ૪૭॥

પુનરાગત્ય યત્નેન દેવાનાહૂય તાંસ્તતઃ ।
નિનાય શઙ્કરસ્થાનં તદા વિષ્ણ્વાદિકાન્મુને ॥ ૪૮॥

અથ વિષ્ણ્વાદયઃ સર્વે તત્ર ગત્વા શિવં પ્રભુમ્ ।
દદૃશુઃ સુખમાસીનં પ્રસન્નં ભક્તવત્સલમ્ ॥ ૪૯॥

યોગપટ્ટસ્થિતં શમ્ભું ગણૈશ્ચ પરિવારિતમ્ ।
તપોરૂપં દધાનં ચ પરમેશ્વરરૂપિણમ્ ॥ ૫૦॥

તતો વિષ્ણુર્મયાન્યે ચ સુરસિદ્ધમુનીશ્વરાઃ ।
પ્રણમ્ય તુષ્ટુવુઃ સૂક્તૈર્વેદોપનિષદન્વિતૈઃ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીસાન્ત્વનશિવદેવદર્શનવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૪. ચતુર્વિંશોઽધ્યાયઃ । શિવકૃતા પાર્વતીવિવાહસ્વીકૃતિઃ ।

દેવા ઊચુઃ ।
નમો રુદ્રાય દેવાય મદનાન્તકરાય ચ ॥

સ્તુત્યાય ભૂરિભાસાય ત્રિનેત્રાય નમો નમઃ ॥ ૧॥

શિપિવિષ્ટાય ભીમાય ભીમાક્ષાય નમોનમઃ ।
મહાદેવાય પ્રભવે ત્રિવિષ્ટપતયે નમઃ ॥ ૨॥

ત્વં નાથઃ સર્વલોકાનાં પિતા માતા ત્વમીશ્વરઃ ।
શમ્ભુરીશઃ શઙ્કરોઽસિ દયાલુસ્ત્વં વિશેષતઃ ॥ ૩॥

ત્વં ધાતા સર્વજગતાં ત્રાતુમર્હસિ નઃ પ્રભો ।
ત્વાં વિના કઃ સમર્થોઽસ્તિ દુઃખનાશે મહેશ્વર ॥ ૪॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં સુરાણાં નન્દિકેશ્વરઃ ।
કૃપયા પરયા યુક્તો વિજ્ઞપ્તું શમ્ભુમારભત્ ॥ ૫॥

નન્દિકેશ્વર ઉવાચ ।
વિષ્ણ્વાદયઃ સુરગણા મુનિસિદ્ધસઙ્ઘા-
સ્ત્વાં દ્રષ્ટુમેવ સુરવર્ય વિશેષયન્તિ ।
કાર્યાર્થિનોઽસુરવરૈઃ પરિભર્ત્સ્યમાનાઃ
સમ્યક્ પરાભવપદં પરમં પ્રપન્નાઃ ॥ ૬॥

તસ્માત્ત્વયા હિ સર્વેશ ત્રાતવ્યા મુનયઃ સુરાઃ ।

દીનબન્ધુર્વિશેષેણ ત્વમુક્તો ભક્તવત્સલઃ ॥ ૭॥

બ્રહ્મોવાચ ।
એવં દયાવતા શમ્ભુર્વિજ્ઞપ્તો નન્દિના ભૃશમ્ ।
શનૈઃ શનૈરુપરમદ્ધ્યાનાદુન્મીલ્ય ચાક્ષિણી ॥ ૮॥

ઈશોઽથોપરતઃ શમ્ભુસ્તદા પરમકોવિદઃ ।
સમાધેઃ પરમાત્માસૌ સુરાન્સર્વાનુવાચ હ ॥ ૯॥

શમ્ભુરુવાચ ।
કસ્માદ્યૂયં સમાયાતા મત્સમીપં સુરેશ્વરાઃ ।
હરિબ્રહ્માદયઃ સર્વે બ્રૂત કારણમાશુ તત્ ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચઃ શમ્ભોઃ સર્વે દેવા મુદાન્વિતાઃ ।
વિષ્ણોર્વિલોકયામાસુર્મુખં વિજ્ઞપ્તિહેતવે ॥ ૧૧॥

અથ વિષ્ણુર્મહાભક્તો દેવાનાં હિતકારકઃ ।
મદીરિતમુવાચેદં સુરકાર્યં મહત્તમમ્ ॥ ૧૨॥

તારકેણ કૃતં શમ્ભો દેવાનાં પરમાદ્ભુતમ્ ।
કષ્ટાત્કષ્ટતરં દેવા વિજ્ઞપ્તું સર્વ આગતાઃ ॥ ૧૩॥

હે શમ્ભો તવ પુત્રેણૌરસેન હિ ભવિષ્યતિ ।
નિહતસ્તારકો દૈત્યો નાન્યથા મમ ભાષિતમ્ ॥ ૧૪॥

વિચાર્યેત્થં મહાદેવ કૃપાં કુરુ નમોઽસ્તુ તે ।
દેવાન્સમુદ્ધર સ્વામિન્ કષ્ટાત્તારકનિર્મિતાત્ ॥ ૧૫॥

તસ્માત્ત્વયા ગિરિજા દેવ શમ્ભો
ગ્રહીતવ્યા પાણિના દક્ષિણેન ।
પાણિગ્રહેણૈવ મહાનુભાવાં
દત્તાં ગિરીન્દ્રેણ ચ તાં કુરુષ્વ ॥ ૧૬॥

વિષ્ણોસ્તદ્વચનં શ્રુત્વા પ્રસન્નો હ્યબ્રવીચ્છિવઃ ।
દર્શયન્ સદ્ગતિં તેષાં સર્વેષાં યોગતત્પરઃ ॥ ૧૭॥

શિવ ઉવાચ ।
યદા મે સ્વીકૃતા દેવી ગિરિજા સર્વસુન્દરી ।

તદા સર્વે સુરેન્દ્રાશ્ચ મુનયો ઋષયસ્તદા ॥ ૧૮॥

સકામાશ્ચ ભવિષ્યન્તિ ન ક્ષમાશ્ચ પરે પથિ ।
જીવયિષ્યતિ દુર્ગા સા પાણિગ્રહણતઃ સ્મરમ્ ॥ ૧૯॥

મદનો હિ મયા દગ્ધઃ સર્વેષાં કાર્યસિદ્ધયે ।
બ્રહ્મણો વચનાદ્વિષ્ણો નાત્ર કાર્યા વિચારણા ॥ ૨૦॥

એવં વિમૃશ્ય મનસા કાર્યાકાર્યવ્યવસ્થિતૌ ।
સુધીઃ સર્વૈશ્ચ દેવેન્દ્ર હઠં નો કર્તુમર્હસિ ॥ ૨૧॥

દગ્ધે કામે મયા વિષ્ણો સુરકાર્યં મહત્ કૃતમ્ ।
સર્વે તિષ્ઠન્તુ નિષ્કામા મયા સહ સુનિશ્ચિતમ્ ॥ ૨૨॥

યથાહં ચ સુરાઃ સર્વે તથા યૂયમયત્નતઃ ।
તપઃ પરમસંયુક્તાઃ કરિષ્યધ્વં સુદુષ્કરમ્ ॥ ૨૩॥

યૂયં સમાધિના તેન મદનેન વિના સુરાઃ ।
પરમાનન્દસંયુક્તા નિર્વિકારા ભવન્તુ વૈ ॥ ૨૪॥

પુરાવૃત્તં સ્મરકૃતં વિસ્મૃતં યદ્ વિધે હરે ।
મહેન્દ્ર મુનયો દેવા યત્તત્સર્વં વિમૃશ્યતામ્ ॥ ૨૫॥

મહાધનુર્ધરેણૈવ મદનેન હઠાત્સુરાઃ ।
સર્વેષાં ધ્યાનવિધ્વંસઃ કૃતસ્તેન પુરામરાઃ ॥ ૨૬॥

કામો હિ નરકાયૈવ તસ્માત્ ક્રોધોઽભિજાયતે ।
ક્રોધાદ્ભવતિ સમ્મોહો મોહાચ્ચ ભ્રંશતે તપઃ ॥ ૨૭॥

કામક્રોધૌ પરિત્યાજ્યૌ ભવદ્ભિઃ સુરસત્તમૈઃ ।
સર્વૈરેવ ચ મન્તવ્યં મદ્વાક્યં નાન્યથા ક્વચિત્ ॥ ૨૮॥

બ્રહ્મોવાચ ।
એવં વિશ્રાવ્ય ભગવાન્ મહાદેવો વૃષધ્વજઃ ।
સુરાન્ પ્રવાચયામાસ વિધિવિષ્ણૂ તથા મુનીન્ ॥ ૨૯॥

તૂષ્ણીમ્ભૂતોઽભવચ્છમ્ભુર્ધ્યાનમાશ્રિત્ય વૈ પુનઃ ।
આસ્તે પુરા યથા સ્થાણુર્ગણૈશ્ચ પરિવારિતઃ ॥ ૩૦॥

સ્વાત્માનમાત્મના શમ્ભુરાત્મન્યેવ વ્યચિન્તયત્ ।
નિરઞ્જનં નિરાભાસં નિર્વિકારં નિરામયમ્ ॥ ૩૧॥

પરાત્પરતરં નિત્યં નિર્મમં નિરવગ્રહમ્ ।
શબ્દાતીતં નિર્ગુણં ચ જ્ઞાનગમ્યં પરાત્પરમ્ ॥ ૩૨॥

એવં સ્વરૂપં પરમં ચિન્તયન્ ધ્યાનમાસ્થિતઃ ।
પરમાનન્દસમ્મગ્નો બભૂવ બહુસૂતિકૃત્ ॥ ૩૩॥

ધ્યાનસ્થિતં ચ સર્વેશં દૃષ્ટ્વા સર્વે દિવૌકસઃ ।
હરિશક્રાદયઃ સર્વે નન્દિનં પ્રોચુરાનતાઃ ॥ ૩૪॥

દેવા ઊચુઃ ।
કિં વયં કરવામાદ્ય વિરક્તો ધ્યાનમાસ્થિતઃ ।
શમ્ભુસ્ત્વં શઙ્કરસખઃ સર્વજ્ઞઃ શુચિસેવકઃ ॥ ૩૫॥

કેનોપાયેન ગિરિશઃ પ્રસન્નઃ સ્યાદ્ગણાધિપ ।
તદુપાયં સમાચક્ષ્વ વયં ત્વચ્છરણં ગતાઃ ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇતિ વિજ્ઞાપિતો દેવૈર્મુને હર્યાદિભિસ્તદા ।
પ્રત્યુવાચ સુરાંસ્તાન્સ નન્દી શમ્ભુપ્રિયો ગણઃ ॥ ૩૭॥

નન્દીશ્વર ઉવાચ ।
હે હરે હે વિધે શક્ર નિર્જરા મુનયસ્તથા ।
શૃણુધ્વં વચનં મે હિ શિવસન્તોષકારકમ્ ॥ ૩૮॥

યદિ વો હઠ એવાદ્ય શિવદારપરિગ્રહે ।
અતિદીનતયા સર્વે સુનુતિં કુરુતાદરાત્ ॥ ૩૯॥

ભક્તેર્વશ્યો મહાદેવો ન સાધારણતઃ સુરાઃ ।
અકાર્યમપિ સદ્ભક્ત્યા કરોતિ પરમેશ્વરઃ ॥ ૪૦॥

એવં કુરુત સર્વે હિ વિધિવિષ્ણુમુખાઃ સુરાઃ ।
યથાગતેન માર્ગેણાન્યથા ગચ્છત મા ચિરમ્ ॥ ૪૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય મુને વિષ્ણ્વાદયઃ સુરાઃ ।
તથેતિ મત્ત્વા સુપ્રીત્યા શઙ્કરં તુષ્ટુવુર્હિ તે ॥ ૪૨॥

દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।

સમુદ્ધર મહાક્લેશાત્ ત્રાહિ નઃ શરણાગતાન્ ॥ ૪૩॥

બ્રહ્મોવાચ ।
ઇત્યેવં બહુદીનોક્ત્યા તુષ્ટુવુઃ શઙ્કરં સુરાઃ ।
રુરુદુઃ સુસ્વરં સર્વે પ્રેમવ્યાકુલમાનસાઃ ॥ ૪૪॥

હરિર્મયા સુદીનોક્ત્યા સુવિજ્ઞપ્તં ચકાર હ ।
સંસ્મરન્મનસા શમ્ભું ભક્ત્યા પરમયાન્વિતઃ ॥ ૪૫॥

સુરૈરેવં સ્તુતઃ શમ્ભુર્હરિણા ચ મયા ભૃશમ્ ।
ભક્તવાત્સલ્યતો ધ્યાનાદ્વિરતોઽભૂન્મહેશ્વરઃ ॥ ૪૬॥

ઉવાચ સુપ્રસન્નાત્મા હર્યાદીન્હર્ષયન્હરઃ ।
વિલોક્ય કરુણાદૃષ્ટ્યા શઙ્કરો ભક્તવત્સલઃ ॥ ૪૭॥

શઙ્કર ઉવાચ ।
હે હરે હે વિધે દેવાઃ શક્રાદ્યા યુગપત્સમે ।
કિમર્થમાગતા યૂયં સત્યં બ્રૂત મમાગ્રતઃ ॥ ૪૮॥

હરિરુવાચ ।
સર્વજ્ઞસ્ત્વં મહેશાન ત્વન્તર્યામ્યખિલેશ્વરઃ ।
કિં ન જાનાસિ ચિત્તસ્થં તથા વચ્મ્યપિ શાસનાત્ ॥ ૪૯॥

તારકાસુરતો દુઃખં સમ્ભૂતં વિવિધં મૃડ ।
સર્વેષાં નસ્તદર્થં હિ પ્રસન્નોઽકારિ વૈ સુરૈઃ ॥ ૫૦॥

શિવા સા જનિતા શૈલાત્ત્વદર્થં હિ હિમાલયાત્ ।
તસ્યાં ત્વદુદ્ભવાત્પુત્રાત્તસ્ય મૃત્યુર્ન ચાન્યથા ॥ ૫૧॥

ઇતિ દત્તો બ્રહ્મણા હિ તસ્મૈ દૈત્યાય યદ્વરઃ ।
તદન્યસ્માદમૃત્યુઃ સ બાધતે નિખિલં જગત્ ॥ ૫૨॥

નારદસ્ય નિદેશાત્સા કરોતિ કઠિનં તપઃ ।
તત્તેજસાખિલં વ્યાપ્તં ત્રૈલોક્યં સચરાચરમ્ ॥ ૫૩॥

વરં દાતું શિવાયૈ હિ ગચ્છ ત્વં પરમેશ્વર ।
દેવદુઃખં જહિ સ્વામિન્નસ્માકં સુખમાવહ ॥ ૫૪॥

દેવાનાં મે મહોત્સાહો હૃદયે ચાસ્તિ શઙ્કર ।
વિવાહં તવ સન્દ્રષ્ટું તત્ત્વં કુરુ યથોચિતમ્ ॥ ૫૫॥

રત્યૈ યદ્ભવતા દત્તો વરસ્તસ્ય પરાત્પર ।
પ્રાપ્તોઽવસર એવાશુ સફલં સ્વપણં કુરુ ॥ ૫૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા તં પ્રણમ્યૈવ વિષ્ણુર્દેવા મહર્ષયઃ ।
સંસ્તૂય વિવિધૈઃ સ્તોત્રૈઃ સન્તસ્થુસ્તત્પુરોઽખિલાઃ ॥ ૫૭॥

ભક્તાધીનઃ શઙ્કરોઽપિ શ્રુત્વા દેવવચસ્તદા ।
વિહસ્ય પ્રત્યુવાચાશુ વેદમર્યાદરક્ષકઃ ॥ ૫૮॥

શઙ્કર ઉવાચ ।
હે હરે હે વિધે દેવાઃ શૃણુતાદરતોઽખિલાઃ ।
યથોચિતમહં વચ્મિ સવિશેષં વિવેકતઃ ॥ ૫૯॥

નોચિતં હિ વિધાનં વૈ વિવાહકરણં નૃણામ્ ।
મહાનિગડસંજ્ઞો હિ વિવાહો દૃઢબન્ધનઃ ॥ ૬૦॥

કુસઙ્ગા બહવો લોકે સ્ત્રીસઙ્ગસ્તત્ર ચાધિકઃ ।
ઉદ્ધરેત્સકલૈર્બન્ધૈર્ન સ્ત્રીસઙ્ગાત્પ્રમુચ્યતે ॥ ૬૧॥

લોહદારુમયૈઃ પાશૈર્દૃઢં બદ્ધોઽપિ મુચ્યતે ।
સ્ત્ર્યાદિપાશસુસમ્બદ્ધો મુચ્યતે ન કદાચન ॥ ૬૨॥

વર્ધન્તે વિષયાઃ શશ્વન્મહાબન્ધનકારિણઃ ।
વિષયાક્રાન્તમનસઃ સ્વપ્ને મોક્ષોઽપિ દુર્લભઃ ॥ ૬૩॥

સુખમિચ્છતિ ચેત્પ્રાજ્ઞો વિધિવદ્વિષયાંસ્ત્યજેત્ ।
વિષવદ્વિષયાનાહુર્વિષયૈર્યૈર્નિહન્યતે ॥ ૬૪॥

જનો વિષયિણા સાકં વાર્તાતઃ પતતિ ક્ષણાત્ ।
વિષયં પ્રાહુરાચાર્યાઃ સિતાલિપ્તેન્દ્રવારુણીમ્ ॥ ૬૫॥

યદ્યપ્યેવં હિ જાનામિ સર્વં જ્ઞાનં વિશેષતઃ ।
તથાપ્યહં કરિષ્યામિ પ્રાર્થનાં સફલાં ચ વઃ ॥ ૬૬॥

ભક્તાધીનોઽહમેવાસ્મિ તદ્વશાત્સર્વકાર્યકૃત્ ।
અયથોચિતકર્તા હિ પ્રસિદ્ધો ભુવનત્રયે ॥ ૬૭॥

કામરૂપાધિપસ્યૈવ પણશ્ચ સફલઃ કૃતઃ ।
સુદક્ષિણસ્ય ભૂપસ્ય ભવબન્ધગતસ્ય હિ ॥ ૬૮॥

ગૌતમક્લેશકર્તાહં ત્ર્યમ્બકાત્મા સુખાવહઃ ।
તત્કષ્ટપ્રદદુષ્ટાનાં શાપદાયી વિશેષતઃ ॥ ૬૯॥

વિષં પીતં સુરાર્થં હિ ભક્તવત્સલભાવધૃક્ ।
દેવકષ્ટં હૃતં યત્નાત્સર્વદૈવ મયા સુરાઃ ॥ ૭૦॥

ભક્તાર્થમસહં કષ્ટં બહુશો બહુયત્નતઃ ।
વિશ્વાનરમુનેર્દુઃખં હૃતં ગૃહપતિર્ભવન્ ॥ ૭૧॥

કિં બહૂક્તેન ચ હરે વિધે સત્યં બ્રવીમ્યહમ્ ।
મત્પણોઽસ્તીતિ યૂયં વૈ સર્વે જાનીથ તત્ત્વતઃ ॥ ૭૨॥

યદા યદા વિપત્તિર્હિ ભક્તાનાં ભવતિ ક્વચિત્ ।
તદા તદા હરામ્યાશુ તત્ક્ષણાત્સર્વશઃસદા ॥ ૭૩॥

જાનેઽહં તારકાદ્દુઃખં સર્વેષાં વઃ સમુત્થિતમ્ ।
અસુરાત્તદ્ધરિષ્યામિ સત્યં સત્યં વદામ્યહમ્ ॥ ૭૪॥

નાસ્તિ યદ્યપિ મે કાચિદ્વિવાહકરણે રુચિઃ ।
વિવાહયિષ્યે ગિરિજાં પુત્રોત્પાદનહેતવે ॥ ૭૫॥

ગચ્છત સ્વગૃહાણ્યેવ નિર્ભયાઃ સકલાઃ સુરાઃ ।
કાર્યં વઃ સાધયિષ્યામિ નાત્ર કાર્યા વિચારણા ॥ ૭૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા મૌનમાસ્થાય સમાધિસ્થોઽભવદ્ધરઃ ।
સર્વે વિષ્ણ્વાદયો દેવાઃ સ્વધામાનિ યયુર્મુને ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીવિવાહસ્વીકારો નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨.૩.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । સપ્તર્ષિકૃતા પાર્વતીપરીક્ષા ।

નારદ ઉવાચ ।

ગતેષુ તેષુ દેવેષુ વિધિવિષ્ણ્વાદિકેષુ ચ ।
સર્વેષુ મુનિષુ પ્રીત્યા કિં બભૂવ તતઃ પરમ્ ॥ ૧॥

કિં કૃતં શમ્ભુના તાત વરં દાતું સમાગતઃ ।
કિયત્કાલેન ચ કથં તદ્વદ પ્રીતિમાવહ ॥ ૨॥

બ્રહ્મોવાચ ।
ગતેષુ તેષુ દેવેષુ બ્રહ્માદિષુ નિજાશ્રમમ્ ।
તત્તપઃ સુપરીક્ષાર્થં સમાધિસ્થોઽભવદ્ભવઃ ॥ ૩॥

સ્વાત્માનમાત્મના કૃત્વા સ્વાત્મન્યેવ વ્યચિન્તયત્ ।
પરાત્પરતરં સ્વસ્થં નિર્માયં નિરવગ્રહમ્ ॥ ૪॥

તદ્વસ્તુભૂતો ભગવાનીશ્વરો વૃષભધ્વજઃ ।
અવિજ્ઞાતગતિઃસૂતિઃસ હરઃ પરમેશ્વરઃ ॥ ૫॥

બ્રહ્મોવાચ ।
ગિરિજા હિ તદા તાત તતાપ પરમં તપઃ ।
તપસા તેન રુદ્રોઽપિ પરં વિસ્મયમાગતઃ ॥ ૬॥

સમાધેશ્ચલિતસ્સોઽભૂદ્ભક્તાધીનોઽપિ નાન્યથા ।
વસિષ્ઠાદીન્મુનીન્સપ્ત સસ્માર સૂતિકૃદ્ધરઃ ॥ ૭॥

સપ્તાપિ મુનયઃ શીઘ્રમાયયુઃ સ્મૃતિમાત્રતઃ ।
પ્રસન્નવદનાઃ સર્વે વર્ણયન્તો વિધિં બહુ ॥ ૮॥

પ્રણમ્ય તં મહેશાનં તુષ્ટુવુર્હર્ષનિર્ભરાઃ ।
વાણ્યા ગદ્ગદયા બદ્ધકરા વિનતકન્ધરાઃ ॥ ૯॥

સપ્તર્ષય ઊચુઃ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
જાતા વયં સુધન્યા હિ ત્વયા યદધુના સ્મૃતાઃ ॥ ૧૦॥

કિમર્થં સંસ્મૃતા નાથ શાસનં દેહિ તદ્ધિ નઃ ।
સ્વદાસસદૃશીં સ્વામિન્કૃપાં કુરુ નમોઽસ્તુ તે ॥ ૧૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય મુનીનાં તુ વિજ્ઞપ્તિં કરુણાનિધિઃ ।
પ્રોવાચ વિહસન્પ્રીત્યા પ્રોત્ફુલ્લનયનામ્બુજઃ ॥ ૧૨॥

મહેશ્વર ઉવાચ ।
હે સપ્તમુનયસ્તાતાઃ શ‍ૃણુતારં વચો મમ ।
અસ્મદ્ધિતકરા યૂયં સર્વજ્ઞાનવિચક્ષણાઃ ॥ ૧૩॥

તપશ્ચરતિ દેવેશી પાર્વતી ગિરિજાધુના ।
ગૌરીશિખરસંજ્ઞે હિ પર્વતે દૃઢમાનસા ॥ ૧૪॥

માં પતિં પ્રાપ્તુકામા હિ સા સખીસેવિતા દ્વિજાઃ ।
સર્વાન્કામાન્વિહાયાન્યાન્પરં નિશ્ચયમાગતા ॥ ૧૫॥

તત્ર ગચ્છત યૂયં મચ્છાસનાન્મુનિસત્તમાઃ ।
પરીક્ષાં દૃઢતાયાસ્તત્કુરુત પ્રેમચેતસઃ ॥ ૧૬॥

સર્વથા છલસંયુક્તં વચનીયં વચશ્ચ વઃ ।
ન સંશયઃ પ્રકર્તવ્યઃ શાસનાન્મમ સુવ્રતાઃ ॥ ૧૭॥

બ્રહ્મોવાચ ।
ઇત્યાજ્ઞપ્તાશ્ચ મુનયો જગ્મુસ્તત્ર દ્રુતં હિ તે ।
યત્ર રાજતિ સા દીપ્તા જગન્માતા નગાત્મજા ॥ ૧૮॥

તત્ર દૃષ્ટ્વા શિવા સાક્ષાત્તપઃસિદ્ધિરિવાપરા ।
મૂર્તા પરમતેજસ્કા વિલસન્તી સુતેજસા ॥ ૧૯॥

હૃદા પ્રણમ્ય તાં તે તુ ઋષયસ્સપ્ત સુવ્રતાઃ ।
સન્નતા વચનં પ્રોચુઃ પૂજિતાશ્ચ વિશેષતઃ ॥ ૨૦॥

ઋષય ઊચુઃ ।
શ‍ૃણુ શૈલસુતે દેવિ કિમર્થં તપ્યતે તપઃ ।
ઇચ્છસિ ત્વં સુરં કં ચ કિં ફલં તદ્વદાધુના ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇત્યુક્તા સા શિવા દેવી ગિરીન્દ્રતનયા દ્વિજૈઃ ।
પ્રત્યુવાચ વચઃ સત્યં સુગૂઢમપિ તત્પુરઃ ॥ ૨૨॥

પાર્વત્યુવાચ ।
મુનીશ્વરાઃસંશ‍ૃણુત મદ્વાક્યં પ્રીતિતો હૃદા ।
બ્રવીમિ સ્વવિચારં વૈ ચિન્તિતો યો ધિયા સ્વયા ॥ ૨૩॥

કરિષ્યથ પ્રહાસં મે શ્રુત્વા વાચો હ્યસમ્ભવાઃ ।

સઙ્કોચો વર્ણનાદ્વિપ્રા ભવત્યેવ કરોમિ કિમ્ ॥ ૨૪॥

ઇદં મનો હિ સુદૃઢમવશં પરકર્મકૃત્ ।
જલોપરિ મહાભિત્તિં ચિકીર્ષતિ મહોન્નતામ્ ॥ ૨૫॥

સુરર્ષેઃ શાસનં પ્રાપ્ય કરોમિ સુદૃઢં તપઃ ।
રુદ્રઃ પતિર્ભવેન્મે હિ વિધાયેતિ મનોરથમ્ ॥ ૨૬॥

અપક્ષો મન્મનઃ પક્ષી વ્યોમ્નિ ઉડ્ડીયતે હઠાત્ ।
તદાશાં શઙ્કરઃ સ્વામી પિપર્ત્તુ કરુણાનિધિઃ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યા વિહસ્ય મુનયશ્ચ તે ।
સમ્માન્ય ગિરિજાં પ્રીત્યા પ્રોચુશ્છલવચો મૃષા ॥ ૨૮॥

ઋષય ઊચુઃ ।
ન જ્ઞાતં તસ્ય ચરિતં વૃથાપણ્ડિતમાનિનઃ ।
દેવર્ષેઃ ક્રૂરમનસઃ સુજ્ઞા ભૂત્વાપ્યગાત્મજે ॥ ૨૯॥

નારદઃ કૂટવાદી ચ પરચિત્તપ્રમન્થકઃ ।
તસ્ય વાર્તાશ્રવણતો હાનિર્ભવતિ સર્વથા ॥ ૩૦॥

તત્ર ત્વં શૃણુ સદ્ બુદ્ધ્યા ચેતિહાસં સુશોભિતમ્ ।
ક્રમાત્ત્વાં બોધયન્તો હિ પ્રીત્યા તમુપધારય ॥ ૩૧॥

બ્રહ્મપુત્રો હિ યો દક્ષઃ સુષુવે પિતુરાજ્ઞયા ।
સ્વપત્ન્યામયુતં પુત્રાનયુઙ્ક્ત તપસિ પ્રિયાન્ ॥ ૩૨॥

તે સુતાઃ પશ્ચિમદિશિ નારાયણસરો ગતાઃ ।
તપોઽર્થે તે પ્રતિજ્ઞાય નારદસ્તત્ર વૈ યયૌ ॥ ૩૩॥

કૂટોપદેશમાશ્રાવ્ય તત્ર તાન્નારદો મુનિઃ ।
તદાજ્ઞયા ચ તે સર્વે પિતુર્ન ગૃહમાયયુઃ ॥ ૩૪॥

તચ્છ્રુત્વા કુપિતો દક્ષઃ પિત્રાશ્વાસિતમાનસઃ ।
ઉત્પાદ્ય પુત્રાન્પ્રાયુઙ્ક્ત સહસ્રપ્રમિતાંસ્તતઃ ॥ ૩૫॥

તેઽપિ તત્ર ગતાઃ પુત્રાઃ તપોઽર્થં પિતુરાજ્ઞયા ।
નારદોઽપિ યયૌ તત્ર પુનસ્તત્સ્વોપદેશકૃત્ ॥ ૩૬॥

દદૌ તદુપદેશં તે તેભ્યો ભ્રાતૃપથં યયુઃ ।

આયયુર્ન પિતુર્ગેહં ભિક્ષુવૃત્તિરતાશ્ચ તે ॥ ૩૭॥

ઇત્થં નારદસદ્વૃત્તિર્વિશ્રુતા શૈલકન્યકે ।
અન્યાં શ‍ૃણુ હિ તદ્વૃત્તિં વૈરાગ્યકરણીં નૃણામ્ ॥ ૩૮॥

વિદ્યાધરશ્ચિત્રકેતુર્યો બભૂવ પુરાકરોત્ ।
સ્વોપદેશમયં દત્ત્વા તસ્મૈ શૂન્યં ચ તદ્ગૃહમ્ ॥ ૩૯॥

પ્રહ્લાદાય સ્વોપદેશાન્હિરણ્યકશિપોઃ પરમ્ ।
દત્ત્વા દુઃખં દદૌ ચાયં પરબુદ્ધિપ્રભેદકઃ ॥ ૪૦॥

મુનિના નિજવિદ્યા યચ્છ્રાવિતા કર્ણરોચના ।
સ સ્વગેહં વિહાયાશુ ભિક્ષાં ચરતિ પ્રાયશઃ ॥ ૪૧॥

નારદો મલિનાત્મા હિ સર્વદોજ્જ્વલદેહવાન્ ।
જાનીમસ્તં વિશેષેણ વયં તત્સહવાસિનઃ ॥ ૪૨॥

બકં સાધું વર્ણયન્તિ ન મત્સ્યાનત્તિ સર્વથા ।
સહવાસી વિજાનીયાચ્ચરિત્રં સહવાસિનામ્ ॥ ૪૩॥

લબ્ધ્વા તદુપદેશં હિ ત્વમપિ પ્રાજ્ઞસમ્મતા ।
વૃથૈવ મૂર્ખીભૂતા ત્વં તપશ્ચરસિ દુષ્કરમ્ ॥ ૪૪॥

યદર્થમીદૃશં બાલે કરોષિ વિપુલં તપઃ ।
સોદાસીનો નિર્વિકારો મદનારિર્ન સંશયઃ ॥ ૪૫॥

અમઙ્ગલવપુર્ધારી નિર્લજ્જોઽસદનોઽકુલી ।
કુવેષી પ્રેતભૂતાદિસઙ્ગી નગ્નો હિ શૂલભૃત્ ॥ ૪૬॥

સ ધૂર્તસ્તવ વિજ્ઞાનં વિનાશ્ય નિજમાયયા ।
મોહયામાસ સદ્યુક્ત્યા કારયામાસ વૈ તપઃ ॥ ૪૭॥

ઈદૃશં હિ વરં લબ્ધ્વા કિં સુખં સમ્ભવિષ્યતિ ।
વિચારં કુરુ દેવેશિ ત્વમેવ ગિરિજાત્મજે ॥ ૪૬॥

પ્રથમં દક્ષજાં સાધ્વીં વિવાહ્ય સુધિયા સતીમ્ ।
નિર્વાહં કૃતવાન્નૈવ મૂઢઃ કિઞ્ચિદ્દિનાનિ હિ ॥ ૪૯॥

તાં તથૈવ સ વૈ દોષં દત્ત્વાત્યાક્ષીત્ સ્વયં પ્રભુઃ ।
ધ્યાયન્સ્વરૂપમકલમશોકમરમત્સુખી ॥ ૫૦॥

એકલઃ પરનિર્વાણો હ્યસઙ્ગોઽદ્વય એવ ચ ।
તેન નાર્યાઃ કથં દેવિ નિર્વાહઃ સમ્ભવિષ્યતિ ॥ ૫૧॥

અદ્યાપિ શાસનં પ્રાપ્ય ગૃહમાયાહિ દુર્મતિમ્ ।
ત્યજાસ્માકં મહાભાગે ભવિષ્યતિ ચ શં તવ ॥ ૫૨॥

ત્વદ્યોગ્યો હિ વરો વિષ્ણુઃ સર્વસદ્ગુણવાન્પ્રભુઃ ।
વૈકુણ્ઠવાસી લક્ષ્મીશો નાનાક્રીડાવિશારદઃ ॥ ૫૩॥

તેન તે કારયિષ્યામો વિવાહં સર્વસૌખ્યદમ્ ।
ઇતીદૃશં ત્યજ હઠં સુખિતા ભવ પાર્વતિ ॥ ૫૪॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા પાર્વતી જગદમ્બિકા ।
વિહસ્ય ચ પુનઃ પ્રાહ મુનીન્જ્ઞાનવિશારદાન્ ॥ ૫૫॥

પાર્વત્યુવાચ ।
સત્યં ભવદ્ભિઃ કથિતં સ્વજ્ઞાનેન મુનીશ્વરાઃ ।
પરન્તુ મે હઠો નૈવ મુક્તો ભવતિ હે દ્વિજાઃ ॥ ૫૬॥

સ્વતનોઃ શૈલજાતત્વાત્કાઠિન્યં સહજં સ્થિતમ્ ।
ઇત્થં વિચાર્ય સુધિયા માં નિષેદ્ધું ન ચાર્હથ ॥ ૫૭॥

સુરર્ષેર્વચનં પથ્યં ત્યક્ષ્યે નૈવ કદાચન ।
ગુરૂણાં વચનં પથ્યમિતિ વેદવિદો વિદુઃ ॥ ૫૮॥

ગુરૂણાં વચનં સત્યમિતિ યેષાં દૃઢા મતિઃ ।
તેષામિહામુત્ર સુખં પરમં નાસુખં ક્વચિત્ ॥ ૫૯॥

ગુરૂણાં વચનં સત્યમિતિ યદ્ધૃદયે ન ધીઃ ।
ઇહામુત્રાપિ તેષાં હિ દુઃખં ન ચ સુખં ક્વચિત્ ॥ ૬૦॥

સર્વથા ન પરિત્યાજ્યં ગુરૂણાં વચનં દ્વિજાઃ ।
ગૃહં વસેદ્વા શૂન્યં સ્યાન્મે હઠઃ સુખદઃ સદા ॥ ૬૧॥

યદ્ભવદ્ભિઃ સુભણિતં વચનં મુનિસત્તમાઃ ।
તદન્યથા તદ્વિવેકં વર્ણયામિ સમાસતઃ ॥ ૬૨॥

ગુણાલયો વિહારી ચ વિષ્ણુઃ સત્યં પ્રકીર્તિતઃ ।
સદાશિવોઽગુણઃ પ્રોક્તસ્તત્ર કારણમુચ્યતે ॥ ૬૩॥

શિવો બ્રહ્માવિકારઃ સ ભક્તહેતોર્ધૃતાકૃતિઃ ।
પ્રભુતાં લૌકિકીં નૈવ સન્દર્શયિતુમિચ્છતિ ॥ ૬૪॥

અતઃ પરમહંસાનાં ધાર્યતે સુપ્રિયા ગતિઃ ।
અવધૂતસ્વરૂપેણ પરાનન્દેન શમ્ભુના ॥ ૬૫॥

ભૂષણાદિરુચિર્માયાલિપ્તાનાં બ્રહ્મણો ન ચ ।
સ પ્રભુર્નિર્ગુણોઽજો નિર્માયોઽલક્ષ્યગતિર્વિરાટ્ ॥ ૬૬॥

ધર્મજાત્યાદિભિઃ શમ્ભુર્નાનુગૃહ્ણાતિ વૈ દ્વિજાઃ ।
ગુરોરનુગ્રહેણૈવ શિવં જાનામિ તત્ત્વતઃ ॥ ૬૭॥

ચેચ્છિવઃ સ હિ મે વિપ્રા વિવાહં ન કરિષ્યતિ ।
અવિવાહા સદાહં સ્યાં સત્યં સત્યં વદામ્યહમ્ ॥ ૬૮॥

ઉદયતિ યદિ ભાનુઃ પશ્ચિમે દિગ્વિભાગે
પ્રચલતિ યદિ મેરુઃ શીતતાં યાતિ વહ્નિઃ ।
વિકસતિ યદિ પદ્મં પર્વતાગ્રે શિલાયાં
ન હિ ચલતિ હઠો મે સત્યમેતદ્બ્રવીમિ ॥ ૬૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા તાન્પ્રણમ્યાશુ મુનીન્સા પર્વતાત્મજા ।
વિરરામ શિવં સ્મૃત્વા નિર્વિકારેણ ચેતસા ॥ ૭૦॥

ઋષયોઽપીત્થમાજ્ઞાય ગિરિજાયાઃ સુનિશ્ચયમ્ ।
પ્રોચુર્જયગિરં તત્ર દદુશ્ચાશિષમુત્તમામ્ ॥ ૭૧॥

અથ પ્રણમ્ય તાં દેવીં મુનયો હૃષ્ટમાનસાઃ ।
શિવસ્થાનં દ્રુતં જગ્મુસ્તત્પરીક્ષાકરા મુને ॥ ૭૨॥

તત્ર ગત્વા શિવં નત્વા વૃત્તાન્તં વિનિવેદ્ય તત્ ।
તદાજ્ઞાં સમનુપ્રાપ્ય સ્વર્લોકં જગ્મુરાદરાત્ ॥ ૭૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે સપ્તર્ષિકૃતપરીક્ષાવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૬. ષડ્વિંશોઽધ્યાયઃ । પાર્વતી-જટિલસંવાદઃ ।

બ્રહ્મોવાચ ।
ગતેષુ તેષુ મુનિષુ સ્વં લોકં શઙ્કરઃ સ્વયમ્ ।
પરીક્ષિતું તપો દેવ્યા ઐચ્છત્સૂતિકરઃ પ્રભુઃ ॥ ૧॥

પરીક્ષાછદ્મના શમ્ભુર્દ્રષ્ટું તાં તુષ્ટમાનસઃ ।
જટિલં રૂપમાસ્થાય સ યયૌ પાર્વતીવનમ્ ॥ ૨॥

અતીવ સ્થવિરો વિપ્રદેહધારી સ્વતેજસા ।
પ્રજ્વલન્મનસા હૃષ્ટો દણ્ડી છત્રી બભૂવ સઃ ॥ ૩॥

તત્રાપશ્યત્સ્થિતાં દેવીં સખીભિઃ પરિવારિતામ્ ।
વેદિકોપરિ શુદ્ધાં તાં શિવામિવ વિધોઃ કલામ્ ॥ ૪॥

શમ્ભુર્નિરીક્ષ્ય તાં દેવીં બ્રહ્મચારિસ્વરૂપવાન્ ।
ઉપકણ્ઠં યયૌ પ્રીત્યા તદાસૌ ભક્તવત્સલઃ ॥ ૫॥

આગતં તં તદા દૃષ્ટ્વા બ્રાહ્મણં તેજસાદ્ભુતમ્ ।
અપૂજયચ્છિવા દેવી સર્વપૂજોપહારકૈઃ ॥ ૬॥

સુસત્કૃતં સંવિધાભિઃ પૂજિતં પરયા મુદા ।
પાર્વતી કુશલં પ્રીત્યા પપ્રચ્છ દ્વિજમાદરાત્ ॥ ૭॥

પાર્વત્યુવાચ ।
બ્રહ્મચારિસ્વરૂપેણ કસ્ત્વં હિ કુત આગતઃ ।
ઇદં વનં ભાસયસે વદ વેદવિદાં વર ॥ ૮॥

વિપ્ર ઉવાચ ।
અહમિચ્છાભિગામી ચ વૃદ્ધો વિપ્રતનુઃ સુધીઃ ।
તપસ્વી સુખદોઽન્યેષામુપકારી ન સંશયઃ ॥ ૯॥

કા ત્વં કસ્યાસિ તનયા કિમર્થં વિજને વને ।
તપશ્ચરસિ દુર્ધર્ષં મુનિભિઃ પ્રપદૈરપિ ॥ ૧૦॥

ન બાલા ન ચ વૃદ્ધાસિ તરુણી ભાસિ શોભના ।
કથં પતિં વિના તીક્ષ્ણં તપશ્ચરસિ વૈ વને ॥ ૧૧॥

કિં ત્વં તપસ્વિની ભદ્રે કસ્યચિત્સહચારિણી ।
તપસ્વી સ ન પુષ્ણાતિ દેવિ ત્વાં ચ ગતોઽન્યતઃ ॥ ૧૨॥

વદ કસ્ય કુલે જાતા કઃ પિતા તવ કાભિધા ।
મહાસૌભાગ્યરૂપા ત્વં વૃથા તવ તપોરતિઃ ॥ ૧૩॥

કિં ત્વં વેદપ્રસૂર્લક્ષ્મીઃ કિં સુરૂપા સરસ્વતી ।
એતાસુ મધ્યે કા વા ત્વં નાહં તર્કિતુમુત્સહે ॥ ૧૪॥

પાર્વત્યુવાચ ।
નાહં વેદપ્રસૂર્વિપ્ર ન લક્ષ્મીશ્ચ સરસ્વતી ।
અહં હિમાચલસુતા સામ્પ્રતં નામ પાર્વતી ॥ ૧૫॥

પુરા દક્ષસુતા જાતા સતી નામાન્યજન્મનિ ।
યોગેન ત્યક્તદેહાહં યત્પિત્રા નિન્દિતઃ પતિઃ ॥ ૧૬॥

અત્ર જન્મનિ સમ્પ્રાપ્તઃ શિવોઽપિ વિધિવૈભવાત્ ।
માં ત્યક્ત્વા ભસ્મસાત્કૃત્ય મન્મથં સ જગામ હ ॥ ૧૭॥

પ્રયાતે શઙ્કરે તાપોદ્વિજિતાહં પિતુર્ગૃહાત્ ।
આગતા તપસે વિપ્ર સુદૃઢા સ્વર્ણદીતટે ॥ ૧૮॥

કૃત્વા તપઃ કઠોરં ચ સુચિરં પ્રાણવલ્લભમ્ ।
ન પ્રાપ્યાગ્નૌ વિવિક્ષન્તી ત્વાં દૃષ્ટ્વા સંસ્થિતા ક્ષણમ્ ॥ ૧૯॥

ગચ્છ ત્વં પ્રવિશામ્યગ્નૌ શિવેનાઙ્ગીકૃતા ન હિ ।
યત્ર યત્ર જનુર્લપ્સ્યે વરિષ્યામિ શિવં વરમ્ ॥ ૨૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પાર્વતી વહ્નૌ તત્પુરઃ પ્રવિવેશ સા ।
નિષિધ્યમાના પુરતો બ્રાહ્મણેન પુનઃ પુનઃ ॥ ૨૧॥

વહ્નિપ્રવેશં કુર્વત્યાઃ પાર્વત્યાસ્તત્પ્રભાવતઃ ।
બભૂવ તત્ક્ષણં સદ્યો વહ્નિશ્ચન્દનપઙ્કવત્ ॥ ૨૨॥

ક્ષણં તદન્તરે સ્થિત્વા હ્યુત્પતન્તીં દિવં દ્વિજઃ ।
પુનઃ પપ્રચ્છ સહસા વિહસન્સુતનું શિવઃ ॥ ૨૩॥

દ્વિજ ઉવાચ ।
અહો તપસ્તે કિં ભદ્રે ન બુદ્ધં કિઞ્ચિદેવ હિ ।

ન દગ્ધો વહ્નિના દેહો ન ચ પ્રાપ્તં મનીષિતમ્ ॥ ૨૪॥

અતઃ સત્યં નિકામં વૈ વદ દેવિ મનોરથમ્ ।
મમાગ્રે વિપ્રવર્યસ્ય સર્વાનન્દપ્રદસ્ય હિ ॥ ૨૫॥

યથાવિધિ ત્વયા દેવિ કીર્ત્યતાં સર્વથાત્મના ।
તસ્માન્મૈત્રી ચ સઞ્જાતા કાર્યં ગોપ્યં ત્વયા ન હિ ॥ ૨૬॥

કિમિચ્છસિ વરં દેવિ પ્રષ્ટુમિચ્છામ્યતઃ પરમ્ ।
ત્વય્યેવ તદસૌ દેવિ ફલં સર્વં પ્રદૃશ્યતે ॥ ૨૭॥

પરાર્થે ચ તપશ્ચેદ્વૈ તિષ્ઠેત્તુ તપ એવ તત્ ।
રત્નં હસ્તે સમાદાય હિત્વા કાચસ્તુ સઞ્ચિતઃ ॥ ૨૮॥

ઈદૃશં તવ સૌન્દર્યં કથં વ્યર્થીકૃતં ત્વયા ।
હિત્વા વસ્ત્રાણ્યનેકાનિ ચર્માદિ ચ ધૃતં ત્વયા ॥ ૨૯॥

તત્સર્વં કારણં બ્રૂહિ તપસસ્ત્વસ્ય સત્યતઃ ।
તચ્છ્રુત્વા વિપ્રવર્યોઽહં યથા હર્ષમવાપ્નુયામ્ ॥ ૩૦॥

બ્રહ્મોવાચ ।
ઇતિ પૃષ્ટા તદા તેન સખીં પ્રૈરયતામ્બિકા ।
તન્મુખેનૈવ તત્સર્વં કથયામાસ સુવ્રતા ॥ ૩૧॥

તયા ચ પ્રેરિતા તત્ર પાર્વત્યા વિજયાભિધા ।
પ્રાણપ્રિયા સુવ્રતજ્ઞા સખી જટિલમબ્રવીત્ ॥ ૩૨॥

સખ્યુવાચ ।
શ‍ૃણુ સાધો પ્રવક્ષ્યામિ પાર્વતીચરિતં પરમ્ ।
હેતું ચ તપસસ્સર્વં યદિ ત્વં શ્રોતુમિચ્છસિ ॥ ૩૩॥

સખી મે ગિરિરાજસ્ય સુતેયં હિમભૂભૃતઃ ।
ખ્યાતા વૈ પાર્વતી નામ્ના તસ્યા માતાસ્તિ મેનકા ॥ ૩૪॥

ઊઢેયં ન ચ કેનાપિ ન વાઞ્છતિ શિવાત્પરમ્ ।
ત્રીણિ વર્ષસહસ્રાણિ તપશ્ચરણસાધિની ॥ ૩૫॥

તદર્થં મેઽનયા સખ્યા પ્રારબ્ધં તપ ઈદૃશમ્ ।
તદત્ર કારણં વક્ષ્યે શ‍ૃણુ સાધો દ્વિજોત્તમ ॥ ૩૬॥

હિત્વેન્દ્રપ્રમુખાન્દેવાન્ હરિં બ્રહ્માણમેવ ચ ।

પતિં પિનાકપાણિં વૈ પ્રાપ્તુમિચ્છતિ પાર્વતી ॥ ૩૭॥

ઇયં સખી મદીયા વૈ વૃક્ષાનારોપયત્પુરા ।
તેષુ સર્વેષુ સઞ્જાતં ફલપુષ્પાદિકં દ્વિજ ॥ ૩૮॥

રૂપસાર્થાય જનકકુલાલઙ્કરણાય ચ ।
સમુદ્દિશ્ય મહેશાનં કામસ્યાનુગ્રહાય ચ ॥ ૩૯॥

મત્સખી નારદદેશાત્તપસ્તપતિ દારુણમ્ ।
મનોરથં કુતસ્તસ્યા ન ફલિષ્યતિ તાપસ ॥ ૪૦॥

યત્તે પૃષ્ટં દ્વિજશ્રેષ્ઠ મત્સખ્યા મનસીપ્સિતમ્ ।
મયા ખ્યાતં ચ તત્પ્રીત્યા કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૪૧॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા વિજયાયા યથાર્થતઃ ।
મુને સ જટિલો રુદ્રો વિહસન્વાક્યમબ્રવીત્ ॥ ૪૨॥

જટિલ ઉવાચ ।
સખ્યેદં કથિતં તત્ર પરિહાસોઽનુમીયતે ।
યથાર્થં ચેત્તદા દેવી સ્વમુખેનાભિભાષતામ્ ॥ ૪૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્તે ચ તદા તેન જટિલેન દ્વિજન્મના ।
ઉવાચ પાર્વતી દેવી સ્વમુખેનૈવ તં દ્વિજમ્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવાજટિલસંવાદો નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૨.૩.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૭. સપ્તવિંશોઽધ્યાયઃ । બ્રહ્મચારિપ્રતારણવાક્યવર્ણનમ્ ।

પાર્વત્યુવાચ ।
શ઼ૃણુ દ્વિજેન્દ્ર જટિલ મદ્વૃત્તં નિખિલં ખલુ ।

સખ્યુક્તં મેઽદ્ય યત્સત્યં તત્તથૈવ ન ચાન્યથા ॥ ૧॥

મનસા વચસા સાક્ષાત્કર્મણા પતિભાવતઃ ।
સત્યં બ્રવીમિ નોઽસત્યં વૃતો વૈ શઙ્કરો મયા ॥ ૨॥

જાનામિ દુર્લભં વસ્તુ કથમ્પ્રાપ્યં મયા ભવેત્ ।
તથાપિ મન ઔત્સુક્યાત્તપ્યતેઽદ્ય તપો મયા ॥ ૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વચનં તસ્મૈ સ્થિતા સા ગિરિજા તદા ।
ઉવાચ બ્રાહ્મણસ્તત્ર તચ્છ્રુત્વા પાર્વતીવચઃ ॥ ૪॥

બ્રાહ્મણ ઉવાચ ।
એતાવત્કાલપર્યન્તં મમેચ્છા મહતી હ્યભૂત્ ।
કિં વસ્તુ કાઙ્ક્ષતી દેવી કુરુતે સુમહત્તપઃ ॥ ૫॥

તજ્જ્ઞાત્વા નિખિલં દેવિ શ્રુત્વા ત્વન્મુખપઙ્કજાત્ ।
ઇતો ગચ્છામ્યહં સ્થાનાદ્યથેચ્છસિ તથા કુરુ ॥ ૬॥

ન કથ્યતે ત્વયા મહ્યં મિત્રત્વં નિષ્ફલં ભવેત્ ।
યથા કાર્યં તથા ભાવિ કથનીયં સુખેન ચ ॥ ૭॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વચનં તસ્ય યાવદ્ગન્તુમિયેષ સઃ ।
તાવચ્ચ પાર્વતી દેવી પ્રણમ્યોવાચ તં દ્વિજમ્ ॥ ૮॥

પાર્વત્યુવાચ ।
કિં ગમિષ્યસિ વિપ્રેન્દ્ર સ્થિતો ભવ હિતં વદ ।
ઇત્યુક્તે ચ તયા તત્ર સ્થિત્વોવાચ સ દણ્ડધૃક્ ॥ ૯॥

દ્વિજ ઉવાચ ।
યદિ શ્રોતુમના દેવિ માં સ્થાપયસિ ભક્તિતઃ ।
વદામિ તત્ત્વં તત્સર્વં યેન તે વયુનં ભવેત્ ॥ ૧૦॥

જાનામ્યહં મહાદેવં સર્વથા ગુરુધર્મતઃ ।
પ્રવદામિ યથાર્થં હિ સાવધાનતયા શ ૃણુ ॥ ૧૧॥

વૃષધ્વજો મહાદેવો ભસ્મદિગ્ધો જટાધરઃ ।
વ્યાઘ્રચર્મામ્બરધરઃ સંવીતો ગજકૃત્તિના ॥ ૧૨॥

કપાલધારી સર્પૌઘૈઃ સર્વગાત્રેષુ વેષ્ટિતઃ ।
વિષદિગ્ધોઽભક્ષ્યભક્ષો વિરૂપાક્ષો વિભીષણઃ ॥ ૧૩॥

અવ્યક્તજન્મા સતતં ગૃહભોગવિવર્જિતઃ ।
દિગમ્બરો દશભુજો ભૂતપ્રેતાન્વિતસ્સદા ॥ ૧૪॥

કેન વા કારણેન ત્વં તં ભર્તારં સમીહસે ।
ક્વ જ્ઞાનં તે ગતં દેવિ તદ્વદાદ્ય વિચારતઃ ॥ ૧૫॥

પૂર્વં શ્રુતં મયા ચૈવ વ્રતં તસ્ય ભયઙ્કરમ્ ।
શ‌ૃણુ તે નિગદામ્યદ્ય યદિ તે શ્રવણે રુચિઃ ॥ ૧૬॥

દક્ષસ્ય દુહિતા સાધ્વી સતી વૃષભવાહનમ્ ।
વવ્રે પતિં પુરા દૈવાત્તત્સમ્ભોગઃ પરિશ્રુતઃ ॥ ૧૭॥

કપાલિજાયેતિ સતી દક્ષેણ પરિવર્જિતા ।
યજ્ઞે ભાગપ્રદાનાય શમ્ભુશ્ચાપિ વિવર્જિતઃ ॥ ૧૮॥

સા તથૈવાપમાનેન ભૃશં કોપાકુલા સતી ।
તત્યાજાસૂન્પ્રિયાઁસ્તત્ર તયા ત્યક્તશ્ચ શઙ્કરઃ ॥ ૧૯॥

ત્વં સ્ત્રીરત્નં તવ પિતા રાજા નિખિલભૂભૃતામ્ ।
તથાવિધં પતિં કસ્માદુગ્રેણ તપસેહસે ॥ ૨૦॥

દત્ત્વા સુવર્ણમુદ્રાં ચ ગ્રહીતું કાચમિચ્છસિ ।
હિત્વા ચ ચન્દનં શુભ્રં કર્દમં લેપ્તુમિચ્છસિ ॥ ૨૧॥

સૂર્યતેજઃ પરિત્યજ્ય ખદ્યોતદ્યુતિમિચ્છસિ ।
ચીનાંશુકં વિહાયૈવ ચર્મામ્બરમિહેચ્છસિ ॥ ૨૨॥

ગૃહવાસં પરિત્યજ્ય વનવાસં સમીહસે ।
લોહમિચ્છસિ દેવેશિ ત્યક્ત્વા શેવધિમુત્તમમ્ ॥ ૨૩॥

ઇન્દ્રાદિલોકપાલાંશ્ચ હિત્વા શિવમનુવ્રતા ।
નૈતત્સૂક્તં હિ લોકેષુ વિરુદ્ધં દૃશ્યતેઽધુના ॥ ૨૪॥

ક્વ ત્વં કમલપત્રાક્ષી ક્વાસૌ વૈ ત્રિવિલોચનઃ ।
શશાઙ્કવદના ત્વં ચ પઞ્ચવક્ત્રઃ શિવઃ સ્મૃતઃ ॥ ૨૫॥

વેણી શિરસિ તે દિવ્યા સર્પિણીવ વિભાસિતા ।
જટાજૂટં શિવસ્યૈવ પ્રસિદ્ધં પરિચક્ષતે ॥ ૨૬॥

ચન્દનં ચ ત્વદીયાઙ્ગે ચિતાભસ્મ શિવસ્ય ચ ।
ક્વ દુકૂલં ત્વદીયં વૈ શાઙ્કરં ક્વ ગજાજિનમ્ ॥ ૨૭॥

ક્વ ભૂષણાનિ દિવ્યાનિ ક્વ સર્પાઃ શઙ્કરસ્ય ચ ।
ક્વ ચરા દેવતાઃસર્વાઃ ક્વ ચ ભૂતબલિપ્રિયઃ ॥ ૨૮॥

ક્વ વા મૃદઙ્ગવાદશ્ચ ક્વ ચ તડ્ડમરુસ્તથા ।
ક્વ ચ ભેરીકલાપશ્ચ ક્વ ચ શૃઙ્ગરવોઽશુભઃ ॥ ૨૯॥

ક્વ ચ ઢક્કામયઃ શબ્દો ગલનાદઃ ક્વ ચાશુભઃ ।
ભવત્યાશ્ચ શિવસ્યૈવ ન યુક્તં રૂપમુત્તમમ્ ॥ ૩૦॥

યદિ દ્રવ્યં ભવેત્તસ્ય કથં સ્યાત્સ દિગમ્બરઃ ।
વાહનં ચ બલીવર્દઃ સામગ્રી કાપિ તસ્ય ન ॥ ૩૧॥

વરેષુ યે ગુણાઃ પ્રોક્તા નારીણાં સુખદાયકાઃ ।
તન્મધ્યે હિ વિરૂપાક્ષે એકોઽપિ ન ગુણઃ સ્મૃતઃ ॥ ૩૨॥

તવાપિ કામો દયિતો દગ્ધસ્તેન હરેણ ચ ।
અનાદરસ્તદા દૃષ્ટો હિત્વા ત્વામન્યતો ગતઃ ॥ ૩૩॥

જાતિર્ન દૃશ્યતે તસ્ય વિદ્યાજ્ઞાનં તથૈવ ચ ।
સહાયાશ્ચ પિશાચા હિ વિષં કણ્ઠે હિ દૃશ્યતે ॥ ૩૪॥

એકાકી ચ સદા નિત્યં વિરાગી ચ વિશેષતઃ ।
તસ્માત્ત્વં હિ હરેણૈવ મનો યોક્તું તુ ચાર્હસિ ॥ ૩૫॥

ક્વ ચ હારસ્ત્વદીયો વૈ ક્વ ચ તન્મુણ્ડમાલિકા ।
અઙ્ગરાગઃ ક્વ તે દિવ્યઃ ચિતાભસ્મ ક્વ તત્તનૌ ॥ ૩૬॥

સર્વં વિરુદ્ધં રૂપાદિ તવ દેવિ હરસ્ય ચ ।
મહ્યં ન રોચતે હ્યેતદ્યદિચ્છસિ તથા કુરુ ॥ ૩૭॥

અસદ્વસ્તુ ચ યત્કિઞ્ચિત્ તત્સર્વં સ્વયમીહસે ।
નિવર્તય મનસ્તસ્માન્નો ચેદિચ્છસિ તત્કુરુ ॥ ૩૮॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા તસ્ય વિપ્રસ્ય પાર્વતી ।
ઉવાચ ક્રુદ્ધમનસા શિવનિન્દાપરં દ્વિજમ્ ॥ ૩૯॥

ઇતિશ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે બ્રહ્મચારિપ્રતારણવાક્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । પાર્વત્યાઃ શિવરૂપદર્શનમ્ ।

પાર્વત્યુવાચ ।
એતાવદ્ધિ મયા જ્ઞાતં કશ્ચિદન્યોઽયમાગતઃ ।
ઇદાનીં સકલં જ્ઞાતમવધ્યસ્ત્વં વિશેષતઃ ॥ ૧॥

ત્વયોક્તં વિદિતં દેવ તદલીકં ન ચાન્યથા ।
યદિ ત્વયોદિતં સ્યાદ્વૈ વિરુદ્ધં નોચ્યતે ત્વયા ॥ ૨॥

કદાચિદ્દૃશ્યતે તાદૃક્ વેષધારી મહેશ્વરઃ ।
સ્વલીલયા પરબ્રહ્મ સ્વરાગોપાત્તવિગ્રહઃ ॥ ૩॥

બ્રહ્મચારિસ્વરૂપેણ પ્રતારયિતુમુદ્યતઃ ।
આગતશ્છલસંયુક્તં વચોઽવાદીઃ કુયુક્તિતઃ ॥ ૪॥

શઙ્કરસ્ય સ્વરૂપં તુ જાનામિ સુવિશેષતઃ ।
શિવતત્ત્વમતો વચ્મિ સુવિચાર્ય યથાર્હતઃ ॥ ૫॥

વસ્તુતો નિર્ગુણો બ્રહ્મ સગુણઃ કારણેન સઃ ।
કુતો જાતિર્ભવેત્તસ્ય નિર્ગુણસ્ય ગુણાત્મનઃ ॥ ૬॥

સ સર્વાસાં હિ વિદ્યાનામધિષ્ઠાનં સદાશિવઃ ।
કિં તસ્ય વિદ્યયા કાર્યં પૂર્ણસ્ય પરમાત્મનઃ ॥ ૭॥

વેદા ઉચ્છ્વાસરૂપેણ પુરા દત્તાશ્ચ વિષ્ણવે ।
શમ્ભુના તેન કલ્પાદૌ તત્સમઃ કોઽસ્તિ સુપ્રભુઃ ॥ ૮॥

સર્વેષામાદિભૂતસ્ય વયોમાનં કુતસ્તતઃ ।
પ્રકૃતિસ્તુ તતો જાતા કિં શક્તેસ્તસ્ય કારણમ્ ॥ ૯॥

યે ભજન્તિ ચ તં પ્રીત્યા શક્તીશં શઙ્કરં સદા ।

તસ્મૈ શક્તિત્રયં શમ્ભુઃ સ દદાતિ સદાવ્યયમ્ ॥ ૧૦॥

તસ્યૈવ ભજનાજ્જીવો મૃત્યું જયતિ નિર્ભયઃ ।
તસ્માન્મૃત્યુઞ્જયન્નામ પ્રસિદ્ધં ભુવનત્રયે ॥ ૧૧॥

તસ્યૈવ પક્ષપાતેન વિષ્ણુર્વિષ્ણુત્વમાપ્નુયાત્ ।
બ્રહ્મત્વં ચ યથા બ્રહ્મા દેવા દેવત્વમેવ ચ ॥ ૧૨॥

દર્શનાર્થં શિવસ્યાદૌ યથા ગચ્છતિ દેવરાટ્ ।
ભૂતાદયસ્તત્પરસ્ય દ્વારપાલાઃ શિવસ્ય તુ ॥ ૧૩॥

દણ્ડૈશ્ચ મુકુટં વિદ્ધં મૃષ્ટં ભવતિ સર્વતઃ ।
કિં તસ્ય બહુપક્ષેણ સ્વયમેવ મહાપ્રભુઃ ॥ ૧૪॥

કલ્યાણરૂપિણસ્તસ્ય સેવયેહ ન કિં ભવેત્ ।
કિં ન્યૂનં તસ્ય દેવસ્ય મામિચ્છતિ સદાશિવઃ ॥ ૧૫॥

સપ્તજન્મદરિદ્રઃ સ્યાત્સેવેદ્યો યદિ શઙ્કરમ્ ।
તસ્યૈતત્સેવનાલ્લોકે લક્ષ્મીઃ સ્યાદનપાયિની ॥ ૧૬॥

યદગ્રે સિદ્ધયોઽષ્ટૌ ચ નિત્યં નૃત્યન્તિ તોષિતુમ્ ।
અવાઙ્મુખાઃ સદા તત્ર તદ્ધિતં દુર્લભં કુતઃ ॥ ૧૭॥

યદ્યસ્ય મઙ્ગલાનીહ સેવતે શઙ્કરસ્ય ન ।
યથાપિ મઙ્ગલં તસ્ય સ્મરણાદેવ જાયતે ॥ ૧૮॥

યસ્ય પૂજાપ્રભાવેણ કામાઃ સિદ્ધ્યન્તિ સર્વશઃ ।
કુતો વિકારસ્તસ્યાસ્તિ નિર્વિકારસ્ય સર્વદા ॥ ૧૯॥

શિવેતિ મઙ્ગલં નામ મુખે યસ્ય નિરન્તરમ્ ।
તસ્યૈવ દર્શનાદન્યે પવિત્રાઃ સન્તિ સર્વદા ॥ ૨૦॥

યદ્યપૂતં ભવેદ્ભસ્મ ચિતાયાશ્ચ ત્વયોદિતમ્ ।
નિત્યમસ્યાઙ્ગગં દેવૈઃ શિરોભિર્ધાર્યતે કથમ્ ॥ ૨૧॥

યો દેવો જગતાં કર્તા ભર્તા હર્તા ગુણાન્વિતઃ ।
નિર્ગુણઃ શિવસંજ્ઞશ્ચ સ વિજ્ઞેયઃ કથં ભવેત્ ॥ ૨૨॥

અગુણં બ્રહ્મણો રૂપં શિવસ્ય પરમાત્મનઃ ।
તત્કથં હિ વિજાનન્તિ ત્વાદૃશાસ્તદ્બહિર્મુખાઃ ॥ ૨૩॥

દુરાચારાશ્ચ પાપાશ્ચ વેભ્યસ્તે વિનિર્ગતાઃ ।
તત્ત્વં તે નૈવ જાનન્તિ શિવસ્યાગુણરૂપિણઃ ॥ ૨૪॥

શિવનિન્દાં કરોતીહ તત્ત્વમજ્ઞાય યઃ પુમાન્ ।
આજન્મસઞ્ચિતં પુણ્યં ભસ્મીભવતિ તસ્ય તત્ ॥ ૨૫॥

ત્વયા નિન્દા કૃતા યાત્ર હરસ્યામિતતેજસઃ ।
ત્વત્પૂજા ચ કૃતા યન્મે તસ્માત્પાપં ભજામ્યહમ્ ॥ ૨૬॥

શિવવિદ્વેષિણં દૃષ્ટ્વા સચૈલં સ્નાનમાચરેત્ ।
શિવવિદ્વેષિણં દૃષ્ટ્વા પ્રાયશ્ચિતં સમાચરેત્ ॥ ૨૭॥

રે રે દુષ્ટ ત્વયા ચોક્તમહં જાનામિ શઙ્કરમ્ ।
નિશ્ચયેન ન વિજ્ઞાતશ્શિવ એવ સનાતનઃ ॥ ૨૮॥

યથા તથા ભવેદ્રુદ્રો યથા વા બહુરૂપવાન્ ।
મમાભીષ્ટતમો નિત્યં નિર્વિકારી સતાં પ્રિયઃ ॥ ૨૯॥

વિષ્ણુર્બ્રહ્માપિ ન સમઃ તસ્ય ક્વાપિ મહાત્મનઃ ।
કુતોઽન્યે નિર્જરાદ્યાશ્ચ કાલાધીનાઃ સદૈવ તે ॥ ૩૦॥

ઇતિ બુદ્ધ્યા સમાલોક્ય સ્વયા સત્યા સુતત્ત્વતઃ ।
શિવાર્થં વનમાગત્ય કરોમિ વિપુલં તપઃ ॥ ૩૧॥

સ એવ પરમેશાનઃ સર્વેશો ભક્તવત્સલઃ ।
સમ્પ્રાપ્તું મેઽભિલાષો હિ દીનાનુગ્રહકારકમ્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ગિરિજા સા હિ ગિરીશ્વરસુતા મુને ।
વિરરામ શિવં દધ્યૌ નિર્વિકારેણ ચેતસા ॥ ૩૩॥

તદાકર્ણ્ય વચો દેવ્યા બ્રહ્મચારી સ વૈ દ્વિજઃ ।
પુનર્વચનમાખ્યાતું યાવદેવ પ્રચક્રમે ॥ ૩૪॥

ઉવાચ ગિરિજા તાવત્સ્વસખીં વિજયાં દ્રુતમ્ ।
શિવસક્તમનોવૃત્તિઃ શિવનિન્દાપરાઙ્મુખી ॥ ૩૫॥

ગિરિજોવાચ ।
વારણીયઃ પ્રયત્નેન સખ્યયં હિ દ્વિજાધમઃ ।
પુનર્વક્તુમનાશ્ચૈવ શિવનિન્દાં કરિષ્યતિ ॥ ૩૬॥

ન કેવલં ભવેત્પાપં નિન્દાં કર્તુશ્શિવસ્ય હિ ।
યો વૈ શ‍ૃણોતિ તન્નિન્દાં પાપભાક્ સ ભવેદિહ ॥ ૩૭॥

શિવનિન્દાકરો વધ્યઃ સર્વથા શિવકિઙ્કરૈઃ ।
બ્રાહ્મણશ્ચેત્સ વૈ ત્યાજ્યો ગન્તવ્યં તત્સ્થલાદ્દ્રુતમ્ ॥ ૩૮॥

અયં દુષ્ટઃ પુનર્નિન્દાં કરિષ્યતિ શિવસ્ય હિ ।
બ્રાહ્મણત્વાદવધ્યશ્ચેત્ત્યાજ્યોઽદૃશ્યશ્ચ સર્વથા ॥ ૩૯॥

હિત્વૈતત્સ્થલમદ્યૈવ યાસ્યામોઽન્યત્ર મા ચિરમ્ ।
અથ સમ્ભાષણં ન સ્યાદનેનાઽવિદુષા પુનઃ ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ચોમયા યાવત્પાદમુત્ક્ષિપ્યતે મુને ।
અસૌ તાવચ્છિવઃ સાક્ષાદાલમ્બે પ્રિયયા સ્વયમ્ ॥ ૪૧॥

કૃત્વા સ્વરૂપં સુભગં શિવાધ્યાનં યથા તથા ।
દર્શયિત્વા શિવાયૈ તામુવાચાવાઙ્મુખીં શિવઃ ॥ ૪૨॥

શિવ ઉવાચ ।
કુત્ર યાસ્યસિ માં હિત્વા ન ત્વં ત્યાજ્યા મયા પુનઃ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂહિ નાદેયં વિદ્યતે તવ ॥ ૪૩॥

અદ્યપ્રભૃતિ તે દાસઃ તપોભિઃ ક્રીત એવ તે ।
ક્રીતોઽસ્મિ તવ સૌન્દર્યાત્ક્ષણમેકં યુગાય તે ॥ ૪૪॥

ત્યજ્યતાં ચ ત્વયા લજ્જા મમ પત્ની સનાતની ।
ગિરિજે ત્વં હિ સદ્બુધ્યા વિચારય મહેશ્વરિ ॥ ૪૫॥

મયા પરીક્ષિતાસિ ત્વં બહુધા દૃઢમાનસે ।
તત્ક્ષમસ્વાપરાધં મે લોકલીલાનુસારિણઃ ॥ ૪૬॥

ન ત્વાદૃશીં પ્રણયિનીં પશ્યામિ ચ ત્રિલોકકે ।
સર્વથાહં તવાધીનઃ સ્વકામઃ પૂર્યતાં શિવે ॥ ૪૭॥

એહિ પ્રિયે મત્સકાશં પત્ની ત્વં મે વરસ્તવ ।
ત્વયા સાકં દ્રુતં યાસ્યે સ્વગૃહં પર્વતોત્તમમ્ ॥ ૪૮॥

બ્રહ્મોવાચ ।
ઇત્યુક્તે દેવદેવેન પાર્વતી મુદમાપ સા ।

તપોજાતં તુ યત્કષ્ટં તજ્જહૌ ચ પુરાતનમ્ ॥ ૪૯॥

સર્વઃ શ્રમો વિનષ્ટોઽભૂત્સત્યાસ્તુ મુનિસત્તમ ।
ફલે જાતે શ્રમઃ પૂર્વો જન્તોર્નાશમવાપ્નુયાત્ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વત્યા શિવરૂપદર્શનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૨.૩.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૨૯. એકોનત્રિંશોઽધ્યાયઃ । શિવાશિવસંવાદઃ ।

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાભાગ કિં જાતં તદનન્તરમ્ ।
તત્સર્વં શ્રોતુમિચ્છામિ કથય ત્વં શિવાયશઃ ॥ ૧॥

બ્રહ્મોવાચ ।
દેવર્ષે શ્રૂયતાં સમ્યક્ કથયામિ કથાં મુદા ।
તાં મહાપાપસંહર્ત્રીં શિવભક્તિવિવર્ધિનીમ્ ॥ ૨॥

પાર્વતી વચનં શ્રુત્વા હરસ્સ પરમાત્મનઃ ।
દૃષ્ટ્વાનન્દકરં રૂપં જહર્ષાતીવ ચ દ્વિજ ॥ ૩॥

પ્રત્યુવાચ મહાસાધ્વી સ્વોપકણ્ઠસ્થિતં વિભુમ્ ।
અતીવ સુખિતા દેવી પ્રીત્યુત્ફુલ્લાનના શિવા ॥ ૪॥

પાર્વત્યુવાચ ।
ત્વં નાથો મમ દેવેશ ત્વયા કિં વિસ્મૃતં પુરા ।
દક્ષયજ્ઞવિનાશં હિ યદર્થં કૃતવાન્હઠાત્ ॥ ૫॥

સ ત્વં સાહં સમુત્પન્ના મેનાયાં કાર્યસિદ્ધયે ।
દેવાનાં દેવદેવેશ તારકાપ્તાસુખાત્મનામ્ ॥ ૬॥

યદિ પ્રસન્નો દેવેશ કરોષિ ચ કૃપાં યદિ ।
પતિર્ભવ મમેશાન મમ વાક્યં કુરુ પ્રભો ॥ ૭॥

પિતુર્ગેહે મયા સમ્યગ્ગમ્યતે ત્વદનુજ્ઞયા ।
પ્રસિદ્ધં ક્રિયતાં તદ્ધૈ વિશુદ્ધં પરમં યશઃ ॥ ૮॥

ગન્તવ્યં ભવતા નાથ હિમવત્પાર્શ્વતઃ પ્રભો ।
યાચસ્વ માં તતો ભિક્ષુર્ભૂત્વા લીલાવિશારદઃ ॥ ૯॥

તથા ત્વયા પ્રકર્તવ્યં લોકેષુ ખ્યાપયન્ યશઃ ।
પિતુર્મે સફલં સર્વં કુરુષ્વૈવં ગૃહાશ્રમમ્ ॥ ૧૦॥

ઋષિભિર્બોધિતઃ પ્રીત્યા સ્વબન્ધુપરિવારિતઃ ।
કરિષ્યતિ ન સન્દેહસ્તવ વાક્યં પિતા મમ ॥ ૧૧॥

દક્ષકન્યા પુરાહં વૈ પિત્રા દત્તા યદા તવ ।
યથોક્તવિધિના તત્ર વિવાહો ન કૃતસ્ત્વયા ॥ ૧૨॥

ન ગ્રહાઃ પૂજિતાસ્તેન દક્ષેણ જનકેન મે ।
ગ્રહાણાં વિષયસ્તેન સચ્છિદ્રોઽયં મહાનભૂત્ ॥ ૧૩॥

તસ્માદ્યથોક્તવિધિના કર્તુમર્હસિ મે પ્રભો ।
વિવાહં ત્વં મહાદેવ દેવાનાં કાર્યસિદ્ધયે ॥ ૧૪॥

વિવાહસ્ય યથા રીતિઃ કર્તવ્યા સા તથા ધ્રુવમ્ ।
જાનાતુ હિમવાન્ સમ્યક્ કૃતં પુત્ર્યા શુભં તપઃ ॥ ૧૫॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા સુપ્રસન્નઃ સદાશિવઃ ।
પ્રોવાચ વચનં પ્રીત્યા ગિરિજાં પ્રહસન્નિવ ॥ ૧૬॥

શિવ ઉવાચ ।
શ‍ૃણુ દેવિ મહેશાનિ પરમં વચનં મમ ।
યથોચિતં સુમાઙ્ગલ્યમવિકારિ તથા કુરુ ॥ ૧૭॥

બ્રહ્માદિકાનિ ભૂતાનિ ત્વનિત્યાનિ વરાનને ।
દૃષ્ટં યત્સર્વમેતચ્ચ નશ્વરં વિદ્ધિ ભામિનિ ॥ ૧૮॥

એકોઽનેકત્વમાપન્નો નિર્ગુણો હિ ગુણાન્વિતઃ ।
સ્વજ્યોત્સ્નયા યો વિભાતિ પરજ્યોત્સ્નાન્વિતોઽભવત્ ॥ ૧૯॥

સ્વતન્ત્રઃ પરતન્ત્રશ્ચ ત્વયા દેવિ કૃતો હ્યહમ્ ।
સર્વકર્ત્રી ચ પ્રકૃતિર્મહામાયા ત્વમેવ હિ ॥ ૨૦॥

માયામયં કૃતમિદં ચ જગત્સમગ્રં
સર્વાત્મના હિ વિધૃતં પરયા સ્વબુદ્ધ્યા ।
સર્વાત્મભિઃ સુકૃતિભિઃ પરમાત્મભાવૈઃ
સંસિક્તમાત્મનિ ગુણૈઃ પરિવેષ્ટિતઞ્ચ ॥ ૨૧॥

કે ગ્રહાઃ કે ઋતુગણાઃ કે વાન્યેઽપિ ત્વયા ગ્રહાઃ ।
કિમુક્તં ચાધુના દેવિ શિવાર્થં વરવર્ણિનિ ॥ ૨૨॥

ગુણકાર્યપ્રભેદેનાવાભ્યાં પ્રાદુર્ભવઃ કૃતઃ ।
ભક્તહેતોર્જગત્યસ્મિન્ભક્તવત્સલભાવતઃ ॥ ૨૩॥

ત્વં હિ વૈ પ્રકૃતિઃ સૂક્ષ્મા રજઃ સત્ત્વતમોમયી ।
વ્યાપારદક્ષા સતતં સગુણા નિર્ગુણાપિ ચ ॥ ૨૪॥

સર્વેષામિહ ભૂતાનામહમાત્મા સુમધ્યમે ।
નિર્વિકારી નિરીહશ્ચ ભક્તેચ્છોપાત્તવિગ્રહઃ ॥ ૨૫॥

હિમાલયં ન ગચ્છેયં જનકં તવ શૈલજે ।
તતસ્ત્વાં ભિક્ષુકો ભૂત્વા ન યાચેયં કથઞ્ચન ॥ ૨૬॥

મહાગુણૈર્ગરિષ્ઠોઽપિ મહાત્માપિ ગિરીન્દ્રજે ।
દેહીતિ વચનાત્સદ્યઃ પુરુષો યાતિ લાઘવમ્ ॥ ૨૭॥

ઇત્થં જ્ઞાત્વા તુ કલ્યાણિ કિમસ્માકં વદસ્યથ ।
કાર્યં ત્વદાજ્ઞયા ભદ્રે યથેચ્છસિ તથા કુરુ ॥ ૨૮॥

બ્રહ્મોવાચ ।
તેનોક્તાપિ મહાદેવી સા સાધ્વી કમલેક્ષણા ।
જગાદ શઙ્કરં ભક્ત્યા સુપ્રણમ્ય પુનઃ પુનઃ ॥ ૨૯॥

પાર્વત્યુવાચ ।
ત્વમાત્મા પ્રકૃતિશ્ચાહં નાત્ર કાર્યા વિચારણા ।
સ્વતન્ત્રૌ ભક્તવશગૌ નિર્ગુણૌ સગુણાવપિ ॥ ૩૦॥

પ્રયત્નેન ત્વયા શમ્ભો કાર્યં વાક્યં મમ પ્રભો ।
યાચસ્વ માં હિમગિરેઃ સૌભાગ્યં દેહિ શઙ્કર ॥ ૩૧॥

કૃપાં કુરુ મહેશાન તવ ભક્તાસ્મિ નિત્યશઃ ।
તવ પત્ની સદા નાથ હ્યહં જન્મનિ જન્મનિ ॥ ૩૨॥

ત્વં બ્રહ્મ પરમાત્મા હિ નિર્ગુણઃ પ્રકૃતેઃ પરઃ ।
નિર્વિકારી નિરીહશ્ચ સ્વતન્ત્રઃ પરમેશ્વરઃ ॥ ૩૩॥

તથાપિ સગુણોઽપીહ ભક્તોદ્ધારપરાયણઃ ।
વિહારી સ્વાત્મનિ રતો નાનાલીલાવિશારદઃ ॥ ૩૪॥

સર્વથા ત્વામહં જાને મહાદેવ મહેશ્વર ।
કિમુક્તેન ચ સર્વજ્ઞ બહુના હિ દયાં કુરુ ॥ ૩૫॥

વિસ્તારય યશો લોકે કૃત્વા લીલાં મહાદ્ભુતામ્ ।
યત્સુગીય જના નાથાઞ્જસોત્તીર્ણા ભવામ્બુધિમ્ ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇત્યેવમુક્ત્વા ગિરિજા સુપ્રણમ્ય પુનઃ પુનઃ ।
વિરરામ મહેશાનં નતસ્કન્ધા કૃતાઞ્જલિઃ ॥ ૩૭॥

ઇત્યેવમુક્તઃ સ તયા મહાત્મા
મહેશ્વરો લોકવિડમ્બનાય ।
તથેતિ મત્વા પ્રહસન્ બભૂવ
મુદાન્વિતઃ કર્તુમનાસ્તદેવ ॥ ૩૮॥

તતો હ્યન્તર્હિતશ્શમ્ભુર્બભૂવ સુપ્રહર્ષિતઃ ।
કૈલાસં પ્રયયૌ કાલ્યા વિરહાકૃષ્ટમાનસઃ ॥ ૩૯॥

તત્ર ગત્વા મહેશાનો નન્દ્યાદિભ્યઃ સ ઊચિવાન્ ।
વૃત્તાન્તં સકલં તં વૈ પરમાનન્દનિર્ભરઃ ॥ ૪૦॥

તેઽપિ શ્રુત્વા ગણાઃ સર્વે ભૈરવાદ્યાશ્ચ સર્વશઃ ।
બભૂવુઃ સુખિનોઽત્યન્તં વિદધુઃ પરમોત્સવમ્ ॥ ૪૧॥

મહત્સુમઙ્ગલં તત્ર બભૂવાતીવ નારદ ।
સર્વેષાં દુઃખનાશોઽભૂદ્રુદ્રઃ પ્રાપાપિ સમ્મુદમ્ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવાશિવસંવાદવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૦. ત્રિંશોઽધ્યાયઃ । પાર્વતીપ્રત્યાગમનમહોત્સવઃ ।

નારદ ઉવાચ ।
વિધે તાત મહાભાગ ધન્યસ્ત્વં પરમાર્થદૃક્ ।
અદ્ભુતેયં કથાશ્રાવિ ત્વદનુગ્રહતો મયા ॥ ૧॥

ગતે હરે સ્વશૈલે હિ પાર્વતી સર્વમઙ્ગલા ।
કિં ચકાર ગતા કુત્ર તન્મે વદ મહામતે ॥ ૨॥

બ્રહ્મોવાચ ।
શ‍ૃણુ સુપ્રીતિતસ્તાત યજ્જાતં તદનન્તરમ્ ।
હરે ગતે નિજસ્થાને તદ્ વદામિ શિવં સ્મરન્ ॥ ૩॥

પાર્વત્યપિ સખીયુક્તા રૂપં કૃત્વા તુ સાર્થકમ્ ।
જગામ સ્વપિતુર્ગેહં મહાદેવેતિ વાદિની ॥ ૪॥

પાર્વત્યાગમનં શ્રુત્વા મેના ચ સ હિમાચલઃ ।
દિવ્યં યાનં સમારુહ્ય પ્રયયૌ હર્ષવિહ્વલઃ ॥ ૫॥

પુરોહિતશ્ચ પૌરાશ્ચ સખ્યશ્ચૈવાપ્યનેકશઃ ।
સમ્બન્ધિનસ્તથાન્યે ચ સર્વે તે ચ સમાયયુઃ ॥ ૬॥

ભ્રાતરઃ સકલા જગ્મુર્મૈનાકપ્રમુખાસ્તદા ।
જયશબ્દં પ્રબ્રુવન્તો મહાહર્ષસમન્વિતાઃ ॥ ૭॥

સંસ્થાપ્ય મઙ્ગલઘટં રાજવર્ત્મનિ રાજિતે ।
ચન્દનાગરુકસ્તૂરીફલશાખાસમન્વિતે ॥ ૮॥

સુપુરોધાબ્રાહ્મણૈશ્ચ મુનિભિર્બ્રહ્મવાદિભિઃ ।
નારીભિર્નર્તકીભિશ્ચ ગજેન્દ્રાદિસુશોભિતૈઃ ॥ ૯॥

પરિતઃ પરિતો રમ્ભાસ્તમ્ભવૃન્દસમન્વિતે ।
પતિપુત્રવતીયોષિત્સમૂહૈર્દીપહસ્તકૈઃ ॥ ૧૦॥

દ્વિજવૃન્દૈશ્ચ સંયુક્તે કુર્વદ્ભિર્મઙ્ગલધ્વનિમ્ ।
નાનાપ્રકારવાદ્યૈશ્ચ શઙ્ખધ્વનિભિરન્વિતે ॥ ૧૧॥

એતસ્મિન્નન્તરે દુર્ગાજગામ સ્વપુરાન્તિકમ્ ।

વિશન્તી નગરં દેવી દદર્શ પિતરૌ પુનઃ ॥ ૧૨॥

સુપ્રસન્નૌ પ્રધાવન્તૌ હર્ષવિહ્વલમાનસૌ ।
દૃષ્ટ્વા કાલી સુપ્રહૃષ્ટા સ્વાલિભિઃ પ્રણનામ તૌ ॥ ૧૩॥

તૌ સમ્પૂર્ણાશિષં દત્ત્વા ચક્રતુસ્તૌ સ્વવક્ષસિ ।
હે વત્સે ત્વેવમુચ્ચાર્ય રુદન્તૌ પ્રેમવિહ્વલૌ ॥ ૧૪॥

તતઃ સ્વકીયા અપ્યસ્યા અન્યા નાર્યોઽપિ સમ્મુદા ।
ભ્રાતૃસ્ત્રિયોઽપિ સુપ્રીત્યા દૃઢાલિઙ્ગનમાદધુઃ ॥ ૧૫॥

સાધિતં હિ ત્વયા સમ્યક્ સુકાર્યં કુલતારણમ્ ।
ત્વત્સદાચરણેનાપિ પાવિતાઃ સ્માખિલા વયમ્ ॥ ૧૬॥

ઇતિ સર્વે સુપ્રશંસ્ય પ્રણેમુસ્તાં પ્રહર્ષિતાઃ ।
ચન્દનૈઃ સુપ્રસૂનૈશ્ચ સમાનર્ચુઃ શિવાં મુદા ॥ ૧૭॥

તસ્મિન્નવસરે દેવા વિમાનસ્થા મુદામ્બરે ।
પુષ્પવૃષ્ટિં શુભાં ચક્રુર્નત્વા તાં તુષ્ટુવુઃ સ્તવૈઃ ॥ ૧૮॥

તદા તાં ચ રથે સ્થાપ્ય સર્વે શોભાન્વિતે વરે ।
પુરં પ્રવેશયામાસુઃ સર્વે વિપ્રાદયો મુદા ॥ ૧૯॥

અથ વિપ્રાઃ પુરોધાશ્ચ સખ્યોઽન્યાશ્ચ સ્ત્રિયઃ શિવમ્ ।
ગૃહં પ્રવેશયામાસુર્બહુમાનપુરસ્સરમ્ ॥ ૨૦॥

સ્ત્રિયો નિર્મઞ્છનં ચક્રુર્વિપ્રા યુયુજુરાશિષઃ ।
હિમવાન્મેનકા માતા મુમોદાતિ મુનીશ્વર ॥ ૨૧॥

સ્વાશ્રમં સફલં મેને કુપુત્રાત્પુત્રિકા વરા ।
હિમવાન્નારદં ત્વાં ચ સંસ્તુવન્ સાધુ સાધ્વિતિ ॥ ૨૨॥

બ્રાહ્મણેભ્યશ્ચ બન્દિભ્યઃ પર્વતેન્દ્રો ધનં દદૌ ।
મઙ્ગલં પાઠયામાસ સ દ્વિજેભ્યો મહોત્સવમ્ ॥ ૨૩॥

એવં સ્વકન્યયા હૃષ્ટૌ પિતરૌ ભ્રાતરસ્તથા ।
જામયશ્ચ મહાપ્રીત્યા સમૂષુઃ પ્રાઙ્ગણે મુને ॥ ૨૪॥

તતઃ સ હિમવાન્ તાત સુપ્રહૃષ્ટાઃ પ્રસન્નધીઃ ।
સમ્માન્ય સકલાન્પ્રીત્યા સ્નાતું ગઙ્ગાં જગામ હ ॥ ૨૨॥

એતસ્મિન્નન્તરે શમ્ભુઃ સુલીલો ભક્તવત્સલઃ ।
સુનર્તકનટો ભૂત્વા મેનકાસન્નિધિં યયૌ ॥ ૨૬॥

શૃઙ્ગં વામે કરે ધૃત્વા દક્ષિણે ડમરું તથા ।
પૃષ્ઠે કન્થાં રક્તવાસા નૃત્યગાનવિશારદઃ ॥ ૨૭॥

તતસ્સુનટરૂપોઽસૌ મેનાયા પ્રાઙ્ગણે મુદા ।
ચક્રે સુનૃત્યં વિવિધં ગાનં ચાતિમનોહરમ્ ॥ ૨૮॥

શૃઙ્ગં ચ ડમરું તત્ર વાદયામાસ સુધ્વનિમ્ ।
મહતીં વિવિધાં તત્ર સ ચકાર મનોહરામ્ ॥ ૨૯॥

તાં દ્રષ્ટું નાગરાઃ સર્વે પુરુષાશ્ચ સ્ત્રિયસ્તથા ।
આજગ્મુઃ સહસા તત્ર બાલા વૃદ્ધા અપિ ધ્રુવમ્ ॥ ૩૦॥

શ્રુત્વા સુગીતં તદ્દૃષ્ટ્વા સુનૃત્યં ચ મનોહરમ્ ।
સહસા મુમુહુઃ સર્વે મેનાપિ ચ તદા મુને ॥ ૩૧॥

મૂર્ચ્છાં સમ્પ્રાપ સા દુર્ગા વિલોક્ય હૃદિ શઙ્કરમ્ ।
ત્રિશૂલાદિકચિહ્નાનિ બિભ્રતં ચાતિસુન્દરમ્ ॥ ૩૨॥

વિભૂતિભૂષિતં રમ્યમસ્થિમાલાસમન્વિતમ્ ।
ત્રિલોચનોજ્જ્વલદ્વક્ત્રં નાગયજ્ઞોપવીતકમ્ ॥ ૩૩॥

વરં વૃણ્વિત્યુક્તવન્તં ગૌરવર્ણં મહેશ્વરમ્ ।
દીનબન્ધુ દયાસિન્ધું સર્વથા સુમનોહરમ્ ॥ ૩૪॥

હૃદયસ્થં હરં દૃષ્ટ્વેદૃશં સા પ્રણનામ તમ્ ।
વરં વવ્રે માનસં હિ પતિર્મે ત્વં ભવેતિ ચ ॥ ૩૫॥

વરં દત્ત્વા શિવાં ચાથ તાદૃશં પ્રીતિતો હૃદા ।
અન્તર્ધાય પુનસ્તત્ર સુનનર્ત સ ભિક્ષુકઃ ॥ ૩૬॥

તતો મેના સુરત્નાનિ સ્વર્ણપાત્રસ્થિતાનિ ચ ।
તસ્મૈ દાતું યયૌ પ્રીત્યા તદ્ભૂતિપ્રીતમાનસઃ ॥ ૩૭॥

તાનિ ન સ્વીચકારાસૌ ભિક્ષાં યાચે શિવાં ચ તામ્ ।
પુનઃ સુનૃત્યં ગાનશ્ચ કૌતુકાત્કર્તુમુદ્યતઃ ॥ ૩૮॥

મેના તદ્વચનં શ્રુત્વા ચુકોપાતિ સુવિસ્મિતા ।
ભિક્ષુકં ભર્ત્સયામાસ બહિષ્કર્તુમિયેષ સા ॥ ૩૯॥

એતસ્મિન્નન્તરે તત્ર ગઙ્ગાતો ગિરિરાયયૌ ।
દદર્શ પુરતો ભિક્ષું પ્રાઙ્ગણસ્થં નરાકૃતિમ્ ॥ ૪૦॥

શ્રુત્વા મેનામુખાદ્ વૃત્તં તત્સર્વં સુચુકોપ સઃ ।
આજ્ઞાં ચકારાનુચરાન્બહિષ્કર્તુઞ્ચ તં નટમ્ ॥ ૪૧॥

મહાગ્નિમિવ દુઃસ્પર્શં પ્રજ્વલન્તં સુતેજસમ્ ।
ન શશાક બહિષ્કર્તું કોઽપિ તં મુનિસત્તમ ॥ ૪૨॥

તતઃ સ ભિક્ષુકસ્તાત નાનાલીલાવિશારદઃ ।
દર્શયામાસ શૈલાય સ્વપ્રભાવમનન્તકમ્ ॥ ૪૩॥

શૈલો દદર્શ તં તત્ર વિષ્ણુરૂપધરં દ્રુતમ્ ।
કિરીટિનં કુણ્ડલિનં પીતવસ્ત્રં ચતુર્ભુજમ્ ॥ ૪૪॥

યદ્યત્પુષ્પાદિકં દત્તં પૂજાકાલે ગદાભૃતે ।
ગાત્રે શિરસિ તત્સર્વં ભિક્ષુકસ્ય દદર્શ હ ॥ ૪૫॥

તતો દદર્શ જગતાં સ્રષ્ટારં સ ચતુર્મુખમ્ ।
રક્તવર્ણં પઠન્તં ચ શ્રુતિસૂક્તં ગિરીશ્વરઃ ॥ ૪૬॥

તતઃ સૂર્યસ્વરૂપં ચ જગચ્ચક્ષુસ્સ્વરૂપકમ્ ।
દદર્શ ગિરિરાજઃ સ ક્ષણં કૌતુકકારિણમ્ ॥ ૪૭॥

તતો દદર્શ તં તાત રુદ્રરૂપં મહાદ્ભુતમ્ ।
પાર્વતી સહિતં રમ્યં વિહસન્તં સુતેજસમ્ ॥ ૪૮॥

તતસ્તેજસ્સ્વરૂપં ચ નિરાકારં નિરઞ્જનમ્ ।
નિરુપાધિં નિરીહં ચ મહાદ્ભુતમરૂપકમ્ ॥ ૪૯॥

એવં બહૂનિ રૂપાણિ તસ્ય તત્ર દદર્શ સઃ ।
સુવિસ્મિતો બભૂવાશુ પરમાનન્દસંયુતઃ ॥ ૫૦॥

અથાસૌ ભિક્ષુવર્યો હિ તસ્માત્તસ્યાશ્ચ સૂતિકૃત્ ।
ભિક્ષાં યયાચે દુર્ગાં તાં નાન્યજ્જગ્રાહ કિઞ્ચન ॥ ૫૧॥

ન સ્વીચકાર શૈલેન્દ્રો મોહિતશ્શિવમાયયા ।
ભિક્ષુઃ કિઞ્ચિન્ન જગ્રાહ તત્રૈવાન્તર્દધે તતઃ ॥ ૫૨॥

તદા બભૂવ સુજ્ઞાનં મેનાશૈલેશયોરિતિ ।

આવાં શિવો વઞ્ચયિત્વા સ્વસ્થાનં ગતવાન્પ્રભુઃ ॥ ૫૩॥

તયોર્વિચિન્ત્ય તત્રૈવં શિવે ભક્તિરભૂત્પરા ।
મહામોક્ષકરી દિવ્યા સર્વાનન્દપ્રદાયિની ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પાર્વતીપ્રત્યાગમનમહોત્સવવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૧. એકત્રિંશોઽધ્યાયઃ । શિવમાયાવર્ણનમ્ ।

બ્રહ્મોવાચ ।
તયોર્ભક્તિં શિવે જ્ઞાત્વા પરામવ્યભિચારિણીમ્ ।
સર્વે શક્રાદયો દેવાશ્ચિચિન્તુરિતિ નારદ ॥ ૧॥

દેવા ઊચુઃ ।
એકાન્તભક્ત્યા શૈલશ્ચેત્કન્યાં તસ્મૈ પ્રદાસ્યતિ ।
ધ્રુવં નિર્વાણતાં સદ્યઃ સ પ્રાપ્સ્યતિ ચ ભારતે ॥ ૨॥

અનન્તરત્નાધારશ્ચેત્પૃથ્વીં ત્યક્ત્વા પ્રયાસ્યતિ ।
રત્નગર્ભાભિધા ભૂમિર્મિથ્યૈવ ભવિતા ધ્રુવમ્ ॥ ૩॥

સ્થાવરત્વં પરિત્યજ્ય દિવ્યરૂપં વિધાય સઃ ।
કન્યાં શૂલભૃતે દત્ત્વા શિવલોકં ગમિષ્યતિ ॥ ૪॥

મહાદેવસ્ય સારૂપ્યં લપ્સ્યતે નાત્ર સંશયઃ ।
તત્ર ભુક્ત્વા વરાન્ભોગાંસ્તતો મોક્ષમવાપ્સ્યતિ ॥ ૫॥

બ્રહ્મોવાચ ।
ઇત્યાલોચ્ય સુરાઃ સર્વે કૃત્વા ચામન્ત્રણં મિથઃ ।
પ્રસ્થાપયિતુમૈચ્છંસ્તે ગુરું તત્ર સુવિસ્મિતાઃ ॥ ૬॥

તતઃ શક્રાદયો દેવાઃ સર્વે ગુરુનિકેતનમ્ ।
જગ્મુઃ પ્રીત્યા સવિનયા નારદ સ્વાર્થસાધકાઃ ॥ ૭॥

ગત્વા તત્ર ગુરું નત્વા સર્વે દેવાઃ સવાસવાઃ ।
ચક્રુર્નિવેદનં તસ્મૈ ગુરવે વૃત્તમાદરાત્ ॥ ૮॥

દેવા ઊચુઃ ।
ગુરો હિમાલયગૃહં ગચ્છાસ્મત્કાર્યસિદ્ધયે ।
તત્ર ગત્વા પ્રયત્નેન કુરુ નિન્દાં ચ શૂલિનઃ ॥ ૯॥

પિનાકિના વિના દુર્ગા વરં નાન્યં વરિષ્યતિ ।
અનિચ્છયા સુતાં દત્ત્વા ફલં તૂર્ણં લભિષ્યતિ ॥ ૧૦॥

કાલેનૈવાધુના શૈલ ઇદાનીં ભુવિ તિષ્ઠતુ ।
અનેકરત્નાધારં તં સ્થાપય ત્વં ક્ષિતૌ ગુરૌ ॥ ૧૧॥

બ્રહ્મોવાચ ।
ઇતિ દેવવચઃ શ્રુત્વા પ્રદદૌ કર્ણયોઃ કરમ્ ।
ન સ્વીચકાર સ ગુરુઃ સ્મરન્નામ શિવેતિ ચ ॥ ૧૨॥

અથ સ્મૃત્વા મહાદેવં બૃહસ્પતિરુદારધીઃ ।
ઉવાચ દેવવર્યાંશ્ચ ધિક્કૃત્વા ચ પુનઃ પુનઃ ॥ ૧૩॥

બૃહસ્પતિરુવાચ ।
સર્વે દેવાઃ સ્વાર્થપરાઃ પરાર્થધ્વંસકારકાઃ ।
કૃત્વા શઙ્કરનિન્દાં હિ યાસ્યામિ નરકં ધ્રુવમ્ ॥ ૧૪॥

કશ્ચિન્મધ્યે ચ યુષ્માકં ગચ્છેચ્છૈલાન્તિકં સુરાઃ ।
સમ્પાદયેત્સ્વાભિમતં શૈલેન્દ્રં પ્રતિબોધ્ય ચ ॥ ૧૫॥

અનિચ્છયા સુતાં દત્ત્વા સુખં તિષ્ઠતુ ભારતે ।
તસ્મૈ ભક્ત્યા સુતાં દત્ત્વા મોક્ષં પ્રાપ્સ્યતિ નિશ્ચિતમ્ ॥ ૧૬॥

પશ્ચાત્સપ્તર્ષયઃ સર્વે બોધયિષ્યન્તિ પર્વતમ્ ।
પિનાકિના વિના દુર્ગા વરં નાન્યં વરિષ્યતિ ॥ ૧૭॥

અથવા ગચ્છત સુરા બ્રહ્મલોકં સવાસવાઃ ।
વૃત્તં કથયત સ્વં તત્સ વઃ કાર્યં કરિષ્યતિ ॥ ૧૮॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા તે સમાલોચ્યાજગ્મુર્મમ સભાં સુરાઃ ।
સર્વે નિવેદયાઞ્ચક્રુર્નત્વા તદ્વૃતમાદરાત્ ॥ ૧૯॥

દેવાનાં તદ્વચઃ શ્રુત્વા શિવનિન્દાકરં તદા ।
વેદવક્તા વિલપ્યાહં તાનવોચં સુરાન્મુને ॥ ૨૦॥

બ્રહ્મોવાચ ।
નાહં કર્તું ક્ષમો વત્સાઃ શિવનિન્દાં સુદુસ્સહામ્ ।
સમ્પદ્વિનાશરૂપાઞ્ચ વિપદાં બીજરૂપિણીમ્ ॥ ૨૧॥

સુરા ગચ્છત કૈલાસં સન્તોષયત શઙ્કરમ્ ।
પ્રસ્થાપયત તં શીઘ્રં હિમાલયગૃહં પ્રતિ ॥ ૨૨॥

સ ગચ્છેદુપશૈલેશમાત્મનિન્દાં કરોતુ વૈ ।
પરનિન્દા વિનાશાય સ્વનિન્દા યશસે મતા ॥ ૨૩॥

બ્રહ્મોવાચ ।
શ્રુત્વેતિ મદ્વચો દેવા માં પ્રણમ્ય મુદા ચ તે ।
કૈલાસં પ્રયયુઃ શીઘ્રં શૈલાનામધિપં ગિરિમ્ ॥ ૨૪॥

તત્ર ગત્વા શિવં દૃષ્ટ્વા પ્રણમ્ય નતમસ્તકાઃ ।
સુકૃતાઞ્જલયઃ સર્વે તુષ્ટુવુસ્તં સુરા હરમ્ ॥ ૨૫॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
વયં ત્વાં શરણાપન્નાઃ કૃપાં કુરુ નમોઽસ્તુ તે ॥ ૨૬॥

ત્વં ભક્તવત્સલઃ સ્વામિન્ભક્તકાર્યકરઃ સદા ।
દીનોદ્ધરઃ કૃપાસિન્ધુર્ભક્તાપદ્વિનિમોચકઃ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુત્વા મહેશાનં સર્વે દેવાઃ સવાસવાઃ ।
સર્વં નિવેદયાઞ્ચક્રુસ્તદ્વૃત્તં તત આદરાત્ ॥ ૨૮॥

તચ્છ્રુત્વા દેવવચનં સ્વીચકાર મહેશ્વરઃ ।
દેવાન્ સુયાપયામાસ તાનાશ્વાસ્ય વિહસ્ય સઃ ॥ ૨૯॥

દેવા મુમુદિરે સર્વે શીઘ્રં ગત્વા સ્વમન્દિરમ્ ।
સિદ્ધં મત્વા સ્વકાર્યં હિ પ્રશંસન્તઃ સદાશિવમ્ ॥ ૩૦॥

તતઃ સ ભગવાઞ્છમ્ભુર્મહેશો ભક્તવત્સલઃ ।
પ્રયયૌ શૈલભૂપઞ્ચ માયેશો નિર્વિકારવાન્ ॥ ૩૧॥

યદા શૈલઃ સભામધ્યે સમુવાસ મુદાન્વિતઃ ।
બન્ધુવર્ગૈઃ પરિવૃતઃ પાર્વતીસહિતઃ સ્વયમ્ ॥ ૩૨॥

એતસ્મિન્નન્તરે તત્ર હ્યાજગામ સદાશિવઃ ।
દણ્ડી છત્રી દિવ્યવાસા બિભ્રત્તિલકમુજ્જ્વલમ્ ॥ ૩૩॥

કરે સ્ફટિકમાલાં ચ શાલગ્રામં ગલે દધત્ ।
જપન્નામ હરેર્ભક્ત્યા સાધુવેષધરો દ્વિજઃ ॥ ૩૪॥

તં ચ દૃષ્ટ્વા સમુત્તસ્થૌ સગણોઽપિ હિમાલયઃ ।
નનામ દણ્ડવદ્ભૂમૌ ભક્ત્યાતિથિમપૂર્વકમ્ ॥ ૩૫॥

નનામ પાર્વતી ભક્ત્યા પ્રાણેશં વિપ્રરૂપિણમ્ ।
જ્ઞાત્વા તં મનસા દેવી તુષ્ટાવ પરયા મુદા ॥ ૩૬॥

આશિષં યુયુજે વિપ્રઃ સર્વેષાં પ્રીતિતશ્શિવઃ ।
શિવાયા અધિકં તાત મનોઽભિલષિતં હૃદા ॥ ૩૭॥

મધુપર્કાદિકં સર્વં જગ્રાહ બ્રાહ્મણો મુદા ।
દત્તં શૈલાધિરાજેન હિમાગેન મહાદરાત્ ॥ ૩૮॥

પપ્રચ્છ કુશલં ચાસ્ય હિમાદ્રિઃ પર્વતોત્તમઃ ।
તં દ્વિજેન્દ્રં મહાપ્રીત્યા સમ્પૂજ્ય વિધિવન્મુને ॥ ૩૯॥

પુનઃ પપ્રચ્છ શૈલેશસ્તં તતઃ કો ભવાનિતિ ।
ઉવાચ શીઘ્રં વિપ્રેન્દ્રો ગિરીન્દ્રં સાદરં વચઃ ॥ ૪૦॥

વિપ્રેન્દ્ર ઉવાચ ।
બ્રાહ્મણોઽહં ગિરિશ્રેષ્ઠ વૈષ્ણવો બુધસત્તમઃ ।
ઘટિકીં વૃત્તિમાશ્રિત્ય ભ્રમામિ ધરણીતલે ॥ ૪૧॥

મનોયાયી સર્વગામી સર્વજ્ઞોઽહં ગુરોર્બલાત્ ।
પરોપકારી શુદ્ધાત્મા દયાસિન્ધુર્વિકારહા ॥ ૪૨॥

મયા જ્ઞાતં હરાય ત્વં સ્વસુતાં દાતુમિચ્છસિ ।
ઇમાં પદ્મસમાં દિવ્યાં વરરૂપાં સુલક્ષણામ્ ॥ ૪૩॥

નિરાશ્રયાયાસઙ્ગાય કુરૂપાયાગુણાય ચ ।
શ્મશાનવાસિને વ્યાલગ્રાહિરૂપાય યોગિને ॥ ૪૪॥

દિગ્વાસસે કુગાત્રાય વ્યાલભૂષણધારિણે ।

અજ્ઞાતકુલનામ્ને ચ કુશીલાયાવિહારિણે ॥ ૪૫॥

વિભૂતિદિગ્ધદેહાય સઙ્ક્રુદ્ધાયાવિવેકિને ।
અજ્ઞાતવયસેઽતીવ કુજટાધારિણે સદા ॥ ૪૬॥

સર્વાશ્રયાય ભ્રમિણે નાગહારાય ભિક્ષવે
કુમાર્ગનિરતાયાથ વેદાઽધ્વત્યાગિને હઠાત્ । ૪૭॥

ઇયં તે બુદ્ધિરચલ ન હિ મઙ્ગલદા ખલુ ।
વિબોધ જ્ઞાનિનાં શ્રેષ્ઠ નારાયણકુલોદ્ભવ ॥ ૪૮॥

ન તે પાત્રાનુરૂપશ્ચ પાર્વતીદાનકર્મણિ ।
મહાજનઃ સ્મેરમુખઃ શ્રુતમાત્રાદ્ભવિષ્યતિ ॥ ૪૯॥

પશ્ય શૈલાધિપ ત્વં ચ ન તસ્યૈકોઽસ્તિ બાન્ધવઃ ।
મહારત્નાકરઃ ત્વં ચ તસ્ય કિઞ્ચિદ્ધનં ન હિ ॥ ૫૦॥

બાન્ધવાન્મેનકાં ક્ષ્માપતે શીઘ્રં સુતાંસ્તથા ।
સર્વાન્પૃચ્છ પ્રયત્નેન પણ્ડિતાન્પાર્વતીં વિના ॥ ૫૧॥

રોગિણો નૌષધં શશ્વદ્રોચતે ગિરિસત્તમ ।
કુપથ્યં રોચતેઽભીક્ષ્ણં મહાદોષકરં સદા ॥ ૫૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા બ્રાહ્મણઃ શીઘ્રં સ વૈ ભુક્ત્વા મુદાન્વિતઃ ।
જગામ સ્વાલયં શાન્તો નાનાલીલાકરશ્શિવઃ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવમાયાવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । સપ્તર્ષ્યાગમનમ્ ।

બ્રહ્મોવાચ ।
બ્રાહ્મણસ્ય વચઃ શ્રુત્વા મેનોવાચ હિમાલયમ્ ।

શોકેનસાધુનયના હૃદયેન વિદૂયતા ॥ ૧॥

મેનોવાચ ।
શ઼ૃણુ શૈલેન્દ્ર મદ્વાક્યં પરિણામે સુખાવહમ્ ।
પૃચ્છ શૈવવરાન્સર્વાન્કિમુક્તં બ્રાહ્મણેન હ ॥ ૨॥

નિન્દાનેન કૃતા શમ્ભોર્વૈષ્ણવેન દ્વિજન્મના ।
શ્રુત્વા તાં મે મનોઽતીવ નિર્વિણ્ણં હિ નગેશ્વર ॥ ૩॥

તસ્મૈ રુદ્રાય શૈલેશ ન દાસ્યામિ સુતામહમ્ ।
કુરૂપશીલનામ્ને હિ સુલક્ષણયુતાં નિજામ્ ॥ ૪॥

ન મન્યસે વચો ચેન્મે મરિષ્યામિ ન સંશયઃ ।
ત્યક્ષ્યામિ ચ ગૃહં સદ્યો ભક્ષયિષ્યામિ વા વિષમ્ ॥ ૫॥

ગલે બદ્ધ્વામ્બિકાં રજ્જ્વા યાસ્યામિ ગહનં વનમ્ ।
મહામ્બુધૌ મજ્જયિષ્યે તસ્મૈ દાસ્યામિ નો સુતામ્ ॥ ૬॥

ઇત્યુક્ત્વાશુ તથા ગત્વા મેના કોપાલયં શુચા ।
ત્યક્ત્વા હારં રુદન્તી સા ચકાર શયનં ભુવિ ॥ ૭॥

એતસ્મિન્નન્તરે તાત શમ્ભુના સપ્ત એવ તે ।
સંસ્મૃતા ઋષયઃ સદ્યો વિરહવ્યાકુલાત્મના ॥ ૮॥

ઋષયશ્ચૈવ તે સર્વે શમ્ભુના સંસ્મૃતા યદા ।
તદાજગ્મુઃ સ્વયં સદ્યઃ કલ્પવૃક્ષા ઇવાપરે ॥ ૯॥

અરુન્ધતી તથાયાતા સાક્ષાત્સિદ્ધિરિવાપરા ।
તાન્દૃષ્ટ્વા સૂર્યસઙ્કાશાન્વિજહૌ સ્વજપં હરઃ ॥ ૧૦॥

સ્થિત્વાગ્રે ઋષયઃ શ્રેષ્ઠા નત્વા સ્તુત્વા શિવં મુને ।
મેનિરે ચ તદાત્માનં કૃતાર્થં તે તપસ્વિનઃ ॥ ૧૧॥

તતો વિસ્મયમાપન્ના નમસ્કૃત્ય સ્થિતાઃ પુનઃ ।
પ્રોચુઃ પ્રાઞ્જલયસ્તે વૈ શિવં લોકનમસ્કૃતમ્ ॥ ૧૨॥

ઋષય ઊચુઃ ।
સર્વોત્કૃષ્ટ મહારાજ સાર્વભૌમ દિવૌકસામ્ ।
સ્વભાગ્યં વર્ણ્યતેઽસ્માભિઃ કિં પુનઃ સકલોત્તમમ્ ॥ ૧૩॥

તપસ્તમં ત્રિધા પૂર્વં વેદાધ્યયનમુત્તમમ્ ।

અગ્નયશ્ચ હુતાઃ પૂર્વં તીર્થાનિ વિવિધાનિ ચ ॥ ૧૪॥

વાઙ્મનઃ કાયજં કિઞ્ચિત્પુણ્યં સ્મરણસમ્ભવમ્ ।
તત્સર્વં સઙ્ગતં ચાદ્ય સ્મરણાનુગ્રહાત્તવ ॥ ૧૫॥

યો વૈ ભજતિ નિત્યં ત્વાં કૃતકૃત્યો ભવેન્નરઃ ।
કિં પુણ્યં વર્ણ્યતે તેષાં યેષાં ચ સ્મરણં તવ ॥ ૧૬॥

સર્વોત્કૃષ્ટા વયં જાતાઃ સ્મરણાત્તે સદાશિવ ।
મનોરથપથં નૈવ ગચ્છસિ ત્વં કથઞ્ચન ॥ ૧૭॥

વામનસ્ય ફલં યદ્વજ્જન્માન્ધસ્ય દૃશૌ યથા ।
વાચાલત્વઞ્ચ મૂકસ્ય રઙ્કસ્ય નિધિદર્શનમ્ ॥ ૧૮॥

પઙ્ગોર્ગિરિવરાક્રાન્તિર્વન્ધ્યાયાઃ પ્રસવસ્તથા ।
દર્શનં ભવતસ્તદ્વજ્જાતં નો દુર્લભં પ્રભો ॥ ૧૯॥

અદ્યપ્રભૃતિ લોકેષુ માન્યાઃ પૂજ્યા મુનીશ્વરાઃ ।
જાતાસ્તે દર્શનાદેવ સ્વમુચ્ચૈઃ પદમાશ્રિતાઃ ॥ ૨૦॥

અત્ર કિં બહુનોક્તેન સર્વથા માન્યતાં ગતાઃ ।
દર્શનાત્તવ દેવેશ સર્વદેવેશ્વરસ્ય હિ ॥ ૨૧॥

પૂર્ણાનાં કિઞ્ચ કર્તવ્યમસ્તિ ચેત્પરમા કૃપા ।
સદૃશં સેવકાનાં તુ દેયં કાર્યં ત્વયા શુભમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા તેષાં શમ્ભુર્મહેશ્વરઃ ।
લૌકિકાચારમાશ્રિત્ય રમ્યં વાક્યમુપાદદે ॥ ૨૩॥

શિવ ઉવાચ ।
ઋષયશ્ચ સદા પૂજ્યા ભવન્તશ્ચ વિશેષતઃ ।
યુષ્માકં કારણાદ્વિપ્રાઃ સ્મરણં ચ મયા કૃતમ્ ॥ ૨૪॥

મમાવસ્થા ભવદ્ભિશ્ચ જ્ઞાયતે હ્યુપકારિકા ।
સાધનીયા વિશેષેણ લોકાનાં સિદ્ધિહેતવે ॥ ૨૫॥

દેવાનાં દુઃખમુત્પન્નં તારકાત્સુદુરાત્મનઃ ।
બ્રહ્મણા ચ વરો દત્તઃ કિં કરોમિ દુરાસદઃ ॥ ૨૬॥

મૂર્તયોઽષ્ટૌ ચ યાઃ પ્રોક્તા મદીયાઃ પરમર્ષયઃ ।

તાઃ સર્વા ઉપકારાય ન તુ સ્વાર્થાય તત્સ્ફુટમ્ ॥ ૨૭॥

તથા ચ કર્તુકામોઽહં વિવાહં શિવયા સહ ।
તયા વૈ સુતપસ્તપ્તં દુષ્કરં પરમર્ષિભિઃ ॥ ૨૮॥

તસ્યૈ પરં ફલં દેયમભીષ્ટં તદ્ધિતાવહમ્ ।
એતાદૃશઃ પણો મે હિ ભક્તાનન્દપ્રદઃ સ્ફુટમ્ ॥ ૨૯॥

પાર્વતીવચનાદ્ભિક્ષુરૂપો યાતો ગિરેર્ગૃહમ્ ।
અહં પાવિતવાન્કાલીં યતો લીલાવિશારદઃ ॥ ૩૦॥

માં જ્ઞાત્વા તૌ પરં બ્રહ્મ દમ્પતી પરભક્તિતઃ ।
દાતુકામાવભૂતાં ચ સ્વસુતાં વેદરીતિતઃ ॥ ૩૧॥

દેવપ્રેરણયાહં વૈ કૃતવાનસ્મિ નિન્દનમ્ ।
તદા સ્વસ્ય ચ તદ્ભક્તિં વિહન્તું વૈષ્ણવાત્મના ॥ ૩૨॥

તચ્છ્રુત્વા તૌ સુનિર્વિણ્ણૌ તદ્ધીનૌ સમ્બભૂવતુઃ ।
સ્વકન્યાં નેચ્છતો દાતું મહ્યં હિ મુનયોઽધુના ॥ ૩૩॥

તસ્માદ્ભવન્તો ગચ્છન્તુ હિમાચલગૃહં ધ્રુવમ્ ।
તત્ર ગત્વા ગિરિવરં તત્પત્નીઞ્ચ પ્રબોધય ॥ ૩૪॥

કથનીયં પ્રયત્નેન વચનં વેદસમ્મિતમ્ ।
સર્વથા કરણીયં તદ્યથા સ્યાત્કાર્યમુત્તમમ્ ॥ ૩૫॥

ઉદ્વાહં કર્તુમિચ્છામિ તત્પુત્ર્યા સહ સત્તમાઃ ।
સ્વીકૃતસ્તદ્વિવાહો મે વરો દત્તશ્ચ તાદૃશઃ ॥ ૩૬॥

અત્ર કિં બહુનોક્તેન બોધનીયો હિમાલયઃ ।
તથા મેના ચ બોદ્ધવ્યા દેવાનાં સ્યાદ્ધિતં યથા ॥ ૩૭॥

ભવદ્ભિઃ કલ્પિતો યો વૈ વિધિઃ સ્યાદધિકસ્તતઃ ।
ભવતાઞ્ચૈવ કાર્યં તુ ભવન્તઃ કાર્યભાગિનઃ ॥ ૩૮॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા મુનયસ્તેઽમલાશયાઃ ।
આનન્દં લેભિરે સર્વે પ્રભુણાનુગ્રહીકૃતાઃ ॥ ૩૯॥

વયં ધન્યા અભૂવંશ્ચ કૃતકૃત્યાશ્ચ સર્વથા ।
વન્દ્યા જાતાશ્ચ સર્વેષાં પૂજનીયા વિશેષતઃ ॥ ૪૦॥

બ્રહ્મણા વિષ્ણુના યો વૈ વન્દ્યઃ સર્વાર્થસાધકઃ ।
સોઽસ્માન્પ્રેષયતે પ્રેષ્યાન્કાર્યે લોકસુખાવહે ॥ ૪૧॥

અયં વૈ જગતાં સ્વામી પિતા સા જનની મતા ।
અયં યુક્તશ્ચ સમ્બન્ધો વર્દ્ધતાં ચન્દ્રવત્સદા ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ઋષયો દિવ્યા નમસ્કૃત્ય શિવં તદા ।
ગતા આકાશમાર્ગેણ યત્રાસ્તિ હિમવત્પુરમ્ ॥ ૪૩॥

દૃષ્ટ્વા તાં ચ પુરીં દિવ્યાં ઋષયસ્તેઽતિવિસ્મિતાઃ ।
વર્ણયન્તશ્ચ સ્વં પુણ્યમબ્રુવન્વૈ પરસ્પરમ્ ॥ ૪૪॥

ઋષય ઊચુઃ ।
પુણ્યવન્તો વયં ધન્યા દૃષ્ટ્વૈતદ્ધિમવત્પુરમ્ ।
યસ્માદેવંવિધે કાર્યે શિવેનૈવ નિયોજિતાઃ ॥ ૪૫॥

અલકાયાશ્ચ સ્વર્ગાચ્ચ ભોગવત્યાસ્તથા પુનઃ ।
વિશેષેણામરાવત્યા દૃશ્યતે પુરમુત્તમમ્ ॥ ૪૬॥

સુગૃહાણિ સુરમ્યાણિ સ્ફટિકૈર્વિવિધૈર્વરૈઃ ।
મણિભિર્વા વિચિત્રાણિ રચિતાન્યઙ્ગણાનિ ચ ॥ ૪૭॥

સૂર્યકાન્તાશ્ચ મણયશ્ચન્દ્રકાન્તાસ્તથૈવ ચ ।
ગૃહે ગૃહે વિચિત્રાશ્ચ વૃક્ષાઃ સ્વર્ગસમુદ્ભવાઃ ॥ ૪૮॥

તોરણાનાં તથા લક્ષ્મીર્દૃશ્યતે ચ ગૃહે ગૃહે ।
વિવિધાનિ વિચિત્રાણિ શુકહંસૈર્વિમાનકૈઃ ॥ ૪૯॥

વિતાનાનિ વિચિત્રાણિ ચૈલવત્તોરણૈઃ સહ ।
જલાશયાન્યનેકાનિ દીર્ઘિકા વિવિધાઃ સ્થિતાઃ ॥ ૫૦॥

ઉદ્યાનાનિ વિચિત્રાણિ પ્રસન્નૈઃ પૂજિતાન્યથ ।
નરાશ્ચ દેવતાઃ સર્વે સ્ત્રિયશ્ચાપ્સરસસ્તથા ॥ ૫૧॥

કર્મભૂમૌ યાજ્ઞિકાશ્ચ પૌરાણાઃ સ્વર્ગકામ્યયા ।
કુર્વન્તિ તે વૃથા સર્વે વિહાય હિમવત્પુરમ્ ॥ ૫૨॥

યાવન્ન દૃષ્ટમેતચ્ચ તાવત્સ્વર્ગપરા નરાઃ ।

દૃષ્ટમેતદ્યદા વિપ્રાઃ કિં સ્વર્ગેણ પ્રયોજનમ્ ॥ ૫૩॥

બ્રહ્મોવાચ ।
ઇત્યેવમૃષિવર્યાસ્તે વર્ણયન્તઃ પુરઞ્ચ તત્ ।
ગતા હૈમાલયં સર્વે ગૃહં સર્વસમૃદ્ધિમત્ ॥ ૫૪॥

તાન્દૃષ્ટ્વા સૂર્યસઙ્કાશાન્ હિમવાન્વિસ્મિતોઽબ્રવીત્ ।
દૂરાદાકાશમાર્ગસ્થાન્મુનીન્સપ્ત સુતેજસઃ ॥ ૫૫॥

હિમવાનુવાચ ।
સપ્તૈતે સૂર્યસઙ્કાશાઃ સમાયાન્તિ મદન્તિકે ।
પૂજા કાર્યા પ્રયત્નેન મુનીનાં ચ મયાધુના ॥ ૫૬॥

વયં ધન્યા ગૃહસ્થાશ્ચ સર્વેષાં સુખદાયિનઃ ।
યેષાં ગૃહે સમાયાન્તિ મહાત્માનો યદીદૃશાઃ ॥ ૫૭॥

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે ચૈવાકાશાદેત્ય ભુવિ સ્થિતાન્ ।
સમ્મુખે હિમવાન્દૃષ્ટ્વા યયૌ માનપુરસ્સરમ્ ॥ ૫૮॥

કૃતાઞ્જલિર્નતસ્કન્ધઃ સપ્તર્ષીન્સુપ્રણમ્ય સઃ ।
પૂજાં ચકાર તેષાં વૈ બહુમાનપુરસ્સરમ્ ॥ ૫૯॥

હિતાઃ સપ્તર્ષયસ્તે ચ હિમવન્તં નગેશ્વરમ્ ।
ગૃહીત્વોચુઃ પ્રસન્નાસ્યા વચનં મઙ્ગલાલયમ્ ॥ ૬૦॥

યથાગ્રતશ્ચ તાન્કૃત્વા ધન્યો મમ ગૃહાશ્રમઃ ।
ઇત્યુક્ત્વાસનમાનીય દદૌ ભક્તિપુરસ્સરમ્ ॥ ૬૧॥

આસનેષૂપવિષ્ટેષુ તદાજ્ઞપ્તઃ સ્વયં સ્થિતઃ ।
ઉવાચ હિમવાંસ્તત્ર મુનીન્ જ્યોતિર્મયાંસ્તદા ॥ ૬૨॥

હિમાલય ઉવાચ ।
ધન્યો હિ કૃતકૃત્યોઽહં સફલં જીવિતં મમ ।
લોકેષુ દર્શનીયોઽહં બહુતીર્થસમો મતઃ ॥ ૬૩॥

યસ્માદ્ભવન્તો મદ્ગેહમાગતા વિષ્ણુરૂપિણઃ ।
પૂર્ણાનાં ભવતાં કાર્યં કૃપણાનાં ગૃહેષુ કિમ્ ॥ ૬૪॥

તથાપિ કિઞ્ચિત્કાર્યં ચ સદૃશં સેવકસ્ય મે ।

કથનીયં સુદયયા સફલં સ્યાજ્જનુર્મમ ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે સપ્તર્ષ્યાગમનવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૩. ત્રયસ્ત્રિંશોઽધ્યાયઃ । ગિરિસાન્ત્વનમ્ ।

ઋષય ઊચુઃ ।
જગત્પિતા શિવઃ પ્રોક્તો જગન્માતા શિવા મતા ।
તસ્માદ્દેયા ત્વયા કન્યા શઙ્કરાય મહાત્મને ॥ ૧॥

એવં કૃત્વા હિમગિરે સાર્થકં તે ભવેજ્જનુઃ ।
જગદ્ગુરોર્ગુરુસ્ત્વં હિ ભવિષ્યસિ ન સંશયઃ ॥ ૨॥

બ્રહ્મોવાચ ।
એવં વચનમાકર્ણ્ય સપ્તર્ષીણાં મુનીશ્વર ।
પ્રણમ્ય તાન્કરૌ બદ્ધ્વા ગિરિરાજોઽબ્રવીદિદમ્ ॥ ૩॥

હિમાલય ઉવાચ ।
સપ્તર્ષયો મહાભાગા ભવદ્ભિર્યદુદીરિતમ્ ।
તત્પ્રમાણીકૃતં મે હિ પુરૈવ ગિરિશેચ્છયા ॥ ૪॥

ઇદાનીમેક આગત્ય વિપ્રો વૈષ્ણવધર્મવાન્ ।
શિવમુદ્દિશ્ય સુપ્રીત્યા વિપરીતં વચોઽબ્રવીત્ ॥ ૫॥

તદારભ્ય શિવામાતા જ્ઞાનભ્રષ્ટા બભૂવ હ ।
સુતાવિવાહં રુદ્રેણ યોગિના તેન નેચ્છતિ ॥ ૬॥

કોપાગારમગાત્સા હિ સુતપ્તા મલિનામ્બરા ।
કૃત્વા મહાહઠં વિપ્રા બોધ્યમાનાપિ નાબુધત્ ॥ ૭॥

અહં ચ જ્ઞાનવિભ્રષ્ટો જાતોઽહં સત્યમીર્યતે ।
દાતું સુતાં મહેશાય નેચ્છામિ ભિક્ષુરૂપિણે ॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા શૈલરાજસ્તુ શિવમાયાવિમોહિતઃ ।
તૂષ્ણીં બભૂવ તત્રસ્થો મુનીનાં મધ્યતો મુને ॥ ૯॥

સર્વે સપ્તર્ષયસ્તે હિ શિવમાયાં પ્રશસ્ય વૈ ।
પ્રેષયામાસુરથ તાં મેનકાં પ્રત્યરુન્ધતીમ્ ॥ ૧૦॥

અથ પત્યુઃ સમાદાય નિદેશં જ્ઞાનદા હિ સા ।
જગામારુન્ધતી તૂર્ણં યત્ર મેના ચ પાર્વતી ॥ ૧૧॥

ગત્વા દદર્શ મેનાં તાં શયાનાં શોકમૂર્ચ્છિતામ્ ।
ઉવાચ મધુરં સાધ્વી સાવધાના હિતં વચઃ ॥ ૧૨॥

અરુન્ધત્યુવાચ ।
ઉત્તિષ્ઠ મેનકે સાધ્વિ ત્વદ્ગૃહેઽહમરુન્ધતી ।
આગતા મુનયશ્ચાપિ સપ્તાયાતાઃ કૃપાલવઃ ॥ ૧૩॥

બ્રહ્મોવાચ ।
અરુન્ધતીસ્વરં શ્રુત્વા શીઘ્રમુત્થાય મેનકા ।
ઉવાચ શિરસા નત્વા તાં પદ્મામિવ તેજસા ॥ ૧૪॥

મેનોવાચ ।
અહોઽદ્ય કિમિદં પુણ્યમસ્માકં પુણ્યજન્મનામ્ ।
વધૂર્જગદ્વિધેઃ પત્ની વસિષ્ઠસ્યાગતેહ વૈ ॥ ૧૫॥

કિમર્થમાગતા દેવિ તન્મે બ્રૂહિ વિશેષતઃ ।
અહં દાસીસમા તે હિ સસુતા કરુણાં કુરુ ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા મેનકા સાધ્વી બોધયિત્વા ચ તાં બહુ ।
તત્રાગતા ચ સુપ્રીત્યા યત્ર સપ્તર્ષયોઽપિ તે ॥ ૧૭॥

અથ શૈલેશ્વરં તે ચ બોધયામાસુરાદરાત્ ।
સ્મૃત્વા શિવપદદ્વન્દ્વં સર્વે વાક્યવિશારદાઃ ॥ ૧૮॥

ઋષય ઊચુઃ ।
શૈલેન્દ્ર શ્રૂયતાં વાક્યમસ્માકં શુભકારણમ્ ।
શિવાય પાર્વતીં દેહિ સંહર્તુઃ શ્વશુરો ભવ ॥ ૧૯॥

અયાચિતારં સર્વેશં પ્રાર્થયામાસ યત્નતઃ ।
તારકસ્ય વિનાશાય બ્રહ્મા સમ્બન્ધકર્મણિ ॥ ૨૦॥

નોત્સુકો દારસંયોગે શઙ્કરો યોગિનાં વરઃ ।
વિધેઃ પ્રાર્થનયા દેવસ્તવ કન્યાં ગ્રહીષ્યતિ ॥ ૨૧॥

દુહિતુસ્તે તપસ્તપ્તં પ્રતિજ્ઞાનં ચકાર સા ।
હેતુદ્વયેન યોગીન્દ્રો વિવાહં ચ કરિષ્યતિ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઋષીણાં વચનં શ્રુત્વા પ્રહસ્ય સ હિમાલયઃ ।
ઉવાચ કિઞ્ચિદ્ભીતસ્તુ પરં વિનયપૂર્વકમ્ ॥ ૨૩॥

હિમાલય ઉવાચ ।
શિવસ્ય રાજસામગ્રીં ન હિ પશ્યામિ કાઞ્ચન ।
કઞ્ચિદાશ્રયમૈશ્વર્યં કં વા સ્વજનબાન્ધવમ્ ॥ ૨૪॥

નેચ્છામ્યતિ વિનિર્લિપ્તયોગિને સ્વાં સુતામહમ્ ।
યૂયં વેદવિધાતુશ્ચ પુત્રા વદત નિશ્ચિતમ્ ॥ ૨૫॥

વરાયાનનુરૂપાય પિતા કન્યાં દદાતિ ચેત્ ।
કામાન્મોહાદ્ભયાલ્લોભાત્સ નષ્ટો નરકં વ્રજેત્ ॥ ૨૬॥

ન હિ દાસ્યામ્યહં કન્યામિચ્છયા શૂલપાણયે ।
યદ્વિધાનં ભવેદ્યોગ્યમૃષયસ્તદ્વિધીયતામ્ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય હિમાગસ્ય મુનીશ્વર ।
પ્રત્યુવાચ વસિષ્ઠસ્તં તેષાં વાક્યવિશારદઃ ॥ ૨૮॥

વસિષ્ઠ ઉવાચ ।
શ઼ૃણુ શૈલેશ મદ્વાક્યં સર્વથા તે હિતાવહમ્ ।
ધર્માવિરુદ્ધં સત્યં ચ પરત્રેહ મુદાવહમ્ ॥ ૨૯॥

વચનં ત્રિવિધં શૈલ લૌકિકે વૈદિકેઽપિ ચ ।
સર્વં જાનાતિ શાસ્ત્રજ્ઞો નિર્મલજ્ઞાનચક્ષુષા ॥ ૩૦॥

અસત્યમહિતં પશ્ચાત્સામ્પ્રતં શ્રુતિસુન્દરમ્ ।
સુબુદ્ધિર્વક્તિ શત્રુર્હિ હિતં નૈવ કદાચન ॥ ૩૧॥

આદાવપ્રીતિજનકં પરિણામે સુખાવહમ્ ।
દયાલુર્ધર્મશીલો હિ બોધયત્યેવ બાન્ધવઃ ॥ ૩૨॥

શ્રુતિમાત્રાત્સુધાતુલ્યં સર્વકાલસુખાવહમ્ ।
સત્યસારં હિતકરં વચનં શ્રેષ્ઠમીપ્સિતમ્ ॥ ૩૩॥

એવં ચ ત્રિવિધં શૈલ નીતિશાસ્ત્રોદિતં વચઃ ।
કથ્યતાં ત્રિષુ મધ્યે કિં બ્રુવે વાક્યં ત્વદીપ્સિતમ્ ॥ ૩૪॥

બ્રાહ્મસમ્પદ્વિહીનશ્ચ શઙ્કરસ્ત્રિદશેશ્વરઃ ।
તત્ત્વજ્ઞાનસમુદ્રેષુ સન્નિમગ્નૈકમાનસઃ । ૩૫॥

જ્ઞાનાનન્દસ્યેશ્વરસ્ય બ્રાહ્મવસ્તુષુ કા સ્પૃહા ।
ગૃહી દદાતિ સ્વસુતાં રાજ્યસમ્પત્તિશાલિને ॥ ૩૬॥

કન્યકાં દુઃખિને દત્ત્વા કન્યાઘાતી ભવેત્પિતા ।
કો વેદ શઙ્કરો દુઃખી કુબેરો યસ્ય કિઙ્કરઃ ॥ ૩૭॥

ભ્રૂભઙ્ગલીલયા સૃષ્ટિં સ્રષ્ટું હર્તું ક્ષમો હિ સઃ ।
નિર્ગુણઃ પરમાત્મા ચ પરેશઃ પ્રકૃતેઃ પરઃ ॥ ૩૮॥

યસ્ય ચ ત્રિવિધા મૂર્તિર્વિધાતુઃ સૃષ્ટિકર્મણિ ।
સૃષ્ટિસ્થિત્યન્તજનની બ્રહ્મવિષ્ણુહરાભિધા ॥ ૩૯॥

બ્રહ્મા ચ બ્રહ્મલોકસ્થો વિષ્ણુઃ ક્ષીરોદવાસકૃત્ ।
હરઃ કૈલાસનિલયઃ સર્વાઃ શિવવિભૂતયઃ ॥ ૪૦॥

ધત્તે ચ ત્રિવિધા મૂર્તીઃ પ્રકૃતિઃ શિવસમ્ભવા ।
અંશેન લીલયા સૃષ્ટૌ કલયા બહુધા અપિ ॥ ૪૧॥

મુખોદ્ભવા સ્વયં વાણી વાગધિષ્ઠાતૃદેવતા ।
વક્ષઃસ્થલોદ્ભવા લક્ષ્મીઃ સર્વસમ્પત્સ્વરૂપિણી ॥ ૪૨॥

શિવા તેજસ્સુ દેવાનામાવિર્ભાવં ચકાર સા ।
નિહત્ય દાનવાન્સર્વાન્દેવેભ્યશ્ચ શ્રિયં દદૌ ॥ ૪૩॥

પ્રાપ કલ્પાન્તરે જન્મ જઠરે દક્ષયોષિતઃ ।
નામ્ના સતી હરં પ્રાપ દક્ષસ્તસ્મૈ દદૌ ચ તામ્ ॥ ૪૪॥

દેહં તત્યાજ યોગેન શ્રુત્વા સા ભર્તૃનિન્દનમ્ ।
સાદ્ય ત્વત્તસ્તુ મેનાયાં જજ્ઞે જઠરતશ્શિવા ॥ ૪૫॥

શિવા શિવસ્ય પત્નીયં શૈલ જન્મનિ જન્મનિ ।
કલ્પે કલ્પે બુદ્ધિરૂપા જ્ઞાનિનાં જનની પરા ॥ ૪૬॥

જાયતે સ્મ સદા સિદ્ધા સિદ્ધિદા સિદ્ધિરૂપિણી ।
સત્યા અસ્થિ ચિતાભસ્મ ભક્ત્યા ધત્તે હરઃ સ્વયમ્ ॥ ૪૭॥

અતસ્ત્વં સ્વેચ્છયા કન્યાં દેહિ ભદ્રાં હરાય ચ ।
અથવા સા સ્વયં કાન્તસ્થાને યાસ્યત્યદાસ્યસિ ॥ ૪૮॥

કૃત્વા પ્રતિજ્ઞાં દેવેશો દૃષ્ટ્વા ક્લેશમસઙ્ખ્યકમ્ ।
દુહિતુસ્તે તપઃસ્થાનમાજગામ દ્વિજાત્મકઃ ॥ ૪૯॥

તામાશ્વાસ્ય વરં દત્ત્વા જગામ નિજમન્દિરમ્ ।
તત્પ્રાર્થનાવશાચ્છમ્ભુર્યયાચે ત્વાં શિવાં ગિરે ॥ ૫૦॥

અઙ્ગીકૃતં યુવાભ્યાં તચ્છિવભક્તિરતાત્મના ।
વિપરીતમતિર્જાતા વદ કસ્માદ્ગિરીશ્વર ॥ ૫૧॥

તદ્ગત્વા પ્રભુણા દેવપ્રાર્થિતેન ત્વદન્તિકમ્ ।
પ્રસ્થાપિતા વયં શીઘ્રં ઋષયઃ સાપ્યરુન્ધતી ॥ ૫૨॥

શિક્ષયામો વયં ત્વા હિ દેહિ રુદ્રાય પાર્વતીમ્ ।
એવઙ્કૃતે મહાનન્દો ભવિષ્યતિ ગિરે તવ ॥ ૫૩॥

શિવાં શિવાય શૈલેન્દ્ર સ્વેચ્છયા ચેન્ન દાસ્યસિ ।
ભવિતા તદ્વિવાહોઽત્ર ભવિતવ્યબલેન હિ ॥ ૫૪॥

વરં દદૌ શિવાયૈ સ તપન્ત્યૈ તાત શઙ્કરઃ ।
ન હીશ્વરપ્રતિજ્ઞાતં વિપરીતાય કલ્પતે ॥ ૫૫॥

અહો પ્રતિજ્ઞા દુર્લઙ્ઘ્યા સાધૂનામીશવર્તિનામ્ ।
સર્વેષાં જગતાં મધ્યે કિમીશસ્ય પુનર્ગિરે ॥ ૫૬॥

એકો મહેન્દ્રઃ શૈલાનાં પક્ષાંશ્ચિચ્છેદ લીલયા ।
પાર્વતી લીલયા મેરોઃ શૃઙ્ગભઙ્ગં ચકાર ચ ॥ ૫૭॥

એકાર્થે નહિ શૈલેશ નશ્યાઃ સર્વા હિ સમ્પદઃ ।
એકં ત્યજેત્કુલસ્યાર્થે શ્રુતિરેષા સનાતની ॥ ૫૮॥

દત્ત્વા વિપ્રાય સ્વસુતામનરણ્યો નૃપેશ્વરઃ ।

બ્રાહ્મણાદ્ભયમાપન્નો રરક્ષ નિજસમ્પદમ્ ॥ ૫૯॥

તમાશુ બોધયામાસુર્નીતિશાસ્ત્રવિદો જનાઃ ।
બ્રહ્મશાપાદ્વિભીતઞ્ચ ગુરવો જ્ઞાતિસત્તમાઃ ॥ ૬૦॥

શૈલરાજ ત્વમપ્યેવં સુતાં દત્ત્વા શિવાય ચ ।
રક્ષ સર્વાન્બન્ધુવર્ગાન્વશં કુરુ સુરાનપિ ॥ ૬૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વસિષ્ઠસ્ય વચનં સ પ્રહસ્ય ચ ।
પપ્રચ્છ નૃપવાર્તાઞ્ચ હૃદયેન વિદૂયતા ॥ ૬૨॥

હિમાલય ઉવાચ ।
કસ્ય વંશોદ્ભવો બ્રહ્મન્ અનરણ્યો નૃપશ્ચ સઃ ।
સુતાં દત્ત્વા સ ચ કથં રરક્ષાખિલસમ્પદઃ ॥ ૬૩॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વસિષ્ઠસ્તુ શૈલવાક્યં પ્રસન્નધીઃ ।
પ્રોવાચ ગિરયે તસ્મૈ નૃપવાર્ત્તાં સુખાવહામ્ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે ગિરિસાન્ત્વનો નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । અનરણ્યચરિતવર્ણનમ્ ।

વસિષ્ઠ ઉવાચ ।
મનોર્વંશોદ્ભવો રાજા સોઽનરણ્યો નૃપેશ્વરઃ ।
ઇન્દ્રસાવર્ણિસંજ્ઞસ્ય ચતુર્દશમિતસ્ય હિ ॥ ૧॥

અનરણ્યો નૃપશ્રેષ્ઠઃ સપ્તદ્વીપમહીપતિઃ ।
શમ્ભુભક્તો વિશેષેણ મઙ્ગલારણ્યજો બલી ॥ ૨॥

ભૃગું પુરોધસં કૃત્વા શતં યજ્ઞાંશ્ચકાર સઃ ।

ન સ્વીચકાર શક્રત્વં દીયમાનં સુરૈરપિ ॥ ૩॥

બભૂવુઃ શતપુત્રાશ્ચ રાજ્ઞસ્તસ્ય હિમાલય ।
કન્યૈકા સુન્દરી નામ્ના પદ્મા પદ્માલયા સમા ॥ ૪॥

યઃ સ્નેહઃ પુત્રશતકે કન્યાયાઞ્ચ તતોઽધિકઃ ।
નૃપસ્ય તસ્ય તસ્યાં હિ બભૂવ નગસત્તમ ॥ ૫॥

પ્રાણાધિકા પ્રિયતમા મહિષ્યઃ સર્વયોષિતઃ ।
નૃપસ્ય પત્ન્યઃ પઞ્ચાસન્ સર્વાઃ સૌભાગ્યસંયુતાઃ ॥ ૬॥

સા કન્યા યૌવનસ્થા ચ બભૂવ સ્વપિતુર્ગૃહે ।
પત્રં પ્રસ્થાપયામાસ સુવરાનયનાય સઃ ॥ ૭॥

એકદા પિપ્પલાદર્ષિર્ગન્તું સ્વાશ્રમમુત્સુકઃ ।
તપઃસ્થાને નિર્જને ચ ગન્ધર્વં સ દદર્શ હ ॥ ૮॥

સ્ત્રીયુતં મગ્નચિત્તં ચ શ‍ૃઙ્ગારે રસસાગરે ।
વિહરન્તં મહાપ્રેમ્ણા કામશાસ્ત્રવિશારદમ્ ॥ ૯॥

દૃષ્ટ્વા તં મુનિશાર્દૂલઃ સકામઃ સમ્બભૂવ સઃ ।
તપઃસ્વદત્તચિત્તશ્ચાચિન્તયદ્દારસઙ્ગ્રહમ્ ॥ ૧૦॥

એવંવૃત્તસ્ય તસ્યૈવ પિપ્પલાદસ્ય સન્મુનેઃ ।
કિયત્કાલો ગતસ્તત્ર કામોન્મથિતચેતસઃ ॥ ૧૧॥

એકદા પુષ્પભદ્રાયાં સ્નાતું ગચ્છન્મુનીશ્વરઃ ।
દદર્શ પદ્માં યુવતીં પદ્મામિવ મનોરમામ્ ॥ ૧૨॥

કેયં કન્યેતિ પપ્રચ્છ સમીપસ્થાઞ્જનાન્મુનિઃ ।
જના નિવેદયાઞ્ચક્રુર્નત્વા શાપનિયન્ત્રિતાઃ ॥ ૧૩॥

જના ઊચુઃ ।
અનરણ્યસુતેયં વૈ પદ્મા નામ રમાપરા ।
વરારોહા પ્રાર્થ્યમાના નૃપશ્રેષ્ઠૈર્ગુણાલયા ॥ ૧૪॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા સ મુનિર્વાક્યં જનાનાં તથ્યવાદિનામ્ ।
ચુક્ષોભાતીવ મનસિ તલ્લિપ્સુરભવચ્ચ સઃ ॥ ૧૫॥

મુનિઃ સ્નાત્વાભીષ્ટદેવં સમ્પૂજ્ય વિધિવચ્છિવમ્ ।

જગામ કામી ભિક્ષાર્થમનરણ્યસભાં ગિરે ॥ ૧૬॥

રાજા શીઘ્રં મુનિં દૃષ્ટ્વા પ્રણનામ ભયાકુલઃ ।
મધુપર્કાદિકં દત્ત્વા પૂજયામાસ ભક્તિતઃ ॥ ૧૭॥

કામાત્સર્વં ગૃહીત્વા ચ યયાચે કન્યકાં મુનિઃ ।
મૌની બભૂવ નૃપતિઃ કિઞ્ચિન્નિર્વક્તુમક્ષમઃ ॥ ૧૮॥

મુનિર્યયાચે કન્યાં સ તાં દેહીતિ નૃપેશ્વર ।
અન્યથા ભસ્મસાત્સર્વં કરિષ્યામિ ક્ષણેન ચ ॥ ૧૯॥

સર્વે બભૂવુરાચ્છન્ના ગણાસ્તત્તેજસા મુને ।
રુદોદ રાજા સગણો દૃષ્ટ્વા વિપ્રં જરાતુરમ્ ॥ ૨૦॥

મહિષ્યો રુરુદુસ્સર્વા ઇતિકર્તવ્યતાક્ષમાઃ ।
મૂર્ચ્છામાપ મહારાજ્ઞી કન્યામાતા શુચાકુલા ॥ ૨૧॥

બભૂવુસ્તનયાઃ સર્વે શોકાકુલિતમાનસાઃ ।
સર્વં શોકાકુલં જાતં નૃપસમ્બન્ધિ શૈલપ ॥ ૨૨॥

એતસ્મિન્નન્તરે પ્રાજ્ઞો દ્વિજો ગુરુરનુત્તમઃ ।
પુરોહિતશ્ચ મતિમાન્ આગતો નૃપસન્નિધિમ્ ॥ ૨૩॥

રાજા પ્રણમ્ય સમ્પૂજ્ય રુદોદ ચ તયોઃ પુરઃ ।
સર્વં નિવેદયાઞ્ચક્રે પપ્રચ્છોચિતમાશુ તત્ ॥ ૨૪॥

અથ રાજ્ઞો ગુરુર્વિપ્રઃ પણ્ડિતશ્ચ પુરોહિતઃ ।
અપિ દ્વૌ શાસ્ત્રનીતિજ્ઞૌ બોધયામાસતુર્નૃપમ્ ॥ ૨૫॥

શોકાકુલાંશ્ચ મહિષીર્નૃપબાલાંશ્ચ કન્યકામ્ ।
ઉત્તમાં નીતિમાદૃત્ય સર્વેષાં હિતકારિણીમ્ ॥ ૨૬॥

ગુરુપુરોધસાવૂચતુઃ
શ઼ૃણુ રાજન્મહાપ્રાજ્ઞ વચો નૌ સદ્ધિતાવહમ્ ।
મા શુચઃ સપરીવારઃ શાસ્ત્રે કુરુ મતિં સતીમ્ ॥ ૨૭॥

અદ્ય વાબ્દદિનાન્તે વા દાતવ્યા કન્યકા નૃપ ।
પાત્રાય વિપ્રાયાન્યસ્મૈ કસ્મૈચિદ્વા વિશેષતઃ ॥ ૨૮॥

સત્પાત્રં બ્રાહ્મણાદન્યં ન પશ્યાવો જગત્રયે ।
સુતાં દત્ત્વા ચ મુનયે રક્ષ સ્વાં સર્વસમ્પદમ્ ॥ ૨૯॥

રાજન્નેકનિમિત્તેન સર્વસમ્પદ્વિનશ્યતિ ।
સર્વં રક્ષતિ તં ત્યક્ત્વા વિના તં શરણાગતમ્ ॥ ૩૦॥

વસિષ્ઠ ઉવાચ ।
રાજા પ્રાજ્ઞવચઃ શ્રુત્વા વિલપ્ય ચ મુહુર્મુહુઃ ।
કન્યાં સાલઙ્કૃતાં કૃત્વા મુનીન્દ્રાય દદૌ કિલ ॥ ૩૧॥

કાન્તાં ગૃહીત્વા સ મુનિર્વિવાહ્ય વિધિવદ્ગિરે ।
પદ્માં પદ્મોપમાં તાં વૈ મુદિતઃસ્વાલયં યયૌ ॥ ૩૨॥

રાજા સર્વાન્પરિત્યજ્ય દત્ત્વા વૃદ્ધાય ચાત્મજામ્ ।
ગ્લાનિં ચિત્તે સમાધાય જગામ તપસે વનમ્ ॥ ૩૩॥

તદ્ભાર્યાપિ વનં યાતે પ્રાણનાથે તદા ગિરે ।
ભર્તુશ્ચ દુહિતુઃ શોકાત્પ્રાણાંસ્તત્યાજ સુન્દરી ॥ ૩૪॥

પૂજ્યાઃ પુત્રાશ્ચ ભૃત્યાશ્ચ મૂર્ચ્છામાપુર્નૃપં વિના ।
શુશુચુઃ શ્વાસસંયુક્તા જ્ઞાત્વા સર્વેઽપરે જનાઃ ॥ ૩૫॥

અનરણ્યો વનં ગત્વા તપસ્તપ્ત્વાતિ શઙ્કરમ્ ।
સમારાધ્ય યયૌ ભક્ત્યા શિવલોકમનામયમ્ ॥ ૩૬॥

નૃપસ્ય કીર્તિમાન્નામ્ના જ્યેષ્ઠપુત્રોઽથ ધાર્મિકઃ ।
પુત્રવત્પાલયામાસ પ્રજા રાજ્યં ચકાર હ ॥ ૩૭॥

ઇતિ તે કથિતં શૈલાનરણ્યચરિતં શુભમ્ ।
કન્યાં દત્ત્વા યથારક્ષદ્વંશં ચાપ્યખિલં ધનમ્ ॥ ૩૮॥

શૈલરાજ ત્વમપ્યેવં સુતાં દત્ત્વા શિવાય ચ ।
રક્ષ સર્વકુલં સર્વાન્વશાન્કુરુ સુરાનપિ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડેઽનરણ્યચરિતવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । પદ્માપિપ્પલાદચરિતવર્ણનમ્ ।

નારદ ઉવાચ ।
અનરણ્યસ્ય ચરિતં સુતાદાનસમન્વિતમ્ ।
શ્રુત્વા ગિરિવરસ્તાત કિં ચકાર ચ તદ્વદ ॥ ૧॥

બ્રહ્મોવાચ ।
અનરણ્યસ્ય ચરિતં કન્યાદાનસમન્વિતમ્ ।
શ્રુત્વા પપ્રચ્છ શૈલેશો વસિષ્ઠં સાઞ્જલિઃ પુનઃ ॥ ૨॥

શૈલેશ ઉવાચ ।
વસિષ્ઠ મુનિશાર્દૂલ બ્રહ્મપુત્ર કૃપાનિધે ।
અનરણ્યચરિત્રન્તે કથિતં પરમાદ્ભુતમ્ ॥ ૩॥

અનરણ્યસુતા યસ્માત્ પિપ્પલાદં મુનિં પતિમ્ ।
સમ્પ્રાપ્ય કિમકાર્ષીત્સા તચ્ચરિત્રં મુદાવહમ્ ॥ ૪॥

વસિષ્ઠ ઉવાચ ।
પિપ્પલાદો મુનિવરો વયસા જર્જરોઽધિકઃ ।
ગત્વા નિજાશ્રમં નાર્યાનરણ્યસુતયા તયા ॥ ૫॥

ઉવાસ તત્ર સુપ્રીત્યા તપસ્વી નાતિલમ્પટઃ ।
તત્રારણ્યે ગિરિવરે સ નિત્યં નિજધર્મકૃત્ ॥ ૬॥

અથાનરણ્યકન્યા સા સિષેવે ભક્તિતો મુનિમ્ ।
કર્મણા મનસા વાચા લક્ષ્મીર્નારાયણં યથા ॥ ૭॥

એકદા સ્વર્ણદીં સ્નાતું ગચ્છન્તીં સુસ્મિતાં ચ તામ્ ।
દદર્શ પથિ ધર્મશ્ચ માયયા નૃપરૂપધૃક્ ॥ ૮॥

ચારુરત્નરથસ્થશ્ચ નાનાલઙ્કારભૂષિતઃ ।
નવીનયૌવનશ્શ્રીમાન્કામદેવસમપ્રભઃ ॥ ૯॥

દૃષ્ટ્વા તાં સુન્દરીં પદ્મામુવાચ સ વૃષો વિભુઃ ।
વિજ્ઞાતું ભાવમન્તઃસ્થં તસ્યાશ્ચ મુનિયોષિતઃ ॥ ૧૦॥

ધર્મ ઉવાચ ।
અયિ સુન્દરિ લક્ષ્મીર્વૈ રાજયોગ્યે મનોહરે ।

અતીવ યૌવનસ્થે ચ કામિનિ સ્થિરયૌવને ॥ ૧૧॥

જરાતુરસ્ય વૃદ્ધસ્ય પિપ્પલાદસ્ય વૈ મુનેઃ ।
સત્યં વદામિ તન્વઙ્ગિ સમીપે નૈવ રાજસે ॥ ૧૨॥

વિપ્રં તપસ્સુ નિરતં નિર્ઘૃણં મરણોન્મુખમ્ ।
ત્યક્ત્વા માં પશ્ય રાજેન્દ્રં રતિશૂરં સ્મરાતુરમ્ ॥ ૧૩॥

પ્રાપ્નોતિ સુન્દરી પુણ્યાત્સૌન્દર્યં પૂર્વજન્મનઃ ।
સફલં તદ્ભવેત્સર્વં રસિકાલિઙ્ગનેન ચ ॥ ૧૪॥

સહસ્રસુન્દરીકાન્તં કામશાસ્ત્રવિશારદમ્ ।
કિઙ્કરં કુરુ માં કાન્તે સમ્પરિત્યજ્ય તં પતિમ્ ॥ ૧૫॥

નિર્જને કાનને રમ્યે શૈલે શૈલે નદીતટે ।
વિહરસ્વ મયા સાર્ધં જન્મેદં સફલં કુરુ ॥ ૧૬॥

વસિષ્ઠ ઉવાચ ।
ઇત્યેવમુક્તવન્તં સા સ્વરથાદવરુહ્ય ચ ।
ગ્રહીતુમુત્સુકં હસ્તે તમુવાચ પતિવ્રતા ॥ ૧૭॥

પદ્મોવાચ ।
ગચ્છ દૂરં ગચ્છ દૂરં પાપિષ્ઠસ્ત્વં નરાધિપ ।
માં ચેત્પશ્યસિ કામેન સદ્યો નષ્ટો ભવિષ્યસિ ॥ ૧૮॥

પિપ્પલાદં મુનિશ્રેષ્ઠં તપસા પૂતવિગ્રહમ્ ।
ત્યક્ત્વા કથં ભજેયં ત્વાં સ્ત્રીજિતં રતિલમ્પટમ્ ॥ ૧૯॥

સ્ત્રીજિતસ્પર્શમાત્રેણ સર્વં પુણ્યં પ્રણશ્યતિ ।
સ્ત્રીજિતઃ પરપાપી ચ તદ્દર્શનમઘાવહમ્ ॥ ૨૦॥

સત્ક્રિયો હ્યશુચિર્નિત્યં સ પુમાન્ યઃ સ્ત્રિયા જિતઃ ।
નિન્દન્તિ પિતરો દેવા માનવાઃ સકલાશ્ચ તમ્ ॥ ૨૧॥

તસ્ય કિં જ્ઞાન સુતપોજપહોમપ્રપૂજનૈઃ ।
વિદ્યયા દાનતઃ કિં વા સ્ત્રીભિર્યસ્ય મનો હૃતમ્ ॥ ૨૨॥

માતરં માં સ્ત્રિયો ભાવં કૃત્વા યેન બ્રવીષિ હ ।
ભવિષ્યતિ ક્ષયસ્તેન કાલેન મમ શાપતઃ ॥ ૨૩॥

વસિષ્ઠ ઉવાચ ।

શ્રુત્વા ધર્મઃ સતીશાપં નૃપમૂર્તિં વિહાય ચ ।
ધૃત્વા સ્વમૂર્તિં દેવેશઃ કમ્પમાન ઉવાચ સઃ ॥ ૨૪॥

ધર્મ ઉવાચ ।
માતર્જાનીહિ માં ધર્મં જ્ઞાનિનાં ચ ગુરોર્ગુરુમ્ ।
પરસ્ત્રીમાતૃબુદ્ધિં ચ કુર્વન્તં સતતં સતિ ॥ ૨૫॥

અહં તવાન્તરં જ્ઞાતુમાગતસ્તવ સન્નિધિમ્ ।
તવાહઞ્ચ મનો જાને તથાપિ વિધિનોદિતઃ ॥ ૨૬॥

કૃતં મે દમનં સાધ્વિ ન વિરુદ્ધં યથોચિતમ્ ।
શાસ્તિઃ સમુત્પથસ્થાનામીશ્વરેણ વિનિર્મિતા ॥ ૨૭॥

સ્વયં પ્રદાતા સર્વેભ્યઃ સુખદુઃખવરાન્ક્ષમઃ ।
સમ્પદં વિપદં યો હિ નમસ્તસ્મૈ શિવાય હિ ॥ ૨૮॥

શત્રું મિત્રં સંવિધાતું પ્રીતિઞ્ચ કલહં ક્ષમઃ ।
સ્રષ્ટું નષ્ટું ચ યસ્સૃષ્ટિં નમસ્તસ્મૈ શિવાય હિ ॥ ૨૯॥

યેન શુક્લીકૃતં ક્ષીરં જલે શૈત્યં કૃતં પુરા ।
દાહીકૃતો હુતાશશ્ચ નમસ્તસ્મૈ શિવાય હિ ॥ ૩૦॥

પ્રકૃતિર્નિર્મિતા યેન તત્ત્વાનિ મહદાદિતઃ ।
બ્રહ્મવિષ્ણુમહેશાદ્યા નમસ્તસ્મૈ શિવાય હિ ॥ ૩૧॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પુરતસ્તસ્યાસ્તસ્થૌ ધર્મો જગદ્ગુરુઃ ।
કિઞ્ચિન્નોવાચ ચકિતસ્તત્પાતિવ્રત્યતોષિતઃ ॥ ૩૨॥

પદ્માપિ નૃપકન્યા સા પિપ્પલાદપ્રિયા તદા ।
સાધ્વી તં ધર્મમાજ્ઞાય વિસ્મિતોવાચ પર્વત ॥ ૩૩॥

પદ્મોવાચ ।
ત્વમેવ ધર્મ સર્વેષાં સાક્ષી નિખિલકર્મણામ્ ।
કથં મનો મે વિજ્ઞાતું વિડમ્બયસિ માં વિભો ॥ ૩૪॥

યત્તત્સર્વં કૃતં બ્રહ્મન્ નાપરાધો બભૂવ મે ।
ત્વં ચ શપ્તો મયાજ્ઞાનાત્સ્ત્રીસ્વભાવાદ્ વૃથા વૃષ ॥ ૩૫॥

કા વ્યવસ્થા ભવેત્તસ્ય ચિન્તયામીતિ સામ્પ્રતમ્ ।

ચિત્તે સ્ફુરતુ સા બુદ્ધિર્યયા શં સંલ્લભામિ વૈ ॥ ૩૬॥

આકાશોઽસૌ દિશઃસર્વા યદિ નશ્યન્તુ વાયવઃ ।
તથાપિ સાધ્વીશાપસ્તુ ન નશ્યતિ કદાચન ॥ ૩૭॥

સત્યે પૂર્ણશ્ચતુષ્પાદઃ પૌર્ણમાસ્યાં યથા શશી ।
વિરાજસે દેવરાજ સર્વકાલં દિવાનિશમ્ ॥ ૩૮॥

ત્વં ચ નષ્ટો ભવસિ ચેત્સૃષ્ટિનાશો ભવેત્તદા ।
ઇતિકર્તવ્યતામૂઢા વૃથાપિ ચ વદામ્યહમ્ ॥ ૩૯॥

પાદક્ષયશ્ચ ભવિતા ત્રેતાયાં ચ સુરોત્તમ ।
પાદોઽપરે દ્વાપરે ચ તૃતીયોઽપિ કલૌ વિભો ॥ ૪૦॥

કલિશેષેઽખિલાશ્છિન્ના ભવિષ્યન્તિ તવાઙ્ઘ્રયઃ ।
પુનઃસત્યે સમાયાતે પરિપૂર્ણો ભવિષ્યસિ ॥ ૪૧॥

સત્યે સર્વવ્યાપકસ્ત્વં તદન્યેષુ ચ કુત્રચિત્ ।
યુગવ્યવસ્થયા સ ત્વં ભવિષ્યસિ યથા તથા ॥ ૪૨॥

ઇત્યેવં વચનં સત્યં મમાસ્તુ સુખદં તવ ।
યામ્યહં પતિસેવાયૈ ગચ્છ ત્વં સ્વગૃહં વિભો ॥ ૪૩॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યાઃ સન્તુષ્ટોઽભૂદ્ વૃષઃ સ વૈ ।
તદેવંવાદિનીં સાધ્વીમુવાચ વિધિનન્દન ॥ ૪૪॥

ધર્મ ઉવાચ ।
ધન્યાસિ પતિભક્તાસિ સ્વસ્તિ તેઽસ્તુ પતિવ્રતે ।
વરં ગૃહાણ ત્વત્સ્વામી ત્વત્પરિત્રાણકારણાત્ ॥ ૪૫॥

યુવા ભવતુ તે ભર્તા રતિશૂરશ્ચ ધાર્મિકઃ ।
રૂપવાન્ ગુણવાન્વાગ્મી સન્તતસ્થિરયૌવનઃ ॥ ૪૬॥

ચિરઞ્જીવી સ ભવતુ માર્કણ્ડેયાત્પરશ્શુભે ।
કુબેરાદ્ધનવાંશ્ચૈવ શક્રાદૈશ્વર્યવાનપિ ॥ ૪૭॥

શિવભક્તો હરિસમસ્સિદ્ધસ્તુ કપિલાત્પરઃ ।
બુદ્ધ્યા બૃહસ્પતિસમઃ સમત્વેન વિધેઃ સમઃ ॥ ૪૮॥

સ્વામિસૌભાગ્યસંયુક્તા ભવ ત્વં જીવનાવધિ ।

તથા ચ સુભગે દેવિ ત્વં ભવ સ્થિરયૌવના ॥ ૪૯॥

માતા ત્વં દશપુત્રાણાં ગુણિનાં ચિરજીવિનામ્ ।
સ્વભર્તુરધિકાનાં ચ ભવિષ્યસિ ન સંશયઃ ॥ ૫૦॥

ગૃહા ભવન્તુ તે સાધ્વિ સર્વસમ્પત્સમન્વિતાઃ ।
પ્રકાશવન્તઃ સતતં કુબેરભવનાધિકાઃ ॥ ૫૧॥

વસિષ્ઠ ઉવાચ ।
ઇત્યેવમુક્ત્વા સન્તસ્થૌ ધર્મઃ સ ગિરિસત્તમ ।
સા તં પ્રદક્ષિણીકૃત્ય પ્રણમ્ય સ્વગૃહં યયૌ ॥ ૫૨॥

ધર્મસ્તથાશિષો દત્ત્વા જગામ નિજમન્દિરમ્ ।
પ્રશશંસ ચ તાં પ્રીત્યા પદ્માં સંસદિ સંસદિ ॥ ૫૩॥

સા રેમે સ્વામિના સાર્ધં યૂના રહસિ સન્તતમ્ ।
પશ્ચાદ્બભૂવુઃ સત્પુત્રાસ્તદ્ભર્તુરધિકા ગુણૈઃ ॥ ૫૪॥

બભૂવ સકલા સમ્પદ્દમ્પત્યોઃ સુખવર્ધિની ।
સર્વાનન્દવૃદ્ધિકરી પરત્રેહ ચ શર્મણે ॥ ૫૫॥

શૈલેન્દ્ર કથિતં સર્વમિતિહાસં પુરાતનમ્ ।
દમ્પત્યોશ્ચ તયોઃ પ્રીત્યા શ્રુતં તે પરમાદરાત્ ॥ ૫૬॥

બુદ્ધ્વા તત્ત્વં સુતાં દેહિ પાર્વતીમીશ્વરાય ચ ।
કુરુષં ત્યજ શૈલેન્દ્ર મેનયા સ્વસ્ત્રિયા સહ ॥ ૫૭॥

સપ્તાહે સમતીતે તુ દુર્લભેઽતિશુભે ક્ષણે ।
લગ્નાધિપે ચ લગ્નસ્થે ચન્દ્રે સ્વતનયાન્વિતે ॥ ૫૮॥

મુદિતે રોહિણીયુક્તે વિશુદ્ધે ચન્દ્રતારકે ।
માર્ગમાસે ચન્દ્રવારે સર્વદોષવિવર્જિતે ॥ ૫૯॥

સર્વસદ્ગ્રહસંસૃષ્ટેઽસદ્ગ્રહદૃષ્ટિવર્જિતે ।
સદપત્યપ્રદે જીવે પતિસૌભાગ્યદાયિનિ ॥ ૬૦॥

જગદમ્બાં જગત્પિત્રે મૂલપ્રકૃતિમીશ્વરીમ્ ।
કન્યાં પ્રદાય ગિરિજાં કૃતી ત્વં ભવ પર્વત ॥ ૬૧॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા મુનિશાર્દૂલો વસિષ્ઠો જ્ઞાનિસત્તમઃ ।

વિરરામ શિવં સ્મૃત્વા નાનાલીલાકરં પ્રભુમ્ ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પદ્માપિપ્પલાદચરિતવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । હિમાલયસ્ય શિવાય કાલીપ્રદાનનિશ્ચયવર્ણનમ્ ।

બ્રહ્મોવાચ ।
વસિષ્ઠસ્ય વચઃ શ્રુત્વા સગણોઽપિ હિમાલયઃ ।
વિસ્મિતો ભાર્યયા શૈલાનુવાચ સ ગિરીશ્વરઃ ॥ ૧॥

હિમાલય ઉવાચ ।
હે મેરો ગિરિરાટ્ સહ્ય ગન્ધમાદન મન્દર ।
મૈનાક વિન્ધ્ય શૈલેન્દ્રાઃ સર્વે શૃ‌ણુત મદ્વચઃ ॥ ૨॥

વસિષ્ઠો હિ વદત્યેવં કિં મે કાર્યં વિચાર્યતે ।
યથા તથા ચ શંસધ્વં નિર્ણીય મનસાખિલમ્ ॥ ૩॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય સુમેરુપ્રમુખાશ્ચ તે ।
પ્રોચુર્હિમાલયં પ્રીત્યા સુનિર્ણીય મહીધરાઃ ॥ ૪॥

શૈલા ઊચુઃ ।
અધુના કિં વિમર્શેન કૃતં કાર્યં તથૈવ હિ ।
ઉત્પન્નેયં મહાભાગ દેવકાર્યાર્થમેવ હિ ॥ ૫॥

પ્રદાતવ્યા શિવાયેતિ શિવસ્યાર્થેઽવતારિણી ।
અનયારાધિતો રુદ્રો રુદ્રેણ યદિ ભાષિતા ॥ ૬॥

બ્રહ્મોવાચ ।
એતચ્છ્રુત્વા વચસ્તેષાં મેર્વાદીનાં હિમાચલઃ ।
સુપ્રસન્નતરોઽભૂદ્ વૈ જહાસ ગિરિજા હૃદિ ॥ ૭॥

અરુન્ધતી ચ તાં મેનાં બોધયામાસ કારણાત્ ।
નાનાવાક્યસમૂહેનેતિહાસૈર્વિવિધૈરપિ ॥ ૮॥

અથ સા મેનકા શૈલપત્ની બુદ્ધ્વા પ્રસન્નધીઃ ।
મુનીનરુન્ધતીં શૈલં ભોજયિત્વા બુભોજ ચ ॥ ૯॥

અથ શૈલવરો જ્ઞાની સુસંસેવ્ય મુનીંશ્ચ તાન્ ।
ઉવાચ સાઞ્જલિઃ પ્રીત્યા પ્રસન્નાત્મા ગતભ્રમઃ ॥ ૧૦॥

હિમાચલ ઉવાચ ।
સપ્તર્ષયો મહાભાગા વચઃ શ‍ૃણુત મામકમ્ ।
વિસ્મયો મે ગતઃ સર્વઃ શિવયોશ્ચરિતં શ્રુતમ્ ॥ ૧૧॥

મદીયં ચ શરીરં વૈ પત્ની મેના સુતા સુતાઃ ।
ઋદ્ધિઃ સિદ્ધિશ્ચ ચાન્યદ્વૈ શિવસ્યૈવ ન ચાન્યથા ॥ ૧૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સ તદા પુત્રીં દૃષ્ટ્વા તત્સાદરં ચ તામ્ ।
ભૂષયિત્વા તદઙ્ગાનિ ઋષ્યુત્સઙ્ગે ન્યવેશયત્ ॥ ૧૩॥

ઉવાચ ચ પુનઃ પ્રીત્યા શૈલરાજ ઋષીંસ્તદા ।
અયં ભાગો મયા તસ્મૈ દાતવ્ય ઇતિ નિશ્ચિતમ્ ॥ ૧૪॥

ઋષય ઊચુઃ ।
શઙ્કરો ભિક્ષુકસ્તેઽથ સ્વયં દાતા ભવાન્ ગિરે ।
ભૈક્ષ્યઞ્ચ પાર્વતી દેવી કિમતઃ પરમુત્તમમ્ ॥ ૧૫॥

હિમવન્ શિખરાણાન્તે યદ્ગેતોઃ સદૃશી ગતિઃ ।
ધન્યસ્ત્વં સર્વશૈલાનામધિપઃ સર્વતો વરઃ ॥ ૧૬॥

બ્રહ્મોવાચ ।
એવમુક્ત્વા તુ કન્યાયૈ મુનયો વિમલાશયાઃ ।
આશિષં દત્તવન્તસ્તે શિવાય સુખદા ભવ ॥ ૧૭॥

સ્પૃષ્ટ્વા કરેણ તાં તત્ર કલ્યાણં તે ભવિષ્યતિ ।
શુક્લપક્ષે યથા ચન્દ્રો વર્ધન્તાં ત્વદ્ગુણાસ્તથા ॥ ૧૮॥

ઇત્યુક્ત્વા મુનયઃ સર્વે દત્ત્વા તે ગિરયે મુદા ।
પુષ્પાણિ ફલયુક્તાનિ પ્રત્યયં ચક્રિરે તદા ॥ ૧૯॥

અરુન્ધતી તદા તત્ર મેનાં સા સુમુખી મુદા ।
ગુણૈશ્ચ લોભયામાસ શિવસ્ય પરમા સતી ॥ ૨૦॥

હરિદ્રાકુઙ્કુમૈઃ શૈલશ્મશ્રૂણિ પ્રત્યમાર્જયત્ ।
લૌકિકાચારમાધાય મઙ્ગલાયનમુત્તમમ્ ॥ ૨૧॥

તતશ્ચ તે ચતુર્થેઽહ્નિ સન્ધાર્ય લગ્નમુત્તમમ્ ।
પરસ્પરં ચ સન્તુષ્ય સઞ્જગ્મુઃ શિવસન્નિધિમ્ ॥ ૨૨॥

તત્ર ગત્વા શિવં નત્વા સ્તુત્વા વિવિધસૂક્તિભિઃ ।
ઊચુઃ સર્વે વસિષ્ઠાદ્યા મુનયઃ પરમેશ્વરમ્ ॥ ૨૩॥

ઋષય ઊચુઃ ।
દેવદેવ મહાદેવ પરમેશ મહાપ્રભો ।
શ ૃણ્વસ્મદ્વચનં પ્રીત્યા યત્કૃતં સેવકૈસ્તવ ॥ ૨૪॥

બોધિતો ગિરિરાજશ્ચ મેના વિવિધસૂક્તિભિઃ ।
સેતિહાસં મહેશાન પ્રબુદ્ધોઽસૌ ન સંશયઃ ॥ ૨૫॥

વાક્યદત્તા ગિરીન્દ્રેણ પાર્વતી તે હિ નાન્યથા ।
ઉદ્વાહાય પ્રગચ્છ ત્વં ગણૈર્દેવૈશ્ચ સંયુતઃ ॥ ૨૬॥

ગચ્છ શીઘ્રં મહાદેવ હિમાચલગૃહં પ્રભો ।
વિવાહય યથા રીતિઃ પાર્વતીમાત્મજન્મને ॥ ૨૭॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તેષાં લૌકિકાચારતત્પરઃ ।
પ્રહૃષ્ટાત્મા મહેશાનઃ પ્રહસ્યેદમુવાચ સઃ ॥ ૨૮॥

મહેશ ઉવાચ ।
વિવાહો હિ મહાભાગા ન દૃષ્ટો ન શ્રુતો મયા ।
યથા પુરા ભવદ્ભિસ્તદ્વિધિઃ પ્રોચ્યો વિશેષતઃ ॥ ૨૯॥

બ્રહ્મોવાચ ।
તદાકર્ણ્ય મહેશસ્ય લૌકિકં વચનં શુભમ્ ।
પ્રત્યૂચુઃ પ્રહસન્તસ્તે દેવદેવં સદાશિવમ્ ॥ ૩૦॥

ઋષય ઊચુઃ ।
વિષ્ણુમાહૂય વૈ શીઘ્રં સસમાજં વિશેષતઃ ।

બ્રહ્માણં સસુતં પ્રીત્યા તથા દેવં શતક્રતુમ્ ॥ ૩૧॥

તથા ઋષિગણાન્સર્વાન્ યક્ષગન્ધર્વકિન્નરાન્ ।
સિદ્ધાન્ વિદ્યાધરાંશ્ચૈવ તથા ચૈવાપ્સરોગણાન્ ॥ ૩૨॥

એતાંશ્ચાન્યાન્પ્રભો સર્વાનાનયસ્વેહ સાદરમ્ ।
સર્વં સંસાધયિષ્યન્તિ ત્વત્કાર્યં તે ન સંશયઃ ॥ ૩૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સપ્ત ઋષયસ્તદાજ્ઞાં પ્રાપ્ય તે મુદા ।
સ્વધામ પ્રયયુઃ સર્વે શંસન્તઃ શઙ્કરીં ગતિમ્ ॥ ૩૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે સપ્તર્ષિવચનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । પાર્વતીવિવાહસમ્ભારસઙ્ગ્રહવર્ણનમ્ ।

નારદ ઉવાચ ।
તાત પ્રાજ્ઞ વદેદાનીં સપ્તર્ષિષુ ગતેષુ ચ ।
કિમકાર્ષીદ્ધિમગિરિસ્તન્મે કૃત્વા કૃપાં પ્રભો ॥ ૧॥

બ્રહ્મોવાચ ।
ગતેષુ તેષુ મુનિષુ સપ્તસ્વપિ મુનીશ્વર ।
સારુન્ધતીષુ હિમવાન્ યદકાર્ષીદ્ બ્રવીમિ તે ॥ ૨॥

તત આમન્ત્ર્ય સ્વભ્રાતૄન્ મેર્વાદીન્ સસુતપ્રિયઃ ।
મહામનાઃ સ મુમુદે હિમવાન્ પર્વતેશ્વરઃ ॥ ૩॥

તદાજ્ઞપ્તસ્તતઃ પ્રીત્યા હિમવાન્ લગ્નપત્રિકામ્ ।
લેખયામાસ સુપ્રીત્યા ગર્ગેણ સ્વપુરોધસા ॥ ૪॥

અથ પ્રસ્થાપયામાસ તાં શિવાય સ પત્રિકામ્ ।
નાનાવિધાસ્તુ સામગ્ર્યઃ સ્વજનૈર્મુદિતાત્મભિઃ ॥ ૫॥

તે જનાસ્તત્ર ગત્વા ચ કૈલાસે શિવસન્નિધિમ્ ।
દદુઃ શિવાય તત્પત્રં તિલકં સંવિધાય ચ ॥ ૬॥

સમ્માનિતા વિશેષેણ પ્રભુણા ચ યથોચિતમ્ ।
સર્વે તે પ્રીતિમનસ આજગ્મુઃ શૈલસન્નિધિમ્ ॥ ૭॥

સમ્માનિતાન્વિશેષેણ મહેશેનાગતાન્ જનાન્ ।
દૃષ્ટ્વા સુહર્ષિતાન્ શૈલો મુમોદાતીવ ચેતસિ ॥ ૮॥

તતો નિમન્ત્રણં ચક્રે સ્વબન્ધૂનાં પ્રમોદિતઃ ।
નાનાદેશસ્થિતાનાં ચ નિખિલાનાં સુખાસ્પદમ્ ॥ ૯॥

તતઃ સ કારયામાસ સ્વન્નસઙ્ગ્રહમાદરાત્ ।
નાનાવિધાશ્ચ સામગ્રીર્વિવાહકરણોચિતાઃ ॥ ૧૦॥

તણ્ડુલાનાં બહૂન્ શૈલાન્ પૃથુકાનાં તથૈવ ચ ।
ગુડાનાં શર્કરાણાં ચ લવણાનાં તથૈવ ચ ॥ ૧૧॥

ક્ષીરાણાં ચ ઘૃતાનાં ચ દધ્નાં વાપીશ્ચકાર સઃ ।
યવાદિધાન્યપિષ્ટાનાં લડ્ડુકાનાં તથૈવ ચ ॥ ૧૨॥

શષ્કુલીનાં સ્વસ્તિકાનાં શર્કરાણાં તથૈવ ચ ।
અમૃતેક્ષુરસાનાં ચ તત્ર વાપીશ્ચકાર સઃ ॥ ૧૩॥

બહ્વીર્હૈયઙ્ગવાનાં ચ હ્યાસવાનાં તથૈવ ચ ।
નાના પક્વાન્નસઙ્ઘાંશ્ચ મહાસ્વાદુરસાઁસ્તથા ॥ ૧૪॥

નાના વ્યઞ્જનવસ્તૂનિ ગણદેવહિતાનિ ચ ।
અમૂલ્યનાનાવસ્ત્રાણિ વહ્નિશૌચાનિ યાનિ ચ ॥ ૧૯॥

મણિરત્નપ્રકારાણિ સુવર્ણરજતાનિ ચ ।
દ્રવ્યાણ્યેતાનિ ચાન્યાનિ સઙ્ગૃહ્ય વિધિપૂર્વકમ્ ॥ ૧૬॥

મઙ્ગલં કર્તુમારેભે ગિરિર્મઙ્ગલકૃદ્દિને ।
સંસ્કારં કારયામાસુઃ પાર્વત્યાઃ પર્વતસ્ત્રિયઃ ॥ ૧૭॥

તા મઙ્ગલં મુદા ચક્રુર્ભૂષિતા ભૂષણૈઃ સ્વયમ્ ।
પુરદ્વિજસ્ત્રિયો હૃષ્ટા લોકાચારં પ્રચક્રિરે ॥ ૧૮॥

સોત્સવં વિવિધં તત્ર સુમઙ્ગલપુરસ્સરમ્ ।
હિમાલયોઽપિ હૃષ્ટાત્મા કૃત્વાચારં સુમઙ્ગલમ્ ॥ ૧૯॥

સર્વભાવેન સુપ્રીતો બન્ધુવર્ગાગમોત્સુકઃ ।
એતસ્મિન્નન્તરે તસ્ય બાન્ધવાશ્ચ નિમન્ત્રિતાઃ ॥ ૨૦॥

આજગ્મુઃ સસ્ત્રિયો હૃષ્ટાઃ સસુતાઃ સપરિચ્છદાઃ ।
તદેવ શ‍ૃણુ દેવર્ષે ગિર્યાગમનમાદૃતઃ ॥ ૨૧॥

વર્ણયામિ સમાસેન શિવપ્રીતિવિવૃદ્ધયે ।
દેવાલયગિરિર્યો હિ દિવ્યરૂપધરો મહાન્ ॥ ૨૨॥

નાનારત્નપરિભ્રાજત્સમાજઃ સપરિચ્છદઃ ।
નાનામણિમહારત્નસારમાદાય યત્નતઃ ॥ ૨૩॥

સુવેષાલઙ્કૃતઃ શ્રીમાન્ જગામ સ હિમાલયમ્ ।
મન્દરઃ સર્વશોભાઢ્યઃ સનારીતનયો ગિરિઃ ॥ ૨૪॥

સૂપાયનાનિ સઙ્ગૃહ્ય જગામ વિવિધાનિ ચ ।
અસ્તાચલોઽપિ દિવ્યાત્મા સોપાયન ઉદારધીઃ ॥ ૨૫॥

બહુશોભાસમાયુક્ત આજગામ મુદાન્વિતઃ ।
ઉદયાચલ આદાય સદ્રત્નાનિ મણીનપિ ॥ ૨૬॥

અત્યુત્કૃષ્ટપરીવાર આજગામ મહાસુખી ।
મલયો ગિરિરાજો હિ સપરીવાર આદૃતઃ ॥ ૨૭॥

સુદિવ્યરચનાયુક્ત આયયૌ બહુસદ્બલઃ ।
સદ્યો દર્દુરનામા ચ મુદિતઃ સકલત્રકઃ ॥ ૨૮॥

બહુશોભાન્વિતસ્તાત યયૌ હિમગિરેર્ગૃહમ્ ।
નિષદોઽપિ પ્રહૃષ્ટાત્મા સપરિચ્છદ આયયૌ ॥ ૨૯॥

સસુતસ્ત્રીગણઃ પ્રીત્યા યયૌ હિમગિરેર્ગૃહમ્ ।
આજગામ મહાભાગ્યો ભૂધરો ગન્ધમાદનઃ ॥ ૩૦॥

કરવીરસ્તથૈવાપિ મહાવિભવસંયુતઃ ।
મહેન્દ્રઃ પર્વતશ્રેષ્ઠ આજગામ હિમાલયમ્ ॥ ૩૧॥

સગણઃ સસુતસ્ત્રીકો બહુશોભાસમન્વિતઃ ।
પારિયાત્રો હિ હૃષ્ટાત્મા મણિરત્નાકરૈર્યુતઃ ॥ ૩૨॥

સગણઃ સપરીવાર આયયૌ હિમભૂધરમ્ ।

ક્રૌઞ્ચઃ પર્વતરાજો હિ મહાબલપરિચ્છદઃ ।
આજગામ ગિરિશ્રેષ્ઠઃ સમુપાયન આદૃતઃ । ૩૩॥

પુરુષોત્તમશૈલોઽપિ સપરિચ્છદ આદૃતઃ ।
મહોપાયનમાદાયાજગામ હિમભૂધરમ્ ॥ ૩૪॥

નીલઃ સલીલઃ સસુતઃ સસ્ત્રીકો દ્રવ્યસંયુતઃ ।
આજગામ હિમાગસ્ય ગૃહમાનન્દસંયુતઃ ॥ ૩૫॥

ત્રિકૂટશ્ચિત્રકૂટોઽપિ વેઙ્કટઃ શ્રીગિરિસ્તથા ।
ગોકામુખી નારદશ્ચ હિમગેહમુપાગમત્ ॥ ૩૬॥

વિન્ધ્યશ્ચ પર્વતશ્રેષ્ઠો નાનાસમ્પત્સમન્વિતઃ ।
આજગામ પ્રહૃષ્ટાત્મા સદારતનયઃ શુભઃ ॥ ૩૭॥

કાલઞ્જરો મહાશૈલો બહુહર્ષસમન્વિતઃ ।
બહુભિઃ સ્વગણૈઃ પ્રીત્યાજગામ હિમભૂધરમ્ ॥ ૩૮॥

કૈલાસસ્તુ મહાશૈલો મહાહર્ષસમન્વિતઃ ।
આજગામ કૃપાં કૃત્વા સર્વોપરિ લસત્પ્રભુઃ ॥ ૩૯॥

અન્યેઽપિ ભૂભૃતો યે હિ દ્વીપેષ્વન્યેષ્વપિ દ્વિજ ।
ઇહાપિ યેઽચલાઃ સર્વે આયયુસ્તે હિમાલયમ્ ॥ ૪૦॥

નિમન્ત્રિતા નગાસ્તત્ર તેન પૂર્વં મુદા મુને ।
આયયુર્નિખિલાઃ પ્રીત્યા વિવાહશ્શિવયોરિતિ ॥ ૪૧॥

તદા સર્વે સમાયાતાઃ શોણભદ્રાદયઃ ખલુ ।
બહુશોભા મહાપ્રીત્યા વિવાહશ્શિવયોરિતિ ॥ ૪૨॥

નદ્યઃ સર્વાઃ સમાયાતા નાનાલઙ્કારસંયુતાઃ ।
દિવ્યરૂપધરાઃ પ્રીત્યા વિવાહશ્શિવયોરિતિ ॥ ૪૩॥

ગોદાવરી ચ યમુના બ્રહ્મસ્ત્રીર્વેણિકા તથા ।
આયયૌ હિમશૈલં વૈ વિવાહશ્શિવયોરિતિ ॥ ૪૪॥

ગઙ્ગા તુ સુમહાપ્રીત્યા નાનાલઙ્કારસંયુતા ।
દિવ્યરૂપાયયૌ પ્રીત્યા વિવાહશ્શિવયોરિતિ ॥ ૪૫॥

નર્મદા તુ મહામોદા રુદ્રકન્યા સરિદ્વરા ।
મહાપ્રીત્યાજગામાશુ વિવાહશ્શિવયોરિતિ ॥ ૪૬॥

આગતૈસ્તૈસ્તતઃ સર્વૈઃ સર્વતો હિમભૂધરમ્ ।
સઙ્કુલાસીત્પુરી દિવ્યા સર્વશોભાસમન્વિતા ॥ ૪૭॥

મહોત્સવા લસત્કેતુધ્વજાતોરણકાધિકા ।
વિતાનવિનિવૃત્તાર્કા તથા નાનાલસત્પ્રભા ॥ ૪૮॥

હિમાલયોઽપિ સુપ્રીત્યાદરેણ વિવિધેન ચ ।
તેષાં ચકાર સમ્માનં તાસાં ચૈવ યથાયથમ્ ॥ ૪૯॥

સર્વાન્નિવાસયામાસ સુસ્થાનેષુ પૃથક્ પૃથક્ ।
સામગ્રીભિરનેકાભિસ્તોષયામાસ કૃત્સ્નશઃ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે લગ્નપત્રસમ્પ્રેષણસામગ્રીસઙ્ગ્રહશૈલાગમનવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । વિવાહમણ્ડપાદિરચનાવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ શૈલેશ્વરઃ પ્રીતો હિમવાન્મુનિસત્તમ ।
સ્વપુરં રચયામાસ વિચિત્રં પરમોત્સવમ્ ॥ ૧॥

સિક્તમાર્ગં સંસ્કૃતં ચ શોભિતં પરમર્દ્ધિભિઃ ।
દ્વારિ દ્વારિ ચ રમ્ભાદિ મઙ્ગલં દ્રવ્યસંયુતમ્ ॥ ૨॥

પ્રાઙ્ગણં રચયામાસ રમ્ભાસ્તમ્ભસમન્વિતમ્ ।
પટ્ટસૂત્રૈઃ સન્નિબદ્ધં રસાલપલ્લવાન્વિતમ્ ॥ ૩॥

માલતીમાલ્યસંયુક્તં લસત્તોરણસુપ્રભમ્ ।
શોભિતં મઙ્ગલદ્રવ્યૈશ્ચતુર્દિક્ષુ સ્થિતૈઃ શુભૈઃ ॥ ૪॥

તથૈવ સર્વં પરયા મુદાન્વિત-
શ્ચક્રે ગિરીન્દ્રઃ સ્વસુતાર્થમેવ ।

ગર્ગં પુરસ્કૃત્ય મહાપ્રભાવં
પ્રસ્તાવયોગ્યં ચ સુમઙ્ગલં હિ ॥ ૫॥

આહૂય વિશ્વકર્માણં કારયામાસ સાદરમ્ ।
મણ્ડપં ચ સુવિસ્તીર્ણં વેદિકાદિમનોહરમ્ ॥ ૬॥

અયુતેન સુરર્ષે તદ્યોજનાનાં ચ વિસ્તૃતમ્ ।
અનેકલક્ષણોપેતં નાનાશ્ચર્યસમન્વિતમ્ ॥ ૭॥

સ્થાવરં જઙ્ગમં સર્વં સદૃશં તૈર્મનોહરમ્ ।
સર્વતોઽદ્ભુતસર્વસ્વં નાનાવસ્તુચમત્કૃતમ્ ॥ ૮॥

જઙ્ગમં વિજિતં તત્ર સ્થાવરેણ વિશેષતઃ ।
જઙ્ગમેન ચ તત્રાસીજ્જિતં સ્થાવરમેવ હિ ॥ ૯॥

પયસા ચ જિતા તત્ર સ્થલભૂમિર્ન ચાન્યથા ।
જલં કિં હિ સ્થલં કિં હિ ન વિદુઃ કેઽપિ કોવિદાઃ ॥ ૧૦॥

ક્વચિત્સિંહાઃ કૃત્રિમાશ્ચ ક્વચિત્સારસપઙ્ક્તયઃ ।
ક્વચિચ્છિખણ્ડિનસ્તત્ર કૃત્રિમાશ્ચ મનોહરાઃ ॥ ૧૧॥

ક્વચિત્સ્ત્રિયઃ કૃત્રિમાશ્ચ નૃત્યન્ત્યઃ પુરુષૈસ્સહ ।
મોહયન્ત્યો જનાન્સર્વાન્પશ્યન્ત્યઃ કૃત્રિમાસ્તથા ॥ ૧૨॥

તથા તેનૈવ વિધિના દ્વારપાલા મનોહરાઃ ।
હસ્તૈર્ધનૂંષિ ચોદ્ધૃત્ય સ્થાવરા જઙ્ગમોપમાઃ ॥ ૧૩॥

દ્વારિ સ્થિતા મહાલક્ષ્મીઃ કૃત્રિમા રચિતાદ્ભુતા ।
સર્વલક્ષણસંયુક્તાગતા સાક્ષાત્પયોર્ણવાત્ ॥ ૧૪॥

ગજાશ્ચાલઙ્કૃતા હ્યાસન્કૃત્રિમા અકૃતોપમાઃ ।
તથાશ્વાઃ સાદિભિશ્ચૈવ ગજાશ્ચ ગજસાદિભિઃ ॥ ૧૫॥

રથા રથિભિરાકૃષ્ટા મહાશ્ચર્યસમન્વિતાઃ ।
વાહનાનિ તથાન્યાનિ પત્તયઃ કૃત્રિમાસ્તથા ॥ ૧૬॥

એવં વિમોહનાર્થં તુ કૃતં વૈ વિશ્વકર્મણા ।
દેવાનાં ચ મુનીનાં ચ તેન પ્રીતાત્મના મુને ॥ ૧૭॥

મહાદ્વારિ સ્થિતો નન્દી કૃત્રિમશ્ચ કૃતો મુને ।
શુદ્ધસ્ફટિકસઙ્કાશો યથા નન્દી તથૈવ સઃ ॥ ૧૮॥

તસ્યોપરિ મહાદિવ્યં પુષ્પકં રત્નભૂષિતમ્ ।
રાજિતં પલ્લવૈઃ શુભ્રૈશ્ચામરૈશ્ચ સુશોભિતમ્ ॥ ૧૯॥

વામપાર્શ્વે ગજૌ દ્વૌ ચ શુદ્ધકાશ્મીરસન્નિભૌ ।
ચતુર્દન્તૌ ષષ્ટિવર્ષૌ ભેદમાનૌ મહાપ્રભૌ ॥ ૨૦॥

તથૈવાર્કનિભૌ તેન કૃતૌ ચાશ્વૌ મહાપ્રભૌ ।
ચામરાલઙ્કૃતૌ દિવ્યૌ દિવ્યાલઙ્કારભૂષિતૌ ॥ ૨૧॥

દંશિતા વરરત્નાઢ્યા લોકપાલાસ્તથૈવ ચ ।
સર્વે દેવા યથાર્થં વૈ કૃતા વૈ વિશ્વકર્મણા ॥ ૨૨॥

તથા હિ ઋષયઃસર્વે ભૃગ્વાદ્યાશ્ચ તપોધનાઃ ।
અન્યે હ્યુપસુરાસ્તદ્વત્સિદ્ધાશ્ચાન્યેઽપિ વૈ કૃતાઃ ॥ ૨૩॥

વિષ્ણુશ્ચ પાર્ષદૈઃ સર્વૈર્ગરુડાખ્યૈઃ સમન્વિતઃ ।
કૃત્રિમો નિર્મિતસ્તદ્વત્પરમાશ્ચર્યરૂપવાન્ ॥ ૨૪॥

તથૈવાહં સુતૈર્વેદૈસ્સિદ્ધૈશ્ચ પરિવારિતઃ ।
કૃત્રિમો નિર્મિતસ્તદ્વત્પઠન્સૂક્તાનિ નારદ ॥ ૨૫॥

ઐરાવતગજારૂઢઃ શક્રઃ સ્વદલસંયુતઃ ।
કૃત્રિમો નિર્મિતસ્તદ્વત્પરિપૂર્ણેન્દુસન્નિભઃ ॥ ૨૬॥

કિં બહૂક્તેન દેવર્ષે સર્વો વૈ વિશ્વકર્મણા ।
હિમાગપ્રેરિતેનાશુ ક્લૃપ્તઃસુરસમાજકઃ ॥ ૨૭॥

એવમ્ભૂતઃ કૃતસ્તેન મણ્ડપો દિવ્યરૂપવાન્ ।
અનેકાશ્ચર્યસમ્ભૂતો મહાન્દેવવિમોહનઃ ॥ ૨૮॥

અથાજ્ઞપ્તો ગિરીશેન વિશ્વકર્મા મહામતિઃ ।
નિવાસાર્થં સુરાદીનાં તત્તલ્લોકાન્ હિ યત્નતઃ ॥ ૨૯॥

તત્રૈવ ચ મહામઞ્ચાઃ સુપ્રભાઃ પરમાદ્ભુતાઃ ।
રચિતાઃસુખદા દિવ્યાસ્તેષાં વૈ વિશ્વકર્મણા ॥ ૩૦॥

તથા સ સત્યલોકં વૈ વિરેચે ક્ષણતોઽદ્ભુતમ્ ।
દીપ્ત્યા પરમયા યુક્તં નિવાસાર્થં સ્વયમ્ભુવઃ ॥ ૩૧॥

તથૈવ વિષ્ણોસ્ત્વપરં વૈકુણ્ઠાખ્યં મહોજ્જ્વલમ્ ।

વિરેચે ક્ષણતો દિવ્યં નાનાશ્ચર્યસમન્વિતમ્ ॥ ૩૨॥

અમરેશગૃહં દિવ્યં તથૈવાદ્ભુતમુત્તમમ્ ।
વિરેચે વિશ્વકર્માસૌ સર્વૈશ્વર્યસમન્વિતમ્ ॥ ૩૩॥

ગૃહાણિ લોકપાલાનાં વિરેચે સુન્દરાણિ ચ ।
તદ્વત્સ પ્રીતિતો દિવ્યાન્યદ્ભુતાનિ મહાન્તિ ચ ॥ ૩૪॥

અન્યેષામમરાણાં ચ સર્વેષાં ક્રમશસ્તથા ।
સદનાનિ વિચિત્રાણિ રચિતાનિ ચ તેન વૈ ॥ ૩૫॥

વિશ્વકર્મા મહાબુદ્ધિઃ પ્રાપ્તશમ્ભુમહાવરઃ ।
વિરેચે ક્ષણતઃ સર્વં શિવતુષ્ટ્યર્થમેવ ચ ॥ ૩૬॥

તથૈવ ચિત્રં પરમં મહોજ્જ્વલં
મહાપ્રભં દેવવરૈઃ સુપૂજિતમ્ ।
ગિરીશચિહ્નં શિવલોકસંસ્થિતં
સુશોભિતં શમ્ભુગૃહં ચકાર ॥ ૩૭॥

એવમ્ભૂતા કૃતા તેન રચના વિશ્વકર્મણા ।
વિચિત્રા શિવતુષ્ટ્યર્થં પરાશ્ચર્યા મહોજ્જ્વલા ॥ ૩૮॥

એવં કૃત્વાખિલં ચેદં વ્યવહારં ચ લૌકિકમ્ ।
પર્યૈક્ષિષ્ટ મુદા શમ્ભ્વાગમનં સ હિમાચલઃ ॥ ૩૯॥

ઇતિ પ્રોક્તમશેષેણ વૃત્તાન્તં પ્રમુદાવહમ્ ।
હિમાલયસ્ય દેવર્ષે કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે મણ્ડપાદિરચનાવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૨.૩.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । શિવવરયાત્રાવર્ણનમ્ ।

નારદ ઉવાચ ।

વિધે તાત મહાપ્રાજ્ઞ વિષ્ણુશિષ્ય નમોઽસ્તુ તે ।
અદ્ભુતેયં કથાશ્રાવિ ત્વત્તોઽસ્માભિઃ કૃપાનિધે ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ ચરિતં શશિમૌલિનઃ ।
વૈવાહિકં સુમાઙ્ગલ્યં સર્વાઘૌઘવિનાશનમ્ ॥ ૨॥

કિં ચકાર મહાદેવઃ પ્રાપ્ય મઙ્ગલપત્રિકામ્ ।
તાં શ્રાવય કથાં દિવ્યાં શઙ્કરસ્ય પરાત્મનઃ ॥ ૩॥

બ્રહ્મોવાચ ।
શ‌ૃણુ વત્સ મહાપ્રાજ્ઞ શાઙ્કરં પરમં યશઃ ।
યચ્ચકાર મહાદેવઃ પ્રાપ્ય મઙ્ગલપત્રિકામ્ ॥ ૪॥

અથ શમ્ભુર્ગૃહીત્વા તાં મુદા મઙ્ગલપત્રિકામ્ ।
વિજહાસ પ્રહૃષ્ટાત્મા માનં તેષાં વ્યધાદ્વિભુઃ ॥ ૫॥

વાચયિત્વા ચ તાં સમ્યગ્સ્વીચકાર વિધાનતઃ ।
તજ્જનાન્ચાપયામાસ બહુસમ્માન્ય ચાદૃતઃ ॥ ૬॥

ઉવાચ મુનિવર્ગાંસ્તાન્કાર્યં સમ્યક્ કૃતં શુભમ્ ।
આગન્તવ્યં વિવાહે મે વિવાહઃ સ્વીકૃતો મયા ॥ ૭॥

ઇત્યાકર્ણ્ય વચઃ શમ્ભોઃ પ્રહૃષ્ટાસ્તે પ્રણમ્ય તમ્ ।
પરિક્રમ્ય યયુર્ધામ શંસન્તઃ સ્વં વિધિં પરમ્ ॥ ૮॥

અથ દેવેશ્વરઃ શમ્ભુઃ સામરસ્તવાં મુને દ્રુતમ્ ।
લૌકિકાચારમાશ્રિત્ય મહાલીલાકરઃ પ્રભુઃ ॥ ૯॥

ત્વમાગતઃ પરપ્રીત્યા પ્રશંસંસ્ત્વં વિધિં પરમ્ ।
પ્રણમંશ્ચ નતસ્કન્ધો વિનીતાત્મા કૃતાઞ્જલિઃ ॥ ૧૦॥

અસ્તૌસ્સુજયશબ્દાનિ સમુચ્ચાર્ય મુહુર્મુહુઃ ।
નિદેશં પ્રાર્થયંસ્તસ્ય પ્રશંસંસ્ત્વં વિધિમ્મુને ॥ ૧૧॥

તતઃ શમ્ભુઃ પ્રહૃષ્ટાત્મા દર્શયઁલ્લૌકિકીં ગતિમ્ ।
ઉવાચ મુનિવર્ય ત્વાં પ્રીણયન્ શુભયા ગિરા ॥ ૧૨॥

શિવ ઉવાચ ।
પ્રીત્યા શ‌ૃણુ મુનિશ્રેષ્ઠ હ્યસ્મત્તોઽદ્ય વદામિ તે ।
બ્રુવે તત્ત્વાં પ્રિયો મે યદ્ભક્તરાજશિરોમણિઃ ॥ ૧૩॥

કૃતં મહત્તપો દેવ્યા પાર્વત્યા તવ શાસનાત્ ।
તસ્યૈ વરો મયા દત્તઃ પતિત્વે તોષિતેન વૈ ॥ ૧૪॥

કરિષ્યેઽહં વિવાહં ચ તસ્યા વશ્યો હિ ભક્તિતઃ ।
સપ્તર્ષિભિઃ સાધિતં ચ તલ્લગ્નં શોધિતં ચ તૈઃ ॥ ૧૫॥

અદ્યતઃસપ્તમે ચાહ્નિ તદ્ભવિષ્યતિ નારદ ।
મહોત્સવં કરિષ્યામિ લૌકિકીં ગતિમાશ્રિતઃ ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય શઙ્કરસ્ય પરાત્મનઃ ।
પ્રસન્નધીઃ પ્રભું નત્વા તાત ત્વં વાક્યમબ્રવીઃ ॥ ૧૭॥

નારદ ઉવાચ ।
ભવતસ્તુ વ્રતમિદં ભક્તવશ્યો ભવાન્મતઃ ।
સમ્યક્ કૃતં ચ ભવતા પાર્વતીમાનસેપ્સિતમ્ ॥ ૧૮॥

કાર્યં મત્સદૃશં કિઞ્ચિત્કથનીયં ત્વયા વિભો ।
મત્વા સ્વસેવકં માં હિ કૃપાં કુરુ નમોઽસ્તુ તે ॥ ૧૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્તસ્તુ ત્વયા શમ્ભુઃ શઙ્કરો ભક્તવત્સલઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા સાદરં ત્વાં મુનીશ્વર ॥ ૨૦॥

શિવ ઉવાચ ।
વિષ્ણુપ્રભૃતિદેવાંશ્ચ મુનીન્ સિદ્ધાનપિ ધ્રુવમ્ ।
ત્વં નિમન્ત્રય મદ્વાણ્યા મુનેઽન્યાનપિ સર્વતઃ ॥ ૨૧॥

સર્વ આયાન્તુ સોત્સાહાઃ સર્વશોભાસમન્વિતાઃ ।
સસ્ત્રીસુતગણાઃ પ્રીત્યા મમ શાસનગૌરવાત્ ॥ ૨૨॥

નાગમિષ્યન્તિ યે ત્વત્ર મદ્વિવાહોત્સવે મુને ।
તે સ્વકીયા ન મન્તવ્યા મયા દેવાદયઃ ખલુ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇતીશાજ્ઞાં તતો ધૃત્વા ભવાન્ શઙ્કરવલ્લભઃ ।
સર્વાન્નિમન્ત્રયામાસ તં તં ગત્વા દ્રુતં મુને ॥ ૨૪॥

શમ્ભૂપકણ્ઠમાગત્ય દ્રુતં મુનિવરો ભવાન્ ।

તદ્ હૃત્યાત્તત્ર સન્તસ્થૌ તદાજ્ઞાં પ્રાપ્ય નારદ ॥ ૨૫॥

શિવોઽપિ તસ્થૌ સોત્કણ્ઠસ્તદાગમનલાલસઃ ।
સ્વગણૈઃસોત્સવૈઃ સર્વૈર્નૃત્યદ્ભિઃ સર્વતો દિશમ્ ॥ ૨૬॥

એતસ્મિન્નેવ કાલે તુ રચયિત્વા સ્વવેષકમ્ ।
આજગામાચ્યુતઃ શીઘ્રં કૈલાસં સપરિચ્છદઃ ॥ ૨૭॥

શિવં પ્રણમ્ય સદ્ભક્ત્યા સદારઃ સદલો મુદા ।
તદાજ્ઞાં પ્રાપ્ય સન્તસ્થૌ સુસ્થાને પ્રીતમાનસઃ ॥ ૨૮॥

તથાહં સ્વગણૈરાશુ કૈલાસમગમં મુદા ।
પ્રભું પ્રણમ્યાતિષ્ઠં વૈ સાનન્દઃ સ્વગણાન્વિતઃ ॥ ૨૯॥

ઇન્દ્રાદયો લોકપાલા આયયુઃ સપરિચ્છદાઃ ।
તથૈવાલઙ્કૃતાસ્સર્વે સોત્સવાસ્સકલત્રકાઃ ॥ ૩૦॥

તથૈવં મુનયો નાગાસ્સિદ્ધા ઉપસુરાસ્તથા ।
આયયુશ્ચાપરેઽપીહ સોત્સવાઃ સુનિમન્ત્રિતાઃ ॥ ૩૧॥

મહેશ્વરસ્તદા તત્રાગતાનાં ચ પૃથક્ પૃથક્ ।
સર્વેષામમરાદ્યાનાં સત્કારં વ્યદધાન્મુદા ॥ ૩૨॥

અથોત્સવો મહાનાસીત્કૈલાસે પરમોઽદ્ભુતઃ ।
નૃત્યાદિકં તદા ચક્રુર્યથાયોગ્યં સુરસ્ત્રિયઃ ॥ ૩૩॥

એતસ્મિન્સમયે દેવા વિષ્ણ્વાદ્યા યે સમાગતાઃ ।
યાત્રાં કારયિતું શમ્ભોસ્તત્રોષુસ્તેઽખિલા મુને ॥ ૩૪॥

શિવાજ્ઞપ્તાસ્તદા સર્વે મદીયમિતિ યન્ત્રિતાઃ ।
શિવકાર્યમિદં સર્વં ચક્રિરે શિવસેવનમ્ ॥ ૩૫॥

માતરઃ સપ્ત તાસ્તત્ર શિવભૂષાવિધિં પરમ્ ।
ચક્રિરે ચ મુદા યુક્તા યથાયોગ્યં તથા પુનઃ ॥ ૩૬॥

તસ્ય સ્વાભાવિકો વેષો ભૂષાવિધિરભૂત્તદા ।
તસ્યેચ્છયા મુનિશ્રેષ્ઠ પરમેશસ્ય સુપ્રભોઃ ॥ ૩૭॥

ચન્દ્રશ્ચ મુકુટસ્થાને સાન્નિધ્યમકરોત્તદા ।
લોચનં સુન્દરં હ્યાસીત્તૃતીયં તિલકં શુભમ્ ॥ ૩૮॥

કર્ણાભરણરૂપૌ ચ યૌ હિ સર્પૌ પ્રકીર્તિતૌ ।
કુણ્ડલેઽભવતાં તસ્ય નાનારત્નાન્વિતે મુને ॥ ૩૯॥

અન્યાઙ્ગસંસ્થિતાઃ સર્પાઃ તદઙ્ગાભરણાનિ ચ ।
બભૂવુરતિરમ્યાણિ નાનારત્નમયાનિ ચ ॥ ૪૦॥

વિભૂતિરઙ્ગરાગોઽભૂચ્ચન્દનાદિસમુદ્ભવઃ ।
તદ્દુકૂલમભૂદ્દિવ્યં ગજચર્માદિ સુન્દરમ્ ॥ ૪૧॥

ઈદૃશં સુન્દરં રૂપં જાતં વર્ણાતિદુષ્કરમ્ ।
ઈશ્વરોઽપિ સ્વયં સાક્ષાદૈશ્વર્યં લબ્ધવાન્ સ્વતઃ ॥ ૪૨॥

તતશ્ચ સર્વે સુરપક્ષદાનવા
નાગાઃ પતઙ્ગાપ્સરસો મહર્ષયઃ ।
સમેત્ય સર્વે શિવસન્નિધિં તદા
મહોત્સવાઃ પ્રોચુરહો મુદાન્વિતાઃ ॥ ૪૩॥

સર્વ ઊચુઃ ।
ગચ્છ ગચ્છ મહાદેવ વિવાહાર્થં મહેશ્વર ।
ગિરિજાયા મહાદેવ્યાઃ સહાસ્માભિઃ કૃપાં કુરુ ॥ ૪૪॥

તતો વિષ્ણુરુવાચેદં પ્રસ્તાવસદૃશં વચઃ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા વિજ્ઞાનપ્રીતમાનસઃ ॥ ૪૫॥

વિષ્ણુરુવાચ ।
દેવ દેવ મહાદેવ શરણાગતવત્સલ ।
કાર્યકર્તા સ્વભક્તાનાં વિજ્ઞપ્તિં શ ૃણુ મે પ્રભો ॥ ૪૬॥

ગૃહ્યોક્તવિધિના શમ્ભો સ્વવિવાહસ્ય શઙ્કર ।
ગિરીશસુતયા દેવ્યા કર્મ કર્તુમિહાર્હસિ ॥ ૪૭॥

ત્વયા ચ ક્રિયમાણે તુ વિવાહસ્ય વિધૌ હર ।
સ એવ હિ તથા લોકે સર્વઃ સુખ્યાતિમાપ્નુયાત્ ॥ ૪૮॥

મણ્ડપસ્થાપનં નાન્દીમુખં તત્કુલધર્મતઃ ।
કારય પ્રીતિતો નાથ લોકે સ્વં ખ્યાપયન્ યશઃ ॥ ૪૯॥

બ્રહ્મોવાચ ।
એવમુક્તસ્તદા શમ્ભુર્વિષ્ણુના પરમેશ્વરઃ ।

લૌકિકાચારનિરતો વિધિના તચ્ચકાર સઃ ॥ ૫૦॥

અહં હ્યધિકૃતસ્તેન સર્વમભ્યુદયોચિતમ્ ।
અકુર્વં મુનિભિઃ પ્રીત્યા તત્ર તત્કર્મ ચાદરાત્ ॥ ૫૧॥

કશ્યપોઽત્રિર્વસિષ્ઠશ્ચ ગૌતમો ભાગુરિર્ગુરુઃ ।
કણ્વો બૃહસ્પતિઃ શક્તિર્જમદગ્નિઃ પરાશરઃ ॥ ૫૨॥

માર્કણ્ડેયશ્શિલાપાકોઽરુણપાલોઽકૃતશ્રમઃ ।
અગસ્ત્યશ્ચ્યવનો ગર્ગશ્શિલાદોઽથ મહામુને ॥ ૫૩॥

દધીચિરુપમન્યુશ્ચ ભરદ્વાજોઽકૃતવ્રણઃ ।
પિપ્પલાદોઽથ કુશિકઃ કૌત્સો વ્યાસઃ સશિષ્યકઃ ॥ ૫૪॥

એતે ચાન્યે ચ બહવ આગતાશ્શિવસન્નિધિમ્ ।
મયા સુનોદિતાસ્તત્ર ચક્રુસ્તે વિધિવત્ક્રિયામ્ ॥ ૫૫॥

વેદોક્તવિધિના સર્વે વેદવેદાઙ્ગપારગાઃ ।
રક્ષાં ચક્રુર્મહેશસ્ય કૃત્વા કૌતુકમઙ્ગલમ્ ॥ ૫૬॥

ઋગ્યજુસ્સામસૂક્તૈસ્તુ તથા નાનાવિધૈઃ પરૈઃ ।
મઙ્ગલાનિ ચ ભૂરીણિ ચક્રુઃ પ્રીત્યર્ષયોઽખિલાઃ ॥ ૫૭॥

ગ્રહાણાં પૂજનં પ્રીત્યા ચક્રુસ્તે શમ્ભુના મયા ।
મણ્ડલસ્થસુરાણાં ચ સર્વેષાં વિઘ્નશાન્તયે ॥ ૫૮॥

તતશ્શિવઃ સુસન્તુષ્ટઃ કૃત્વા સર્વં યથોચિતમ્ ।
લૌકિકં વૈદિકં કર્મ નનામ ચ મુદા દ્વિજાન્ ॥ ૫૯॥

અથ સર્વેશ્વરો વિપ્રાન્દેવાન્કૃત્વા પુરસ્સરાન્ ।
નિસ્સસાર મુદા તસ્માત્કૈલાસાત્પર્વતોત્તમાત્ ॥ ૬૦॥

બહિઃ કૈલાસકુધરાચ્છમ્ભુસ્તસ્થૌ મુદાન્વિતઃ ।
દેવૈઃ સહ દ્વિજૈશ્ચૈવ નાનાસ્વીકારકઃ પ્રભુઃ ॥ ૬૧॥

તદોત્સવો મહાનાસીત્તત્ર દેવાદિભિઃ કૃતઃ ।
સન્તુષ્ટ્યર્થં મહેશસ્ય ગાનવાદ્યસુનૃત્યકઃ ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે દેવનિમન્ત્રણદેવાગમનશિવયાત્રાવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૦. ચત્વારિંશોઽધ્યાયઃ । હિમગિરિગૃહેશિવસ્યાગમનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ શમ્ભુઃ સમાહૂય નન્દ્યાદીન્ સકલાન્ગણાન્ ।
આજ્ઞાપયામાસ મુદા ગન્તું સ્વેન ચ તત્ર વૈ ॥ ૧॥

શિવ ઉવાચ ।
અપિ યૂયં સહ મયા સઙ્ગચ્છધ્વં ગિરેઃ પુરમ્ ।
કિયદ્ગણાનિહાસ્થાપ્ય મહોત્સવપુરસ્સરમ્ ॥ ૨॥

બ્રહ્મોવાચ ।
અથ તે સમનુજ્ઞપ્તા ગણેશા નિર્યયુર્મુદા ।
સ્વં સ્વં બલમુપાદાય તાન્ કથઞ્ચિદ્વદામ્યહમ્ ॥ ૩॥

અભ્યગાચ્છઙ્ખકર્ણશ્ચ ગણકોટ્યા ગણેશ્વરઃ ।
શિવેન સાર્ધં સઙ્ગન્તું હિમાચલપુરં પ્રતિ ॥ ૪॥

દશકોટ્યા કેકરાક્ષો ગણાનાં સ મહોત્સવઃ ।
અષ્ટકોટ્યા ચ વિકૃતો ગણાનાં ગણનાયકઃ ॥ ૫॥

ચતુષ્કોટ્યા વિશાખશ્ચ ગણાનાં ગણનાયકઃ ।
પારિજાતશ્ચ નવભિઃ કોટિભિર્ગણપુઙ્ગવઃ ॥ ૬॥

ષષ્ટિઃ સર્વાન્તકઃ શ્રીમાન્ તથૈવ વિકૃતાનનઃ ।
ગણાનાં દુન્દુભોઽષ્ટાભિઃ કોટિભિર્ગણનાયકઃ ॥ ૭॥

પઞ્ચભિશ્ચ કપાલાખ્યો ગણેશઃ કોટિભિસ્તથા ।
ષડ્ભિસ્સન્દારકો વીરો ગણાનાં કોટિભિર્મુને ॥ ૮॥

કોટિકોટિભિરેવેહ કન્દુકઃ કુણ્ડકસ્તથા ।
વિષ્ટમ્ભો ગણપોઽષ્ટાભિર્ગણાનાં કોટિભિસ્તથા ॥ ૯॥

સહસ્રકોટ્યા ગણપઃ પિપ્પલો મુદિતો યયૌ ।

તથા સનાદકો વીરો ગણેશો મુનિસત્તમ ॥ ૧૦॥

આવેશનસ્તથાષ્ટાભિઃ કોટિભિર્ગણનાયકઃ ।
મહાકેશઃ સહસ્રેણ કોટીનાં ગણપો યયૌ ॥ ૧૧॥

કુણ્ડો દ્વાદશકોટ્યા હિ તથા પર્વતકો મુને ।
અષ્ટાભિઃ કોટિભિર્વીરઃ સમગાચ્ચન્દ્રતાપનઃ ॥ ૧૨॥

કાલશ્ચ કાલકશ્ચૈવ મહાકાલઃ શતેન વૈ ।
કોટીનાં ગણનાથો હિ તથૈવાગ્નિકનામકઃ ॥ ૧૩॥

કોટ્યગ્નિમુખ એવાગાદ્ ગણાનાં ગણનાયકઃ ।
આદિત્યમૂર્ધા કોટ્યા ચ તથા ચૈવ ઘનાવહઃ ॥ ૧૪॥

સન્નાહઃ શતકોટ્યા હિ કુમુદો ગણપસ્તથા ।
અમોઘઃ કોકિલશ્ચૈવ શતકોટ્યા ગણાધિપઃ ॥ ૧૫॥

સુમન્ત્રઃ કોટિકોટ્યા ચ ગણાનાં ગણાનાયકઃ ।
કાકપાદોદરઃ કોટિષષ્ટ્યા સન્તાનકસ્તથા ॥ ૧૬॥

મહાબલશ્ચ નવભિર્મધુપિઙ્ગશ્ચ કોકિલઃ ।
નીલો નવત્યા કોટીનાં પૂર્ણભદ્રસ્તથૈવ ચ ॥ ૧૭॥

સપ્તકોટ્યા ચતુર્વક્ત્રઃ કરણો વિંશકોટિભિઃ ।
યયૌ નવતિકોટ્યા તુ ગણેશાનોઽહિરોમકઃ ॥ ૧૮॥

યજ્વાક્ષઃ શતમન્યુશ્ચ મેઘમન્યુશ્ચ નારદ ।
તાવત્કોટ્યા યયુઃ સર્વે ગણેશા હિ પૃથક્ પૃથક્ ॥ ૧૯॥

કાષ્ઠાઙ્ગુષ્ઠશ્ચતુઃ ષષ્ટ્યા કોટીનાં ગણનાયકઃ ।
વિરૂપાક્ષઃ સુકેશશ્ચ વૃષભશ્ચ સનાતનઃ ॥ ૨૦॥

તાલકેતુઃ ષડાસ્યશ્ચ ચઞ્ચ્વાસ્યશ્ચ સનાતનઃ ।
સંવર્તકસ્તથા ચૈત્રો લકુલીશઃ સ્વયમ્પ્રભુઃ ॥ ૨૧॥

લોકાન્તકશ્ચ દીપ્તાત્મા તથા દૈત્યાન્તકો મુને ।
દેવો ભૃઙ્ગિરિટિઃ શ્રીમાન્દેવદેવપ્રિયસ્તથા ॥ ૨૨॥

અશનિર્ભાનુકશ્ચૈવ ચતુઃષષ્ટ્યા સહસ્રશઃ ।
યયુઃ શિવવિવાહાર્થં શિવેન સહસોત્સવાઃ ॥ ૨૩॥

ભૂતકોટિસહસ્રેણ પ્રમથાઃ કોટિભિસ્ત્રિભિઃ ।
વીરભદ્રશ્ચતુઃષષ્ટ્યા રોમજાનાન્ત્રિકોટિભિઃ ॥ ૨૪॥

કોટિકોટિસહસ્રાણાં શતૈર્વિંશતિભિર્વૃતાઃ ।
તત્ર જગ્મુશ્ચ નન્દ્યાદ્યા ગણપાઃ શઙ્કરોત્સવે ॥ ૨૫॥

ક્ષેત્રપાલો ભૈરવશ્ચ કોટિકોટિગણૈર્યુતઃ ।
ઉદ્વાહઃ શઙ્કરસ્યેત્યાયયૌ પ્રીત્યા મહોત્સવઃ ॥ ૨૬॥

એતે ચાન્યે ચ ગણપા અસઙ્ખ્યાતા મહાબલાઃ ।
તત્ર જગ્મુર્મહાપ્રીત્યા સોત્સાહાઃ શઙ્કરોત્સવે ॥ ૨૭॥

સર્વે સહસ્રહસ્તાશ્ચ જટામુકુટધારિણઃ ।
ચન્દ્રરેખાવતંસાશ્ચ નીલકણ્ઠાસ્ત્રિલોચનાઃ ॥ ૨૮॥

રુદ્રાક્ષાભરણાઃ સર્વે તથા સદ્ભસ્મધારિણઃ ।
હારકુણ્ડલકેયૂરમુકુટાદ્યૈરલઙ્કૃતાઃ ॥ ૨૯॥

બ્રહ્મવિષ્ણ્વિન્દ્રસઙ્કાશા અણિમાદિગુણૈર્યુતાઃ ।
સૂર્યકોટિપ્રતીકાશાસ્તત્ર રેજુર્ગણેશ્વરાઃ ॥ ૩૦॥

પૃથિવીચારિણઃ કેચિત્ કેચિત્પાતાલચારિણઃ ।
કેચિદ્વ્યોમચરાઃ કેચિત્સપ્તસ્વર્ગચરા મુને ॥ ૩૧॥

કિં બહૂક્તેન દેવર્ષે સર્વલોકનિવાસિનઃ ।
આયયુઃ સ્વગણાઃ શમ્ભોઃ પ્રીત્યા વૈ શઙ્કરોત્સવે ॥ ૩૨॥

ઇત્થં દેવૈર્ગણૈશ્ચાન્યૈઃ સહિતઃ શઙ્કરઃ પ્રભુઃ ।
યયૌ હિમગિરિપુરં વિવાહાર્થં નિજસ્ય વૈ ॥ ૩૩॥

યદા જગામ સર્વેશો વિવાહાર્થં સુરાદિભિઃ ।
તદા તત્ર હ્યભૂદ્વૃત્તં તચ્છૃણુ ત્વં મુનીશ્વર ॥ ૩૪॥

રુદ્રસ્ય ભગિની ભૂત્વા ચણ્ડી સૂત્સવસંયુતા ।
તત્રાજગામ સુપ્રીત્યા પરેષાં સુભયાવહા ॥ ૩૫॥

પ્રેતાસનસમારૂઢા સર્પાભરણભૂષિતા ।
પૂર્ણં કલશમાદાય હૈમં મૂર્ધ્નિ મહાપ્રભમ્ ॥ ૩૬॥

સ્વપરીવારસંયુક્તા દીપ્તાસ્યા દીપ્તલોચના ।
કુતૂહલં પ્રકુર્વન્તી જાતહર્ષા મહાબલા ॥ ૩૭॥

તત્ર ભૂતગણા દિવ્યા વિરૂપાઃ કોટિશો મુને ।
વિરાજન્તે સ્મ બહુશઃ તથા નાનાવિધાસ્તદા ॥ ૩૮॥

તૈઃ સમેતાગ્રતશ્ચણ્ડી જગામ વિકૃતાનના ।
કુતૂહલાન્વિતા પ્રીતા પ્રીત્યુપદ્રવકારિણી ॥ ૩૯॥

ચણ્ડ્યા સર્વે રુદ્રગણાઃ પૃષ્ઠતશ્ચ કૃતાસ્તદા ।
કોટ્યેકાદશસઙ્ખ્યાકા રૌદ્રરુદ્રપ્રિયાશ્ચ તે ॥ ૪૦॥

તદા ડમરુનિર્ઘોષૈર્વ્યાપ્તમાસીજ્જગત્રયમ્ ।
ભેરીઝઙ્કારશબ્દેન શઙ્ખાનાં નિનદેન ચ ॥ ૪૧॥

તથા દુન્દુભિનિર્ઘોષૈઃ શબ્દઃ કોલાહલોઽભવત્ ।
કુર્વઞ્જગન્મઙ્ગલં ચ નાશયેન્મઙ્ગલેતરત્ ॥ ૪૨॥

ગણાનાં પૃષ્ઠતો ભૂત્વા સર્વે દેવાઃ સમુત્સુકાઃ ।
અન્વયુઃ સર્વસિદ્ધાશ્ચ લોકપાલાદિકા મુને ॥ ૪૩॥

મધ્યે વ્રજન્ રમેશોઽથ ગરુડાસનમાશ્રિતઃ ।
શુશુભે ધ્રિયમાણેન છત્રેણ મહતા મુને ॥ ૪૪॥

ચામરૈર્વીજ્યમાનોઽસૌ સ્વગણૈઃ પરિવારિતઃ ।
પાર્ષદૈર્વિલસદ્ભિશ્ચ સ્વભૂષાવિધિભૂષિતઃ ॥ ૪૫॥

તથાહમપ્યશોભં વૈ વ્રજન્માર્ગે વિરાજિતઃ ।
વેદૈર્મૂર્તિધરૈઃ શાસ્ત્રૈઃ પુરાણૈરાગમૈસ્તથા ॥ ૪૬॥

સનકાદિમહાસિદ્ધૈઃ સપ્રજાપતિભિઃ સુતૈઃ ।
પરિવારૈઃ સંયુતો હિ શિવસેવનતત્પરઃ ॥ ૪૭॥

સ્વસૈન્યમધ્યગઃ શક્ર ઐરાવતગજસ્થિતઃ ।
નાનાવિભૂષિતોઽત્યન્તં વ્રજન્ રેજે સુરેશ્વરઃ ॥ ૪૮॥

તદા તુ વ્રજમાનાસ્તે ઋષયો બહવશ્ચ તે ।
વિરેજુરતિસોત્કણ્ઠાઃ શિવસ્યોદ્વાહનં પ્રતિ ॥ ૪૯॥

શાકિન્યો યાતુધાનાશ્ચ વેતાલાબ્રહ્મરાક્ષસાઃ ।
ભૂતપ્રેતપિશાચાશ્ચ તથાન્યે પ્રમથાદયઃ ॥ ૫૦॥

તુમ્બુરુર્નારદો હાહહૂહૂશ્ચેત્યાદયો વરાઃ ।

ગન્ધર્વાઃ કિન્નરા જગ્મુર્વાદ્યાનાધ્માય હર્ષિતાઃ ॥ ૫૧॥

જગતો માતરઃ સર્વા દેવકન્યાશ્ચ સર્વશઃ ।
ગાયત્રી ચૈવ સાવિત્રી લક્ષ્મીરન્યાઃ સુરસ્ત્રિયઃ ॥ ૫૨॥

એતાશ્ચાન્યાશ્ચ દેવાનાં પત્નયો ભવમાતરઃ ।
ઉદ્વાહઃ શઙ્કરસ્યેતિ જગ્મુઃ સર્વા મુદાન્વિતાઃ ॥ ૫૩॥

શુદ્ધસ્ફટિકસઙ્કાશો વૃષભઃ સર્વસુન્દરઃ ।
યો ધર્મ ઉચ્યતે વેદૈઃ શાસ્ત્રૈઃ સિદ્ધૈર્મહર્ષિભિઃ ॥ ૫૪॥

તમારૂઢો મહાદેવો વૃષભં ધર્મવત્સલઃ ।
શુશુભેઽતીવ દેવર્ષિસેવિતઃ સકલૈર્વ્રજન્ ॥ ૫૫॥

એભિઃ સમેતૈઃ સકલૈર્મહર્ષિભિ-
ર્બભૌ મહેશો બહુશોઽત્યલઙ્કૃતઃ ।
હિમાલયાહ્વસ્ય ધરસ્ય સંવ્રજન્
પાણિગ્રહાર્થં સદનં શિવાયાઃ ॥ ૫૬॥

ઇત્યુક્તં શમ્ભુચરિતં ગમનં પરમોત્સવમ્ ।
હિમાલયપુરોદ્ભૂતં સદ્વૃત્તં શૃણુ નારદ ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવયાત્રાવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૧. એકચત્વારિંશોઽધ્યાયઃ । વિવાહમણ્ડપં દૃષ્ટ્વાદેવાનાં મોહવર્ણનમ્ ।

બ્રહ્મોવાચ ।
તતઃ સમ્મન્ત્ર્ય ચ મિથઃ પ્રાપ્યાજ્ઞાં શાઙ્કરીં હરિઃ ।
મુને ત્વાં પ્રેષયામાસ પ્રથમં કુધરાલયમ્ ॥ ૧॥

અથ પ્રણમ્ય સર્વેશં ગતસ્ત્વં નારદાગ્રતઃ ।
હરિણા નોદિતઃ પ્રીત્યા હિમાચલગૃહં પ્રતિ ॥ ૨॥

ત્વં મુનેઽપશ્ય આત્માનં ગત્વા તદ્વ્રીડયાન્વિતમ્ ।
કૃત્રિમં રચિતં તત્ર વિસ્મિતો વિશ્વકર્મણા ॥ ૩॥

શ્રાન્તસ્ત્વમાત્મના તેન કૃત્રિમેણ મહામુને ।
અવલોકપરઃ સોઽભૂચ્ચરિતં વિશ્વકર્મણઃ ॥ ૪॥

પ્રવિષ્ટો મણ્ડપં તસ્ય હિમાદ્રે રત્નચિત્રિતમ્ ।
સુવર્ણકલશૈર્જુષ્ટં રમ્ભાદિબહુશોભિતમ્ ॥ ૫॥

સહસ્રસ્તમ્ભસંયુક્તં વિચિત્રં પરમાદ્ભુતમ્ ।
વેદિકાં ચ તથા દૃષ્ટ્વા વિસ્મયં ત્વં મુને હ્યયાઃ ॥ ૬॥

તદાવોચશ્ચ સ મુને નારદ ત્વં નગેશ્વરમ્ ।
વિસ્મિતોઽતીવ મનસિ નષ્ટજ્ઞાનો વિમૂઢધીઃ ॥ ૭॥

આગતાસ્તે કિમધુના દેવા વિષ્ણુપુરોગમાઃ ।
તથા મહર્ષયઃ સર્વે સિદ્ધા ઉપસુરાસ્તથા ॥ ૮॥

મહાદેવો વૃષારૂઢો ગણૈશ્ચ પરિવારિતઃ ।
આગતઃ કિં વિવાહાર્થં વદ તથ્યં નગેશ્વર ॥ ૯॥

બ્રહ્મોવાચ ।
ઇત્યેવં વચનં શ્રુત્વા તવ વિસ્મિતચેતસઃ ।
ઉવાચ ત્વાં મુને તથ્યં વાક્યં સ હિમવાન્ ગિરિઃ ॥ ૧૦॥

હિમવાનુવાચ ।
હે નારદ મહાપ્રાજ્ઞાગતો નૈવાધુના શિવઃ ।
વિવાહાર્થં ચ પાર્વત્યાઃ સગણઃ સવરાતકઃ ॥ ૧૧॥

વિશ્વકર્મકૃતં ચિત્રં વિદ્ધિ નારદ સદ્ધિયા ।
વિસ્મયં ત્યજ દેવર્ષે સ્વસ્થો ભવ શિવં સ્મર ॥ ૧૨॥

ભુક્ત્વા વિશ્રમ્ય સુપ્રીતઃ કૃપાં કૃત્વા મમોપરિ ।
મૈનાકાદિધરૈઃ સાર્ધં ગચ્છ ત્વં શઙ્કરાન્તિકમ્ ॥ ૧૩॥

એભિસ્સમેતો ગિરિભિર્મહામતે
સમ્પ્રાર્થ્ય શીઘ્રં શિવમત્ર ચાનય ।
દેવૈઃ સમેતં ચ મહર્ષિસઙ્ઘૈઃ
સુરાસુરૈરર્ચિતપાદપલ્લવમ્ ॥ ૧૪॥

બ્રહ્મોવાચ ।
તથેતિ ચોક્ત્વાગમ આશુ હિ ત્વં
તદૈવ તૈઃ શૈલસુતાદિભિશ્ચ ।
તત્રત્યકૃત્યં સુવિધાય ભુક્ત્વા
મહામનાસ્ત્વં શિવસન્નિધાનમ્ ॥ ૧૫॥

તત્ર દૃષ્ટો મહાદેવો દેવાદિપરિવારિતઃ ।
નમસ્કૃતસ્ત્વયા દીપ્તઃ શૈલૈસ્તૈર્ભક્તિતશ્ચ વૈ ॥ ૧૬॥

તદા મયા વિષ્ણુના ચ સર્વે દેવાઃ સવાસવાઃ ।
પપ્રચ્છુસ્ત્વાં મુને સર્વે રુદ્રસ્યાનુચરાસ્તથા ॥ ૧૭॥

વિસ્મિતાઃ પર્વતાન્દૃષ્ટ્વા સન્દેહાકુલમાનસાઃ ।
મૈનાકસહ્યમેર્વાદ્યાન્નાનાલઙ્કારસંયુતાન્ ॥ ૧૮॥

દેવા ઊચુઃ ।
હે નારદ મહાપ્રાજ્ઞ વિસ્મિતસ્ત્વં હિ દૃશ્યસે ।
સત્કૃતોઽસિ હિમાગેન કિં ન વા વદ વિસ્તરાત્ ॥ ૧૯॥

એતે કસ્માત્સમાયાતાઃ પર્વતા ઇહ સત્તમાઃ ।
મૈનાકસહ્યમેર્વાદ્યાઃ સુપ્રતાપાઃ સ્વલઙ્કૃતાઃ ॥ ૨૦॥

કન્યાં દાસ્યતિ શૈલોઽસૌ શમ્ભવે વા ન નારદ ।
હિમાલયગૃહે તાત કિં ભવત્યદ્ય તદ્વદ ॥ ૨૧॥

ઇતિ સન્દિગ્ધમનસામસ્માકં ચ દિવૌકસામ્ ।
વદ ત્વં પૃચ્છમાનાનાં સન્દેહં હર સુવ્રત ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં વિષ્ણ્વાદીનાન્દિવૌકસામ્ ।
અવોચસ્તાન્મુને ત્વં હિ વિસ્મિતસ્ત્વાષ્ટ્રમાયયા ॥ ૨૩॥

એકાન્તમાશ્રિત્ય ચ માં હિ વિષ્ણુ-
મભાષથા વાક્યમિદં મુને ત્વમ્ ।
શચીપતિં સર્વસુરેશ્વરં વૈ
પક્ષચ્છિદં પૂર્વરિપું ધરાણામ્ ॥ ૨૪॥

નારદ ઉવાચ ।
ત્વષ્ટ્રા કૃતં તદ્વિકૃતં વિચિત્રં

વિમોહનં સર્વદિવૌકસાં હિ ।
યેનૈવ સર્વાન્સ વિમોહિતું સુરાન્
સમિચ્છતિ પ્રેમત એવ યુક્ત્યા ॥ ૨૫॥

પુરા કૃતં તસ્ય વિમોહનં ત્વયા
સુવિસ્મૃતં તત્ સકલં શચીપતે ।
તસ્માદસૌ ત્વાં વિજિગીષુરેવ
ગૃહે ધ્રુવં તસ્ય ગિરેર્મહાત્મનઃ ॥ ૨૬॥

અહં વિમોહિતસ્તેન પ્રતિરૂપેણ ભાસ્વતા ।
તથા વિષ્ણુઃ કૃતસ્તેન બ્રહ્મા શક્રોઽપિ તાદૃશઃ ॥ ૨૭॥

કિં બહૂક્તેન દેવેશ સર્વદેવગણાઃ કૃતાઃ ।
કૃત્રિમાશ્ચિત્રરૂપેણ ન કિઞ્ચિદવશેષિતમ્ ॥ ૨૮॥

વિમોહનાર્થં સર્વેષાં દેવાનાં ચ વિશેષતઃ ।
કૃતા માયા ચિત્રમયી પરિહાસવિકારિણી ॥ ૨૯॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય દેવેન્દ્રો વાક્યમબ્રવીત્ ।
વિષ્ણુમ્પ્રતિ તદા શીઘ્રં ભયાકુલતનુર્હરિમ્ ॥ ૩૦॥

દેવેન્દ્ર ઉવાચ ।
દેવદેવ રમાનાથ ત્વષ્ટા માં નિહનિષ્યતિ ।
પુત્રશોકેન તસ્મોઽસૌ વ્યાજેનાનેન નાન્યથા ॥ ૩૧॥

બ્રહ્મોવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા દેવદેવો જનાર્દનઃ ।
ઉવાચ પ્રહસન્ વાક્યં શક્રમાશ્વાસયંસ્તદા ॥ ૩૨॥

વિષ્ણુરુવાચ ।
નિવાતકવચૈઃ પૂર્વં મોહિતોઽસિ શચીપતે ।
મહાવિદ્યાબલેનૈવ દાનવૈઃ પૂર્વવૈરિભિઃ ॥ ૩૩॥

પર્વતો હિમવાનેષ તથાન્યેઽખિલપર્વતાઃ ।
વિપક્ષા હિ કૃતાઃ સર્વે મમ વાક્યાચ્ચ વાસવ ॥ ૩૪॥

તેઽનુસ્મૃત્યા તુ વૈ દૃષ્ટ્વા માયયા ગિરયો હ્યમી ।
જેતુમિચ્છન્તિ યે મૂઢા ન ભેતવ્યમરાવપિ ॥ ૩૫॥

ઈશ્વરો નો હિ સર્વેષાં શઙ્કરો ભક્તવત્સલઃ ।
સર્વથા કુશલં શક્ર કરિષ્યતિ ન સંશયઃ ॥ ૩૬॥

બ્રહ્મોવાચ ।
એવં સંવદમાનં તં શક્રં વિકૃતમાનસમ્ ।
હરિણોક્તશ્ચ ગિરિશો લૌકિકીં ગતિમાશ્રિતઃ ॥ ૩૭॥

ઈશ્વર ઉવાચ ।
હે હરે હે સુરેશાન કિં બ્રૂથોઽદ્ય પરસ્પરમ્ ।
ઇત્યુક્ત્વા તૌ મહેશાનો મુને ત્વાં પ્રત્યુવાચ સઃ ॥ ૩૮॥

કિં નુ વક્તિ મહાશૈલો યથાર્થં વદ નારદ ।
વૃત્તાન્તં સકલં બ્રૂહિ ન ગોપ્યં કર્તુમર્હસિ ॥ ૩૯॥

દદાતિ વા નૈવ દદાતિ શૈલઃ
સુતાં સ્વકીયાં વદ તચ્ચ શીઘ્રમ્ ।
કિં તે દૃષ્ટં કિં કૃતન્તત્ર ગત્વા
પ્રીત્યા સર્વં તદ્વદાશ્વદ્ય તાત ॥ ૪૦॥

બ્રહ્મોવાચ ।
હત્યુક્તઃ શમ્ભુના તત્ર મુને ત્વં દેવદર્શનઃ ।
સર્વં રહસ્યવોચો વૈ યદ્ દૃષ્ટં તત્ર મણ્ડપે ॥ ૪૧॥

નારદ ઉવાચ ।
દેવદેવ મહાદેવ શ◌ૃણુ મદ્વચનં શુભમ્ ।
નાસ્તિ વિઘ્નભયં નાથ વિવાહે કિઞ્ચિદેવ હિ ॥ ૪૨॥

અવશ્યમેવ શૈલેશસ્તુભ્યં દાસ્યતિ કન્યકામ્ ।
ત્વામાનયિતુમાયાતા ઇમે શૈલા ન સંશયઃ ॥ ૪૩॥

કિન્તુ હ્યમરમોહાર્થં માયા વિરચિતાદ્ભુતા ।
કુતૂહલાર્થં સર્વજ્ઞ ન કશ્ચિદ્વિઘ્નસમ્ભવઃ ॥ ૪૪॥

વિચિત્રં મણ્ડપં ગેહેઽકાર્ષીત્તસ્ય તદાજ્ઞયા ।
વિશ્વકર્મા મહામાયી નાનાશ્ચર્યમયં વિભો ॥ ૪૫॥

સર્વદેવસમાજશ્ચ કૃતસ્તત્ર વિમોહનઃ ।
તં દૃષ્ટ્વા વિસ્મયં પ્રાપ્તોઽહં તન્માયાવિમોહિતઃ ॥ ૪૬॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા તદ્વચસ્તાત લોકાચારકરઃ પ્રભુઃ ।
હર્યાદીન્પ્રહસન્ શમ્ભુરુવાચ સકલાન્સુરાન્ ॥ ૪૭॥

ઈશ્વર ઉવાચ ।
કન્યાં દાસ્યતિ ચેન્મહ્યં પર્વતો હિ હિમાચલઃ ।
માયયા મમ કિં કાર્યં વદ વિષ્ણો યથાતથમ્ ॥ ૪૮॥

હે બ્રહ્મન્ શક્ર મુનયઃ સુરા બ્રૂત યથાર્થતઃ ।
માયયા મમ કિં કાર્યં કન્યાં દાસ્યતિ ચેદ્ગિરિઃ ॥ ૪૯॥

કેનાપ્યુપાયેન ફલં હિ સાધ્ય-
મિત્યુચ્યતે પણ્ડિતૈર્ન્યાયવિદ્ભિઃ ।
તસ્માત્સર્વૈર્ગમ્યતાં શીઘ્રમેવ
કાર્યાર્થિભિર્વિષ્ણુપુરોગમૈશ્ચ ॥ ૫૦॥

બ્રહ્મોવાચ ।
એવં સંવદમાનોઽસૌ દેવૈઃ શમ્ભુરભૂત્તદા ।
કૃતઃ સ્મરેણેવ વશી વશં વા પ્રાકૃતો નરઃ ॥ ૫૧॥

અથ શમ્ભ્વાજ્ઞયા સર્વે વિષ્ણ્વાદ્યા નિર્જરાસ્તદા ।
ઋષયશ્ચ મહાત્માનો યયુર્મોહભ્રમાવહમ્ ॥ ૫૨॥

પુરસ્કૃત્ય મુને ત્વાં ચ પર્વતાંસ્તાન્સવિસ્મયાઃ ।
હિમાદ્રેશ્ચ તદા જગ્મુર્મન્દિરં પરમાદ્ભુતમ્ ॥ ૫૩॥

અથ વિષ્ણ્વાદિસંયુક્તો મુદિતૈઃસ્વબલૈર્યુતઃ ।
આજગામોપહૈમાગપુરં પ્રમુદિતો હરઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે મણ્ડપરચનાવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । દેવગિરિમિલાપવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથાકર્ણ્ય ગિરીશશ્ચ નિજપુર્યુપકણ્ઠતઃ ।
પ્રાપ્તમીશં સર્વગં વૈ મુમુદેઽતિ હિમાલયઃ ॥ ૧॥

અથ સમ્ભૃતસમ્ભારઃ સમ્ભાષાં કર્તુમીશ્વરમ્ ।
શૈલાન્પ્રસ્થાપયામાસ બ્રાહ્મણાનપિ સર્વશઃ ॥ ૨॥

સ્વયં જગામ સદ્ભક્ત્યા પ્રાણેપ્સું દ્રષ્ટુમીશ્વરમ્ ।
ભક્ત્યુદ્રુતમનાઃ શૈલઃ પ્રશંસન્ સ્વવિધિં મુદા ॥ ૩॥

દેવસેનાં તદા દૃષ્ટ્વા હિમવાન્વિસ્મયં ગતઃ ।
જગામ સમ્મુખસ્તત્ર ધન્યોઽહમિતિ ચિન્તયન્ ॥ ૪॥

દેવા હિ તદ્બલં દૃષ્ટ્વા વિસ્મયં પરમં ગતાઃ ।
આનન્દં પરમં પ્રાપુર્દેવાશ્ચ ગિરયસ્તથા ॥ ૫॥

પર્વતાનાં મહાસેના દેવાનાં ચ તથા મુને ।
મિલિત્વા વિરરાજેવ પૂર્વપશ્ચિમસાગરૌ ॥ ૬॥

પરસ્પરં મિલિત્વા તે દેવાશ્ચ પર્વતાસ્તથા ।
કૃતકૃત્યં તથાત્માનં મેનિરે પરયા મુદા ॥ ૭॥

અથેશ્વરં પુરો દૃષ્ટ્વા પ્રણનામ હિમાલયઃ ।
સર્વે પ્રણેમુર્ગિરયો બ્રાહ્મણાશ્ચ સદાશિવમ્ ॥ ૮॥

વૃષભસ્થં પ્રસન્નાસ્યં નાનાભરણભૂષિતમ્ ।
દિવ્યાવયવલાવણ્યપ્રકાશિતદિગન્તરમ્ ॥ ૯॥

સુસૂક્ષ્માહતસત્પટ્ટવસ્ત્રશોભિતવિગ્રહમ્ ।
સદ્રત્નવિલસન્મૌલિં વિહસન્તં શુચિપ્રભમ્ ॥ ૧૦॥

ભૂષાભૂતાહિયુક્તાઙ્ગમદ્ભુતાવયવપ્રભમ્ ।
દિવ્યદ્યુતિં સુરેશૈશ્ચ સેવિતં કરચામરૈઃ ॥ ૧૧॥

વામસ્થિતાચ્યુતં દક્ષભાગસ્થિતવિધિં પ્રભુમ્ ।
પૃષ્ઠસ્થિતહરિં પૃષ્ઠપાર્શ્વસ્થિતસુરાદિકમ્ ॥ ૧૨॥

નાનાવિધસુરાદ્યૈશ્ચ સંસ્તુતં લોકશઙ્કરમ્ ।
સ્વહેત્વાત્તતનું બ્રહ્મ સર્વેશં વરદાયકમ્ ॥ ૧૩॥

સગુણં નિર્ગુણં ચાપિ ભક્તાધીનં કૃપાકરમ્ ।
પ્રકૃતેઃ પુરુષસ્યાપિ પરં સચ્ચિત્સુખાત્મકમ્ ॥ ૧૪॥

પ્રભોર્દક્ષિણભાગે તુ દદર્શ હરિમચ્યુતમ્ ।
વિનતાતનયારૂઢં નાનાભૂષણભૂષિતમ્ ॥ ૧૫॥

પ્રભોશ્ચ વામભાગે તુ મુને માં સન્દદર્શ હ ।
ચતુર્મુખં મહાશોભં સ્વપરીવારસંયુતમ્ ॥ ૧૬॥

એતૌ સુરેશ્વરૌ દૃષ્ટ્વા શિવસ્યાતિપ્રિયૌ સદા ।
પ્રણનામ ગિરીશશ્ચ સપરીવાર આદરાત્ ॥ ૧૭॥

તથા શિવસ્ય પૃષ્ઠે ચ પાર્શ્વયોઃ સુવિરાજિતાન્ ।
દેવાદીન્પ્રણનામાસૌ દૃષ્ટ્વા ગિરિવરેશ્વરઃ ॥ ૧૮॥

શિવાજ્ઞયા પુરો ભૂત્વા જગામ સ્વપુરં ગિરિઃ ।
શેષહર્યાત્મભૂઃ શીઘ્રં મુનિભિર્નિર્જરાદિભિઃ ॥ ૧૯॥

સર્વે મુનિસુરાદ્યાશ્ચ ગચ્છન્તઃ પ્રભુણા સહ ।
ગિરેઃ પુરં સમુદિતાઃ શશંસુર્બહુ નારદ ॥ ૨૦॥

રચિતે શિખરે રમ્યે સંસ્થાપ્ય દેવતાદિકમ્ ।
જગામ હિમવાઁસ્તત્ર યત્રાસ્તિ વિધિવેદિકા ॥ ૨૧॥

કારયિત્વા વિશેષેણ ચતુષ્કં તોરણૈર્યુતમ્ ।
સ્નાનદાનાદિકં કૃત્વા પરીક્ષામકરોત્તદા ॥ ૨૨॥

સ્વપુત્રાન્પ્રેષયામાસ શિવસ્ય નિકટે તથા ।
હિમો વિષ્ણ્વાદિસમ્પૂર્ણવર્ગયુક્તસ્ય શૈલરાટ્ ॥ ૨૩॥

કર્તુમૈચ્છદ્વરાચારં મહોત્સવપુરસ્સરમ્ ।
મહાહર્ષયુતઃ સર્વબન્ધુયુગ્ઘિમશૈલરાટ્ ॥ ૨૪॥

અથ તે ગિરિપુત્રાશ્ચ તત્ર ગત્વા પ્રણમ્ય તમ્ ।
સસ્વવર્ગં પ્રાર્થનાન્તામૂચુઃ શૈલેશ્વરસ્ય વૈ ॥ ૨૫॥

તતસ્તે સ્વાલયં જગ્મુઃ શૈલપુત્રાસ્તદાજ્ઞયા ।
શૈલરાજાય સઞ્ચખ્યુઃ તે ચાયાન્તીતિ હર્ષિતાઃ ॥ ૨૬॥

અથ દેવાઃ પ્રાર્થનાન્તાં ગિરેઃ શ્રુત્વાતિહર્ષિતાઃ ।

મુને વિષ્ણ્વાદયઃ સર્વે સેશ્વરા મુમુદુર્ભૃશમ્ ॥ ૨૭॥

કૃત્વા સુવેષં સર્વેઽપિ નિર્જરા મુનયો ગણાઃ ।
ગમનં ચક્રુરન્યેઽપિ પ્રભુણા ગિરિરાડ્ગૃહમ્ ॥ ૨૮॥

તસ્મિન્નવસરે મેના દ્રષ્ટુકામાભવચ્છિવમ્ ।
પ્રભોરાહ્વાયયામાસ મુને ત્વાં મુનિસત્તમમ્ ॥ ૨૯॥

અગમસ્ત્વં મુને તત્ર પ્રભુણા પ્રેરિતસ્તદા ।
મનસા શિવહૃદ્ધેતું પૂર્ણં કર્તું તમિચ્છતા ॥ ૩૦॥

ત્વાં પ્રણમ્ય મુને મેના પ્રાહ વિસ્મિતમાનસા ।
દ્રષ્ટુકામા પ્રભો રૂપં શઙ્કરસ્ય મદાપહમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે દેવગિરિમિલાપવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૩. ત્રિચત્વારિંશોઽધ્યાયઃ । મેનામોહનાય શિવકૃતાદ્ભુતલીલાવર્ણનમ્ ।

મેનોવાચ ।
નિરીક્ષિષ્યામિ પ્રથમં મુને તં ગિરિજાપતિમ્ ।
કીદૃશં શિવરૂપં હિ યદર્થે તપ ઉત્તમમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
ઇત્યજ્ઞાનપરા સા ચ દર્શનાર્થં શિવસ્ય ચ ।
ત્વયા મુને સમં સદ્યશ્ચન્દ્રશાલાં સમાગતા ॥ ૨॥

શિવોઽપિ ચ તદા તસ્યાં જ્ઞાત્વાહઙ્કારમાત્મનઃ ।
પ્રાહ વિષ્ણું ચ માં તાત લીલાં કૃત્વાદ્ભુતાં પ્રભુઃ ॥ ૩॥

શિવ ઉવાચ ।
મદાજ્ઞયા યુવાં તાતૌ સદેવૌ ચ પૃથક્પૃથક્ ।
ગચ્છતં હિ ગિરિદ્વારં વયં પશ્ચાદ્ વ્રજેમહિ ॥ ૪॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય હરિઃ સર્વાનાહૂયોવાચ તન્મયાઃ ।
સુરાઃ સર્વે તથૈવાશુ ગમનં ચક્રુરુત્સુકાઃ ॥ ૫॥

સ્થિતાં શિરોગૃહે મેનાં મુને વિશ્વેશ્વરસ્ત્વયા ।
તથૈવ દર્શયામાસ હૃદ્વિભ્રંશો યથા ભવેત્ ॥ ૬॥

એતસ્મિન્ સમયે મેના સેનાં ચ પરમાં શુભામ્ ।
નિરીક્ષન્તી મુને દૃષ્ટ્વા સામાન્યં હર્ષિતાભવત્ ॥ ૭॥

પ્રથમં ચૈવ ગન્ધર્વાઃ સુન્દરાઃ સુભગાસ્તદા ।
આયાતાઃ શુભવસ્ત્રાઢ્યા નાનાલઙ્કારભૂષિતાઃ ॥ ૮॥

નાનાવાહનસંયુક્તા નાનાવાદ્યપરાયણાઃ ।
પતાકાભિર્વિચિત્રાભિરપ્સરોગણસંયુતાઃ ॥ ૯॥

અથ દૃષ્ટ્વા વસું તત્ર તત્પતિં પરમપ્રભુમ્ ।
મેના પ્રહર્ષિતા હ્યાસીચ્છિવોઽયમિતિ ચાબ્રવીત્ ॥ ૧૦॥

શિવસ્ય ગણકા એતે ન શિવોઽયં શિવાપતિઃ ।
ઇત્યેવં ત્વં તતસ્તાં વૈ અવોચ ઋષિસત્તમ ॥ ૧૧॥

એવં શ્રુત્વા તદા મેના વિચારે તત્પરાભવત્ ।
ઇતશ્ચાભ્યધિકો યો વૈ સ ચ કીદૃગ્ભવિષ્યતિ ॥ ૧૨॥

એતસ્મિન્નન્તરે યક્ષા મણિગ્રીવાદયશ્ચ યે ।
તેષાં સેના તયા દૃષ્ટા શોભાદિ દ્વિગુણીકૃતા ॥ ૧૩॥

તત્પતિં ચ મણિગ્રીવં દૃષ્ટ્વા શોભાન્વિતં હિ સા ।
અયં રુદ્રઃ શિવાસ્વામી મેના પ્રાહેતિ હર્ષિતા ॥ ૧૪॥

નાયં રુદ્રઃ શિવાસ્વામી સેવકોઽયં શિવસ્ય વૈ ।
ઇત્યવોચોઽગપત્ન્યૈ ત્વં તાવદ્વહ્નિઃ સ આગતઃ ॥ ૧૫॥

તતોઽપિ દ્વિગુણાં શોભાં દૃષ્ટ્વા તસ્ય ચ સાબ્રવીત્ ।
રુદ્રોઽયં ગિરિજાસ્વામી તદા નેતિ ત્વમબ્રવીઃ ॥ ૧૬॥

તાવદ્યમઃ સમાયાતઃ તતોઽપિ દ્વિગુણપ્રભઃ ।
તં દૃષ્ટ્વા પ્રાહ સા મેના રુદ્રોઽયમિતિ હર્ષિતા ॥ ૧૭॥

નેતિ ત્વમબ્રવીસ્તાં વૈ તાવન્નિરૃતિરાગતઃ ।

બિભ્રાણો દ્વિગુણાં શોભાં શુભઃ પુણ્યજનપ્રભુઃ ॥ ૧૮॥

તં દૃષ્ટ્વા પ્રાહ સા મેના રુદ્રોઽયમિતિ હર્ષિતા ।
નેતિ ત્વમબ્રવીસ્તાં વૈ તાવદ્વરુણ આગતઃ ॥ ૧૯॥

તતોઽપિ દ્વિગુણાં શોભાં દૃષ્ટ્વા તસ્ય ચ સાબ્રવીત્ ।
રુદ્રોઽયં ગિરિજાસ્વામી તદા નેતિ ત્વમબ્રવીઃ ॥ ૨૦॥

તાવદ્વાયુઃ સમાયાતઃ તતોઽપિ દ્વિગુણપ્રભઃ ।
તં દૃષ્ટ્વા પ્રાહ સા મેના રુદ્રોઽયમિતિ હર્ષિતા ॥ ૨૧॥

નેતિ ત્વમબ્રવીસ્તાં વૈ તાવદ્ધનદ આગતઃ ।
તતોઽપિ દ્વિગુણાં શોભાં બિભ્રાણો ગુહ્યકાધિપઃ ॥ ૨૨॥

તં દૃષ્ટ્વા પ્રાહ સા મેના રુદ્રોઽયમિતિ હર્ષિતા ।
નેતિ ત્વમબ્રવીસ્તાં વૈ તાવદીશાન આગતઃ ॥ ૨૩॥

તતોઽપિ દ્વિગુણાં શોભાં દૃષ્ટ્વા તસ્ય ચ સાબ્રવીત્ ।
રુદ્રોઽયં ગિરિજાસ્વામી તદા નેતિ ત્વમબ્રવીઃ ॥ ૨૪॥

તાવદિન્દ્રઃ સમાયાતઃ તતોઽપિ દ્વિગુણપ્રભઃ ।
સર્વામરવરો નાનાદિવ્યભાસ્ત્રિદિવેશ્વરઃ ॥ ૨૫॥

તં દૃષ્ટ્વા શઙ્કરઃ સોઽયમિતિ સા પ્રાહ મેનકા ।
શક્રઃ સુરપતિશ્ચાયં સ નેતિ ત્વં તદાબ્રવીઃ ॥ ૨૬॥

તાવચ્ચન્દ્રઃ સમાયાતઃ શોભાં તદ્દ્વિગુણાં દધત્ ।
દૃષ્ટ્વા તં પ્રાહ રુદ્રોઽયં તાં તુ નેતિ ત્વમબ્રવીઃ ॥ ૨૭॥

તાવત્સૂર્યઃ સમાયાતઃ શોભાં તદ્દ્વિગુણાં દધત્ ।
દૃષ્ટ્વા તં પ્રાહ સા સોઽયં તાં તુ નેતિ ત્વમબ્રવીઃ ॥ ૨૮॥

તાવત્સમાગતાસ્તત્ર ભૃગ્વાદ્યાશ્ચ મુનીશ્વરાઃ ।
તેજસો રાશયઃ સર્વે સ્વશિષ્યગણસંયુતાઃ ॥ ૨૯॥

તન્મધ્યે ચૈવ વાગીશં દૃષ્ટ્વા સા પ્રાહ મેનકા ।
રુદ્રોઽયં ગિરિજાસ્વામી તદા નેતિ ત્વમબ્રવીઃ ॥ ૩૦॥

તાવદ્બ્રહ્મા સમાયાતઃ તેજસાં રાશિરુત્તમઃ ।
સર્ષિવર્યસુતઃ સાક્ષાદ્ધર્મપુઞ્જ ઇવ સ્તુતઃ ॥ ૩૧॥

દૃષ્ટ્વા માં તં તદા મેના મહાહર્ષવતી મુને ।
સોઽયં શિવાપતિઃ પ્રાહ તાં તુ નેતિ ત્વમબ્રવીઃ ॥ ૩૨॥

એતસ્મિન્નન્તરે તત્ર વિષ્ણુર્દેવઃ સમાગતઃ ।
સર્વશોભાન્વિતઃ શ્રીમાન્મેઘશ્યામશ્ચતુર્ભુજઃ ॥ ૩૩॥

કોટિકન્દર્પલાવણ્યઃ પીતામ્બરધરઃ સ્વરાટ્ ।
રાજીવલોચનઃ શાન્તઃ પક્ષીન્દ્રવરવાહનઃ ॥ ૩૪॥

શઙ્ખાદિલક્ષણૈર્યુક્તો મુકુટાદિવિભૂષિતઃ ।
શ્રીવત્સવક્ષા લક્ષ્મીશો હ્યપ્રમેયપ્રભાન્વિતઃ ॥ ૩૫॥

તં દૃષ્ટ્વા ચકિતાક્ષ્યાસીન્મહાહર્ષેણ સાબ્રવીત્ ।
સોઽયં શિવાપતિઃ સાક્ષાચ્છિવો વૈ નાત્ર સંશયઃ ॥ ૩૬॥

અથ ત્વં મેનકાવાક્યમાકર્ણ્યોવાચ ઊતિકૃત્ ।
નાયં શિવાપતિરયં કિન્ત્વયં કેશવો હરિઃ ॥ ૩૭॥

શઙ્કરાખિલકાર્યસ્ય હ્યધિકારી ચ તત્પ્રિયઃ ।
અતોઽધિકો વરો જ્ઞેયઃ સ શિવઃ પાર્વતીપતિઃ ॥ ૩૮॥

તચ્છોભાં વર્ણિતું મેને મયા નૈવ હિ શક્યતે ।
સ એવાખિલબ્રહ્માણ્ડપતિઃ સર્વેશ્વરઃ સ્વરાટ્ ॥ ૩૯॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય મેના મેને ચ તાં શુભામ્ ।
મહાધનાં ભાગ્યવતીં કુલત્રયસુખાવહામ્ ॥ ૪૦॥

ઉવાચ ચ પ્રસન્નાસ્યા પ્રીતિયુક્તેન ચેતસા ।
સ્વભાગ્યમધિકં ચાપિ વર્ણયન્તી મુહુર્મુહુઃ ॥ ૪૧॥

મેનોવાચ ।
ધન્યાહં સર્વથા જાતા પાર્વત્યા જન્મનાધુના ।
ધન્યો ગિરીશ્વરોઽપ્યદ્ય સર્વં ધન્યતમં મમ ॥ ૪૨॥

યે યે દૃષ્ટ્વા મયા દેવા નાયકાઃ સુપ્રભાન્વિતાઃ ।
એતેષાં યઃ પતિઃ સોઽત્ર પતિરસ્યા ભવિષ્યતિ ॥ ૪૩॥

અસ્યાઃ કિં વર્ણ્યતે ભાગ્યમપિ વર્ષશતૈરપિ ।
વર્ણિતું શક્યતે નૈવ તત્પ્રભુપ્રાપ્તિદર્શનાત્ ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇત્યવાદીચ્ચ સા મેના પ્રેમનિર્ભરમાનસા ।
તાવત્સમાગતો રુદ્રોઽદ્ભુતોતિકારકઃ પ્રભુઃ ॥ ૪૫॥

અદ્ભુતાત્માગણાસ્તાત મેનાગર્વાપહારકાઃ ।
આત્માનં દર્શયન્ માયાનિર્લિપ્તં નિર્વિકારકમ્ ॥ ૪૬॥

તમાગતમભિપ્રેત્ય નારદ ત્વં મુને તદા ।
મેનામવોચઃ સુપ્રીત્યા દર્શયંસ્તં શિવાપતિમ્ ॥ ૪૭॥

નારદ ઉવાચ ।
અયં સ શઙ્કરઃ સાક્ષાદ્ દૃશ્યતાં સુન્દરિ ત્વયા ।
યદર્થે શિવયા તપ્તં તપોઽતિ વિપિને મહત્ ॥ ૪૮॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા હર્ષિતા મેના તં દદર્શ મુદા પ્રભુમ્ ।
અદ્ભુતાકૃતિમીશાનમદ્ભુતાનુગમદ્ભુતમ્ ॥ ૪૯॥

તાવદેવં સમાયાતા રુદ્રસેના મહાદ્ભુતા ।
ભૂતપ્રેતાદિસંયુક્તા નાનાગણસમન્વિતા ॥ ૫૦॥

વાત્યારૂપધરાઃ કેચિત્પતાકામર્મરસ્વનાઃ ।
વક્રતુણ્ડાસ્તત્ર કેચિદ્વિરૂપાશ્ચાપરે તથા ॥ ૫૧॥

કરાલાઃ શ્મશ્રુલાઃ કેચિત્કેચિત્ખઞ્જા હ્યલોચનાઃ ।
દણ્ડપાશધરાઃ કેચિત્કેચિન્મુદ્ગરપાણયઃ ॥ ૫૨॥

વિરુદ્ધવાહનાઃ કેચિચ્છૃઙ્ગનાદનિનાદિનઃ ।
ડમરોર્વાદિનઃ કેચિત્કેચિદ્ગોમુખવાદિનઃ ॥ ૫૩॥

અમુખાઃ વિમુખાઃ કેચિત્કેચિદ્ બહુમુખા ગણાઃ ।
અકરા વિકરાઃ કેચિત્કેચિદ્ બહુકરા ગણાઃ ॥ ૫૪॥

અનેત્રા બહુનેત્રાશ્ચ વિશિરાઃ કુશિરાસ્તથા ।
અકર્ણા બહુકર્ણાશ્ચ નાનાવેષધરા ગણાઃ ॥ ૫૫॥

ઇત્યાદિવિકૃતાકારા અનેકે પ્રબલા ગણાઃ ।
અસઙ્ખ્યાતાસ્તથા તાત મહાવીરા ભયઙ્કરાઃ ॥ ૫૬॥

અઙ્ગુલ્યા દર્શયંસ્ત્વં તાં મુને રુદ્રગણાંસ્તતઃ ।

હરસ્ય સેવકાન્પશ્ય હરં ચાપિ વરાનને ॥ ૫૭॥

અસઙ્ખ્યાતાન્ ગણાન્ દૃષ્ટ્વા ભૂતપ્રેતાદિકાન્ મુને ।
તત્ક્ષણાદભવત્સા વૈ મેનકા ત્રાસસઙ્કુલા ॥ ૫૮॥

તન્મધ્યે શઙ્કરં ચૈવ નિર્ગુણં ગુણવત્તરમ્ ।
વૃષભસ્થં પઞ્ચવક્ત્રં ત્રિનેત્રં ભૂતિભૂષિતમ્ ॥ ૫૯॥

કપર્દિનં ચન્દ્રમૌલિં દશહસ્તં કપાલિનમ્ ।
વ્યાઘ્રચર્મોત્તરીયં ચ પિનાકવરપાણિનમ્ ॥ ૬૦॥

શૂલયુક્તં વિરૂપાક્ષં વિકૃતાકારમાકુલમ્ ।
ગજચર્મ વસાનં હિ વીક્ષ્ય ત્રેસે શિવાપ્રસૂઃ ॥ ૬૧॥

ચકિતાં કમ્પસંયુક્તાં વિહ્વલાં વિભ્રમદ્ધિયમ્ ।
શિવોઽયમિતિ ચાઙ્ગુલ્યા દર્શયંસ્તાં ત્વમબ્રવીઃ ॥ ૬૨॥

ત્વદીયં તદ્વચઃ શ્રુત્વા વાતાહતલતા ઇવ ।
સા પપાત દ્રુતં ભૂમૌ મેના દુઃખભરા સતી ॥ ૬૩॥

કિમિદં વિકૃતં દૃષ્ટ્વા વઞ્ચિતાહં દુરાગ્રહે ।
ઇત્યુક્ત્વા મૂર્ચ્છિતા તત્ર મેનકા સાભવત્ક્ષણાત્ ॥ ૬૪॥

અથ પ્રયત્નૈર્વિવિધૈઃ સખીભિરુપસેવિતા ।
લેભે સંજ્ઞાં શનૈર્મેના ગિરીશ્વરપ્રિયા તદા ॥ ૬૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવાદ્ભુતલીલાવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૪. ચતુશ્ચત્વારિંશોઽધ્યાયઃ । મેનાપ્રબોધવર્ણનમ્ ।

બ્રહ્મોવાચ ।
સંજ્ઞાં લબ્ધ્વા તતઃ સા ચ મેના શૈલપ્રિયા સતી ।
વિલલાપાતિસઙ્ક્ષુબ્ધા તિરસ્કારમથાકરોત્ ॥ ૧॥

તત્ર તાવત્સ્વપુત્રાંશ્ચ નિનિન્દ સ્ખલિતા મુહુઃ ।
પ્રથમં સા તતઃ પુત્રીં કથયામાસ દુર્વચઃ ॥ ૨॥

મેનોવાચ ।
મુને પુરા ત્વયા પ્રોક્તં વરિષ્યતિ શિવા શિવમ્ ।
પશ્ચાદ્ધિમવતઃ કૃત્યં પૂજાર્થં વિનિવેશિતમ્ ॥ ૩॥

તતો દૃષ્ટં ફલં સત્યં વિપરીતમનર્થકમ્ ।
મુનેઽધમાહં દુર્બુદ્ધે સર્વથા વઞ્ચિતા ત્વયા ॥ ૪॥

પુનસ્તયા તપસ્તપ્તં દુષ્કરં મુનિભિશ્ચ યત્ ।
તસ્ય લબ્ધં ફલં હ્યેતત્પશ્યતાં દુઃખદાયકમ્ ॥ ૫॥

કિં કરોમિ ક્વ ગચ્છામિ કો મે દુઃખં વ્યપોહતામ્ ।
કુલાદિકં વિનષ્ટં મે વિહિતં જીવિતં મમ ॥ ૬॥

ક્વ ગતા ઋષયો દિવ્યાઃ શ્મશ્રૂણિ ત્રોટયામ્યહમ્ ।
તપસ્વિની ચ યા પત્ની સા ધૂર્તા સ્વયમાગતા ॥ ૭॥

કેષાઞ્ચૈવાપરાધેન સર્વં નષ્ટં મમાધુના ।
ઇત્યુક્ત્વા વીક્ષ્ય ચ સુતામુવાચ વચનં કટુ ॥ ૮॥

કિં કૃતં તે સુતે દુષ્ટે કર્મ દુઃખકરં મમ ।
હેમ દત્ત્વા ત્વયાનીતઃ કાચો વૈ દુષ્ટયા સ્વયમ્ ॥ ૯॥

હિત્વા તુ ચન્દનં ભૂયો લેપિતઃ કર્દમસ્ત્વયા ।
હંસમુડ્ડીય કાકો વૈ ગૃહીતો હસ્તપઞ્જરે ॥ ૧૦॥

હિત્વા બ્રહ્મજલં દૂરે પીતં કૂપોદકં ત્વયા ।
સૂર્યં હિત્વા તુ ખદ્યોતો ગૃહીતો યત્નતસ્ત્વયા ॥ ૧૧॥

તણ્ડુલાંશ્ચ તથા હિત્વા કૃતં વૈ તુષભક્ષણમ્ ।
પ્રક્ષિપ્યાજ્યં તથા તૈલં કારણ્ડં ભુક્તમાદરાત્ ॥ ૧૨॥

સિંહસેવાં તથા મુક્ત્વા શ◌ૃગાલઃ સેવિતસ્ત્વયા ।
બ્રહ્મવિદ્યાં તથા મુક્ત્વા કુગાથા ચ શ્રુતા ત્વયા ॥ ૧૩॥

ગૃહે યજ્ઞવિભૂતિં હિ દૂરીકૃત્ય સુમઙ્ગલામ્ ।
ગૃહીતશ્ચ ચિતાભસ્મ ત્વયા પુત્રિ હ્યમઙ્ગલમ્ ॥ ૧૪॥

સર્વાન્ દેવવરાંસ્ત્યક્ત્વા વિષ્ણ્વાદીન્પરમેશ્વરાન્ ।

કૃતં ત્વયા કુબુદ્ધ્યા વૈ શિવાર્થં તપ ઈદૃશમ્ ॥ ૧૫॥

ધિક્ત્વાં ચ તવ બુદ્ધિં ચ ધિગ્રૂપં ચરિતં તવ ।
ધિક્ ચોપદેશકર્તારં ધિક્સખ્યાવપિ તે તથા ॥ ૧૬॥

આવાં ચ ધિક્તથા પુત્રિ યૌ તે જન્મપ્રવર્તકૌ ।
ધિક્તે નારદ બુદ્ધિઞ્ચ સપ્તર્ષીંશ્ચ કુબુદ્ધિદાન્ ॥ ૧૭॥

ધિક્કુલં ધિક્ ક્રિયાદાક્ષ્યં સર્વં ધિગ્યત્કૃતં ત્વયા ।
ગૃહં તુ ધુક્ષિતં ત્વેતન્મરણં તુ મમૈવ હિ ॥ ૧૮॥

પર્વતાનામયં રાજા નાયાતુ નિકટે મમ ।
સપ્તર્ષયઃ સ્વયં નૈવ દર્શયન્તુ મુખં મમ ॥ ૧૯॥

સાધિતં કિં ચ સર્વૈસ્તુ મિલિત્વા ઘાતિતં કુલમ્ ।
બન્ધ્યાહં ન કથં જાતા ગર્ભો ન ગલિતઃ કથમ્ ॥ ૨૦॥

અથો ન વા મૃતા ચાહં પુત્રિકા ન મૃતા કથમ્ ।
રાક્ષસાદ્યૈઃ કથં નો વા ભક્ષિતા ગગને પુનઃ ॥ ૨૧॥

છેદયામિ શિરસ્તેઽદ્ય કિં કરોમિ કલેવરૈઃ ।
ત્યક્ત્વા ત્વાં ચ કુતો યાયાં હાહા મે જીવિતં હતમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પતિતા સા ચ મેના ભૂમૌ વિમૂર્છિતા ।
વ્યાકુલા શોકરોષાદ્યૈર્ન ગતા ભર્તૃસન્નિધૌ ॥ ૨૩॥

હાહાકારો મહાનાસીત્તસ્મિન્કાલે મુનીશ્વર ।
સર્વે સમાગતાસ્તત્ર ક્રમાત્તત્સન્નિધૌ સુરાઃ ॥ ૨૪॥

પુરા દેવમુને ચાહમાગતસ્તુ સ્વયં તદા ।
માં દૃષ્ટ્વા ત્વં વચસ્તાં વૈ પ્રાવોચ ઋષિસત્તમ ॥ ૨૫॥

નારદ ઉવાચ ।
યથાર્થં સુન્દરં રૂપં ન જ્ઞાતં તે શિવસ્ય વૈ ।
લીલયેદં ધૃતં રૂપં ન યથાર્થં શિવેન ચ ॥ ૨૬॥

તસ્માત્ક્રોધં પરિત્યજ્ય સ્વસ્થા ભવ પતિવ્રતે ।
કાર્યં કુરુ હઠં ત્યક્ત્વા શિવાં દેહિ શિવાય ચ ॥ ૨૭॥

બ્રહ્મોવાચ ।

તદાકર્ણ્ય વચસ્તે સા મેના ત્વાં વાક્યમબ્રવીત્ ।
ઉત્તિષ્ઠેતો ગચ્છ દૂરં દુષ્ટાધમવરો ભવાન્ ॥ ૨૮॥

ઇત્યુક્તે તુ તયા દેવા ઇન્દ્રાદ્યાઃ સકલાઃ ક્રમાત્ ।
સમાગત્ય ચ દિક્પાલા વચનં ચેદમબ્રુવન્ ॥ ૨૯॥

દેવા ઊચુઃ ।
હે મેને પિતૃકન્યે હિ શૃણ્વસ્મદ્વચનં મુદા ।
અયં વૈ પરમઃ સાક્ષાચ્છિવઃ પરસુખાવહઃ ॥ ૩૦॥

કૃપયા ચ ભવત્પુત્ર્યાસ્તપો દૃષ્ટ્વાતિદુસ્સહમ્ ।
દર્શનં દત્તવાન્ શમ્ભુર્વરં સદ્ભક્તવત્સલઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।
અથોવાચ સુરાન્મેના વિલપ્યાતિ મુહુર્મુહુઃ ।
ન દેયા તુ મયા કન્યા ગિરિશાયોગ્રરૂપિણે ॥ ૩૨॥

કિમર્થં તુ ભવન્તશ્ચ સર્વે દેવાઃ પ્રવઞ્ચિતાઃ ।
રૂપમસ્યાઃ પરન્નામ વ્યર્થીકર્તું સમુદ્યતાઃ ॥ ૩૩॥

ઇત્યુક્તે ચ તયા તત્ર ઋષયઃસપ્ત એવ હિ ।
ઊચુસ્તે વચ આગત્ય વસિષ્ઠાદ્યા મુનીશ્વર ॥ ૩૪॥

સપ્તર્ષય ઊચુઃ ।
કાર્યં સાધયિતું પ્રાપ્તાઃ પિતૃકન્યે ગિરિપ્રિયે ।
વિરુદ્ધં ચાત્ર યુક્તાર્થે કથં મન્યામહે વયમ્ ॥ ૩૫॥

અયં વૈ પરમો લાભો દર્શનં શઙ્કરસ્ય યત્ ।
દાનપાત્રં સ તે ભૂત્વાગતસ્તવ ચ મન્દિરમ્ ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્તા તૈસ્તતો મેના મુનિવાક્યં મૃષાકરોત્ ।
પ્રત્યુવાચ ચ રુષ્ટા સા તાનૃષીન્ જ્ઞાનદુર્બલા ॥ ૩૭॥

મેનોવાચ ।
શસ્ત્રાદ્યૈર્ઘાતયિષ્યેઽહં ન દાસ્યે શઙ્કરાય તામ્ ।
દૂરં ગચ્છત સર્વે હિ નાગન્તવ્યં મદન્તિકે ॥ ૩૮॥

બ્રહ્મોવાચ ।

ઇત્યુક્ત્વા વિરરામાશુ સા વિલપ્યાતિવિહ્વલા ।
હાહાકારો મહાનાસીત્તત્ર તદ્વૃત્તતો મુને ॥ ૩૯॥

તતો હિમાલયસ્તત્રાજગામાતિસમાકુલઃ ।
તાઞ્ચ બોધયિતું પ્રીત્યા પ્રાહ તત્ત્વં ચ દર્શયન્ ॥ ૪૦॥

હિમાલય ઉવાચ ।
શ‍ૃણુ મેને વચો મેઽદ્ય વિકલાસિ કથં પ્રિયે ।
કે કે સમાગતા ગેહં કથં ચૈતાન્વિનિન્દસિ ॥ ૪૧॥

શઙ્કરં ત્વં ચ જાનાસિ રૂપં દૃષ્ટ્વાસિ વિહ્વલા ।
વિકટં તસ્ય શમ્ભોસ્તુ નાનારૂપાભિધસ્ય હિ ॥ ૪૨॥

સ શઙ્કરો મયા જ્ઞાતઃ સર્વેષાં પ્રતિપાલકઃ ।
પૂજ્યાનાં પૂજ્ય એવાસૌ કર્તાનુગ્રહનિગ્રહૌ ॥ ૪૩॥

હઠં ન કુરુ મુઞ્ચ ત્વં દુઃખં પ્રાણપ્રિયેઽનઘે ।
ઉત્તિષ્ઠારં તથા કાર્યં કર્તુમર્હસિ સુવ્રતે ॥ ૪૪॥

યદ્વૈ દ્વારગતઃ શમ્ભુઃ પુરા વિકટરૂપધૃક્ ।
નાનાલીલાં ચ કૃતવાન્ ચેતયામિ ચ તામિમામ્ ॥ ૪૫॥

તન્માહાત્મ્યં પરં દૃષ્ટ્વા કન્યાં દાતું ત્વયા મયા ।
અઙ્ગીકૃતં તદા દેવિ તત્પ્રમાણં કુરુ પ્રિયે ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સોઽદ્રિનાથો હિ વિરરામ તતો મુને ।
તદાકર્ણ્ય શિવામાતા મેનોવાચ હિમાલયમ્ ॥ ૪૭॥

મેનોવાચ ।
મદ્વચઃ શ્રૂયતાં નાથ તથા કર્તું ત્વમર્હસિ ।
ગૃહીત્વા તનુજાં ચૈનાં બદ્ધ્વા કણ્ઠે તુ પાર્વતીમ્ ॥ ૪૮॥

અધઃ પાતય નિઃશઙ્કં દાસ્યે તાં ન હરાય હિ ।
તથૈનામથવા નાથ ગત્વા વૈ સાગરે સુતામ્ ॥ ૪૯॥

નિમજ્જય દયાં ત્યક્ત્વા તતોઽદ્રીશ સુખી ભવ ।
યદિ દાસ્યસિ પુત્રીં ત્વં રુદ્રાય વિકટાત્મને ॥

તર્હિ ત્યક્ષ્યામ્યહં સ્વામિન્નિશ્ચયેન કલેવરમ્ । ૫૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્તે ચ તદા તત્ર વચને મેનયા હઠાત્ ।
ઉવાચ વચનં રમ્યં પાર્વતી સ્વયમાગતા ॥ ૫૧॥

પાર્વત્યુવાચ ।
માતસ્તે વિપરીતા હિ બુદ્ધિર્જાતાશુભાવહા ।
ધર્માવલમ્બનાત્ત્વં હિ કથં ધર્મં જહાસિ વૈ ॥ ૫૨॥

અયં રુદ્રોઽપરઃ સાક્ષાત્સર્વપ્રભવ ઈશ્વરઃ ।
શમ્ભુઃ સુરૂપઃ સુખદઃ સર્વશ્રુતિષુ વર્ણિતઃ । ૫૩॥

મહેશઃ શઙ્કરશ્ચાયં સર્વદેવપ્રભુઃ સ્વરાટ્ ।
નાનારૂપાભિધો માતર્હરિર્બ્રહ્માદિસેવિતઃ ॥ ૫૪॥

અધિષ્ઠાનં ચ સર્વેષાં કર્તા હર્તા ચ સ પ્રભુઃ ।
નિર્વિકારી ત્રિદેવેશો હ્યવિનાશી સનાતનઃ ॥ ૫૫॥

યદર્થે દેવતાઃ સર્વા આયાતા કિઙ્કરીકૃતાઃ ।
દ્વારિ તે સોત્સવાશ્ચાદ્ય કિમતોઽન્યત્પરં સુખમ્ ॥ ૫૬॥

ઉત્તિષ્ઠાતઃ પ્રયત્નેન જીવિતં સફલં કુરુ ।
દેહિ માં ત્વં શિવાયાસ્મૈ સ્વાશ્રમં કુરુ સાર્થકમ્ । ૫૭॥

દેહિ માં પરમેશાય શઙ્કરાય જનન્યહો ।
સ્વીકુરુ ત્વમિમં માતર્વિનયં મે બ્રવીમિ તે ॥ ૫૮॥

ચેન્ન દાસ્યસિ તસ્મૈ માં ન વૃણેઽન્યમહં વરમ્ ।
ભાગં લભેત્કથં સૈંહં શ◌ૃગાલઃ પરવઞ્ચકઃ ॥ ૫૯॥

મનસા વચસા માતઃ કર્મણા ચ હરઃ સ્વયમ્ ।
મયા વૃતો વૃતશ્ચૈવ યદિચ્છસિ તથા કુરુ ॥ ૬૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય શિવાવાક્યં મેના શૈલેશ્વરપ્રિયા ।
સુવિલપ્ય મહાક્રુદ્ધા ગૃહીત્વા તત્કલેવરમ્ ॥ ૬૧॥

મુષ્ટિભિઃ કૂર્પરૈશ્ચૈવ દન્તાન્ઘર્ષયતી ચ સા ।
તાડયામાસ તાં પુત્રીં વિહ્વલાતિરુષાન્વિતા ॥ ૬૨॥

યે તત્ર ઋષયસ્તાત ત્વદાદ્યાશ્ચાપરે મુને ।

તદ્ધસ્તાત્તાં પરિચ્છિદ્ય નિન્યુર્દૂરતરં તતઃ ॥ ૬૩॥

તાન્વૈ તથાવિધાન્દૃષ્ટ્વા ભર્ત્સયિત્વા પુનઃ પુનઃ ।
ઉવાચ શ્રાવયન્તી સા દુર્વચો નિખિલાન્પુનઃ ॥ ૬૪॥

મેનોવાચ ।
કિમેનાં હિ કરિષ્યેઽહં દુષ્ટાગ્રહવતીં શિવામ્ ।
દાસ્યામ્યસ્યૈ ગરં તીવ્રં કૂપે ક્ષેપ્સ્યામિ વા ધ્રુવમ્ ॥ ૬૫॥

છેત્સ્યામિ કાલીમથવા શસ્ત્રાસ્ત્રૈર્ભૂરિખણ્ડશઃ ।
નિમજ્જયિષ્યે વા સિન્ધૌ સ્વસુતાં પાર્વતીં ખલુ ॥ ૬૬॥

અથવા સ્વશરીરં હિ ત્યક્ષ્યામ્યાશ્વન્યથા ધ્રુવમ્ ।
ન દાસ્યે શમ્ભવે કન્યાં દુર્ગાં વિકટરૂપિણે ॥ ૬૭॥

વરોઽયં કીદૃશો ભીમોઽનયા લબ્ધશ્ચ દુષ્ટયા ।
કારિતશ્ચોપહાસો મે ગિરેશ્ચાપિ કુલસ્ય હિ ॥ ૬૮॥

ન માતા ન પિતા ભ્રાતા ન બન્ધુર્ગોત્રજોઽપિ હિ ।
નો સુરૂપં ન ચાતુર્યં ન ગૃહં વાસ્ય કિઞ્ચન ॥ ૬૯॥

ન વસ્ત્રં નાપ્યલઙ્કારાઃ સહાયાઃ કેઽપિ તસ્ય ન ।
વાહનં ન શુભં હ્યસ્ય ન વયો ન ધનં તથા ॥ ૭૦॥

ન પાવિત્ર્યં ન વિદ્યા ચ કીદૃશઃ કાય આર્તિદઃ ।
કિં વિલોક્ય મયા પુત્રી દેયાસ્મૈ સ્યાત્સુમઙ્ગલા ॥ ૭૧॥

બ્રહ્મોવાચ ।
ઇત્યાદિ સુવિલપ્યાથ બહુશો મેનકા તદા ।
રુરોદોચ્ચૈર્મુને સા હિ દુઃખશોકપરિપ્લુતા ॥ ૭૨॥

અથાહં દ્રુતમાગત્યાકથયં મેનકાં ચ તામ્ ।
શિવતત્ત્વં ચ પરમં કુજ્ઞાનહરમુત્તમમ્ ॥ ૭૩॥

બ્રહ્મોવાચ ।
શ્રોતવ્યં પ્રીતિતો મેને મદીયં વચનં શુભમ્ ।
યસ્ય શ્રવણતઃ પ્રીત્યા કુબુદ્ધિસ્તે વિનશ્યતિ ॥ ૭૪॥

શઙ્કરો જગતઃ કર્તા ભર્તા હર્તા તથૈવ ચ ।
ન ત્વં જાનાસિ તદ્રૂપં કથં દુઃખં સમીહસે ॥ ૭૫॥

અનેકરૂપનામા ચ નાનાલીલાકરઃ પ્રભુઃ ।
સર્વસ્વામી સ્વતન્ત્રશ્ચ માયાધીશોઽવિકલ્પકઃ ॥ ૭૬॥

ઇતિ વિજ્ઞાય મેને ત્વં શિવાં દેહિ શિવાય વૈ ।
કુહઠં ત્યજ કુજ્ઞાનં સર્વકાર્યવિનાશનમ્ ॥ ૭૭॥

બ્રહ્મોવાચ ।
ઇત્યુક્તા સા મયા મેના વિલપન્તી મુહુર્મુહુઃ ।
લજ્જાં કિઞ્ચિચ્છનૈસ્ત્યક્ત્વા મુને માં વાક્યમબ્રવીત્ ॥ ૭૮॥

મેનોવાચ ।
કિમર્થં તુ ભવાન્બ્રહ્મન્ રૂપમસ્યા મહાવરમ્ ।
વ્યર્થીકરોતિ કિમિયં હન્યતાં ન સ્વયં શિવા ॥ ૭૯॥

ન વક્તવ્યં ચ ભવતા શિવાય પ્રતિદીયતામ્ ।
ન દાસ્યેઽહં શિવાયૈનાં સ્વસુતાં પ્રાણવલ્લભામ્ ॥ ૮૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્તે તુ તદા સિદ્ધાઃ સનકાદ્યા મહામુને ।
સમાગત્ય મહાપ્રીત્યા વચનં હીદમબ્રુવન્ ॥ ૮૧॥

સિદ્ધા ઊચુઃ ।
અયં વૈ પરમઃ સાક્ષાચ્છિવઃ પરસુખાવહઃ ।
કૃપયા ચ ભવત્પુત્ર્યૈ દર્શનં દત્તવાન્પ્રભુઃ ॥ ૮૨॥

બ્રહ્મોવાચ ।
અથોવાચ તુ તાન્મેના વિલપ્ય ચ મુહુર્મુહુઃ ।
ન દેયા તુ મયા સમ્યગ્ગિરિશાયોગ્રરૂપિણે ॥ ૮૩॥

કિમર્થં તુ ભવન્તશ્ચ સર્વે સિદ્ધાઃ પ્રપઞ્ચિનઃ ।
રૂપમસ્યાઃ પરં નામ વ્યર્થીકર્તું સમુદ્યતાઃ ॥ ૮૪॥

ઇત્યુક્તે ચ તયા તત્ર મુનેઽહં ચકિતોઽભવમ્ ।
સર્વે વિસ્મયમાપન્ના દેવસિદ્ધર્ષિમાનવાઃ ॥ ૮૫॥

એતસ્મિન્સમયે તસ્યા હઠં શ્રુત્વા દૃઢં મહત્ ।
દ્રુતં શિવપ્રિયો વિષ્ણુઃ સમાગત્યાબ્રવીદિદમ્ ॥ ૮૬॥

વિષ્ણુરુવાચ ।

પિતૄણાં ચ પ્રિયા પુત્રી માનસી ગુણસંયુતા ।
પત્ની હિમવતઃ સાક્ષાદ્બ્રહ્મણઃ કુલમુત્તમમ્ ॥ ૮૭॥

સહાયાસ્તાદૃશા લોકે ધન્યા હ્યસિ વદામિ કિમ્ ।
ધર્મસ્યાધારભૂતાસિ કથં ધર્મં જહાસિ હિ ॥ ૮૮॥

દેવૈશ્ચ ઋષિભિશ્ચૈવ બ્રહ્મણા વા મયા તથા ।
વિરુદ્ધં કથ્યતે કિં નુ ત્વયૈવ સુવિચાર્યતામ્ ॥ ૮૯॥

શિવં ત્વં ન ચ જાનાસિ નિર્ગુણઃ સગુણઃ સ હિ ।
વિરૂપઃ સસુરૂપો હિ સર્વસેવ્યઃ સતાં ગતિઃ ॥ ૯૦॥

તેનૈવ નિર્મિતા દેવી મૂલપ્રકૃતિરીશ્વરી ।
તત્પાર્શ્વે ચ તદા તેન નિર્મિતઃ પુરુષોત્તમઃ ॥ ૯૧॥

તાભ્યાં ચાહં તથા બ્રહ્મા તતશ્ચ ગુણરૂપતઃ ।
અવતીર્ય સ્વયં રુદ્રો લોકાનાં હિતકારકઃ ॥ ૯૨॥

તતો વેદાસ્તથા દેવા યત્કિઞ્ચિદ્દૃશ્યતે જગત્ ।
સ્થાવરં જઙ્ગમં ચૈવ તત્સર્વં શકરાદભૂત્ ॥ ૯૩॥

તદ્રૂપં વર્ણિતં કેન જ્ઞાયતે કેન વા પુનઃ ।
મયા ચ બ્રહ્મણા યસ્ય હ્યન્તો લબ્ધશ્ચ નૈવ હિ ॥ ૯૪॥

આબ્રહ્મસ્તમ્બપર્યન્તં યત્કિઞ્ચિદ્ દૃશ્યતે જગત્ ।
તત્સર્વં ચ શિવં વિદ્ધિ નાત્ર કાર્યા વિચારણા ॥ ૯૫॥

સ એવેદૃક્સુરૂપેણાવતીર્ણો નિજલીલયા ।
શિવાતપઃપ્રભાવાદ્ધિ તવ દ્વારિ સમાગતઃ ॥ ૯૬॥

તસ્માત્ત્વં હિમવત્પત્નિ દુઃખં મુઞ્ચ શિવં ભજ ।
ભવિષ્યતિ મહાનન્દઃ ક્લેશો યાસ્યતિ સઙ્ક્ષયમ્ ॥ ૯૭॥

બ્રહ્મોવાચ ।
એવં પ્રબોધિતાયાસ્તુ મેનકાયા અભૂન્મુને ।
તસ્યાસ્તુ કોમલં કિઞ્ચિન્મનો વિષ્ણુપ્રબોધિતમ્ ॥ ૯૮॥

પરં હઠં ન તત્યાજ કન્યાં દાતું હરાય ન ।
સ્વીચકાર તદા મેના શિવમાયાવિમોહિતા ॥ ૯૯॥

ઉવાચ ચ હરિં મેના કિઞ્ચિદ્બુદ્ધા ગિરિપ્રિયા ।

શ્રુત્વા વિષ્ણુવચો રમ્યં ગિરિજાજનની હિ સા ॥ ૧૦૦॥

યદિ રમ્યતનુઃ સઃ સ્યાત્તદા દેયા મયા સુતા ।
નાન્યથા કોટિશો યત્નૈર્વચ્મિ સત્યં દૃઢં વચઃ ॥ ૧૦૧॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વચનં મેના તૂષ્ણીમાસ દૃઢવ્રતા ।
શિવેચ્છાપ્રેરિતા ધન્યા તથા યાખિલમોહિની ॥ ૧૦૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે મેનાપ્રબોધવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૫. પઞ્ચચત્વારિંશોઽધ્યાયઃ । દિવ્યસ્વરૂપેણ શિવાવિર્ભાવસ્થિતિવર્ણનમ્ ।

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે ત્વં હિ વિષ્ણુના પ્રેરિતો દ્રુતમ્ ।
અનુકૂલયિતું શમ્ભુમયાસ્તન્નિકટે મુને ॥ ૧॥

તત્ર ગત્વા સ વૈ રુદ્રો ભવતા સુપ્રબોધિતઃ ।
સ્તોત્રૈર્નાનાવિધૈઃ સ્તુત્વા દેવકાર્યચિકીર્ષયા ॥ ૨॥

શ્રુત્વા ત્વદ્વચનં પ્રીત્યા શમ્ભુના ધૃતમદ્ભુતમ્ ।
સ્વરૂપમુત્તમં દિવ્યં કૃપાલુત્વં ચ દર્શિતમ્ ॥ ૩॥

તદ્ દૃષ્ટ્વા સુન્દરં શમ્ભું સ્વરૂપં મન્મથાધિકમ્ ।
અત્યહૃષ્યો મુને ત્વં હિ લાવણ્યપરમાયનમ્ ॥ ૪॥

સ્તોત્રૈર્નાનાવિધૈઃ સ્તુત્વા પરમાનન્દસંયુતઃ ।
આગચ્છસ્ત્વં મુને તત્ર યત્ર મેના સ્થિતાખિલૈઃ ॥ ૫॥

તત્રાગત્ય સુપ્રસન્નો મુનેઽતિપ્રેમસઙ્કુલઃ ।
હર્ષયંસ્તાં શૈલપત્નીં મેનાં ત્વં વાક્યમબ્રવીઃ ॥ ૬॥

નારદ ઉવાચ ।

મેને પશ્ય વિશાલાક્ષિ શિવરૂપમનુત્તમમ્ ।
કૃતા શિવેન તેનૈવ સુકૃપા કરુણાત્મના ॥ ૭॥

બ્રહ્મોવાચ ।
શ્રુત્વા સા તદ્વચો મેના વિસ્મિતા શૈલકામિની ।
દદર્શ શિવરૂપં તત્પરમાનન્દદાયકમ્ ॥ ૮॥

કોટિસૂર્યપ્રતીકાશં સર્વાવયવસુન્દરમ્ ।
વિચિત્રવસનં ચાત્ર નાનાભૂષણભૂષિતમ્ ॥ ૯॥

સુપ્રસન્નં સુહાસં ચ સુલાવણ્યં મનોહરમ્ ।
ગૌરાભં દ્યુતિસંયુક્તં ચન્દ્રરેખાવિભૂષિતમ્ ॥ ૧૦॥

સર્વૈર્દેવગણૈઃ પ્રીત્યા વિષ્ણ્વાદ્યૈઃ સેવિતં તથા ।
સૂર્યેણ ચ્છત્રિતં મૂર્ધ્નિ ચન્દ્રેણ ચ વિશોભિતમ્ ॥ ૧૧॥

સર્વથા રમણીયં ચ ભૂષિતસ્ય વિભૂષણૈઃ ।
વાહનસ્ય મહાશોભા વર્ણિતું નૈવ શક્યતે ॥ ૧૨॥

ગઙ્ગા ચ યમુના ચૈવ વિધત્તઃ સ્મ સુચામરે ।
સિદ્ધયોઽષ્ટૌ પુરસ્તસ્ય કુર્વન્તિ સ્મ સુનર્તનમ્ ॥ ૧૩॥

મયા ચૈવ તદા વિષ્ણુરિન્દ્રાદ્યા હ્યમરાસ્તથા ।
સ્વં સ્વં વેષં સુસમ્ભૂષ્ય ગિરિશેનાચરન્ચ્યુતાઃ ॥ ૧૪॥

તથા જયેતિ ભાષન્તો નાનારૂપા ગણાસ્તદા ।
સ્વલઙ્કૃતમહામોદા ગિરીશપુરતોઽચરન્ ॥ ૧૫॥

સિદ્ધાશ્ચોપસુરાઃ સર્વે મુનયશ્ચ મહાસુખાઃ ।
યયુઃ શિવેન સુપ્રીતાઃ સકલાશ્ચાપરે તથા ॥ ૧૬॥

એવં દેવાદયઃ સર્વે કુતૂહલસમન્વિતાઃ ।
પરં બ્રહ્મ ગૃણન્તસ્તે સ્વપત્નીભિરલઙ્કૃતાઃ ॥ ૧૭॥

વિશ્વાવસુમુખાસ્તત્ર હ્યપ્સરોગણસંયુતાઃ ।
ગાયન્તોઽપ્યગ્રતસ્તસ્ય પરમં શાઙ્કરં યશઃ ॥ ૧૮॥

ઇત્થં મહોત્સવસ્તત્ર બભૂવ મુનિસત્તમ ।
નાનાવિધો મહેશે હિ શૈલદ્વારિ ચ ગચ્છતિ ॥ ૧૯॥

તસ્મિંશ્ચ સમયે તત્ર સુષમા યા પરાત્મનઃ ।

વર્ણિતું તાં વિશેષેણ કઃ શક્નોતિ મુનીશ્વર ॥ ૨૦॥

તથાવિધં ચ તં દૃષ્ટ્વા મેના ચિત્રગતા ઇવ ।
ક્ષણમાસીત્તતઃ પ્રીત્યા પ્રોવાચ વચનં મુને ॥ ૨૧॥

મેનોવાચ ।
ધન્યા પુત્રી મદીયા ચ યયા તપ્તં મહત્તપઃ ।
યત્પ્રભાવાન્મહેશાન ત્વં પ્રાપ્ત ઇહ મદ્ગૃહે ॥ ૨૨॥

મયા કૃતા પુરા યા વૈ શિવનિન્દા દુરત્યયા ।
તાં ક્ષમસ્વ શિવાસ્વામિન્સુપ્રસન્નો ભવાધુના ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇત્થં સમ્ભાષ્ય સા મેના સંસ્તૂયેન્દુલલાટકમ્ ।
સાઞ્જલિઃ પ્રણતા શૈલપ્રિયા લજ્જાપરાભવત્ ॥ ૨૪॥

તાવત્સ્ત્રિયઃ સમાજગ્મુર્હિત્વા કામાનનેકશઃ ।
વહ્વ્યસ્તાઃ પુરવાસિન્યઃ શિવદર્શનલાલસાઃ ॥ ૨૫॥

મજ્જનં કુર્વતી કાચિત્તચ્ચૂર્ણસહિતા યયૌ ।
દ્રષ્ટું કુતૂહલાઢ્યા ચ શઙ્કરં ગિરિજાવરમ્ ॥ ૨૬॥

કાચિત્તુ સ્વામિનઃસેવાં સખીયુક્તા વિહાય ચ ।
સુચામરકરા પ્રીત્યાગાચ્છમ્ભોર્દર્શનાય વૈ ॥ ૨૭॥

કાચિત્તુ બાલકં હિત્વા પિબન્તં સ્તન્યમાદરાત્ ।
અતૃપ્તં શઙ્કરં દ્રષ્ટું યયૌ દર્શનલાલસા ॥ ૨૮॥

રશનાં બધ્નતી કાચિત્તયૈવ સહિતા યયૌ ।
વસનં વિપરીતં વૈ ધૃત્વા કાચિદ્યયૌ તતઃ ॥ ૨૯॥

ભોજનાર્થં સ્થિતં કાન્તં હિત્વા કાચિદ્યયૌ પ્રિયા ।
દ્રષ્ટું શિવાવરં પ્રીત્યા સતૃષ્ણા સકુતૂહલા ॥ ૩૦॥

કાચિદ્ધસ્તે શલાકાં ચ ધૃત્વાઞ્જનકરા પ્રિયા ।
અઞ્જિત્વૈકાક્ષિ સન્દ્રષ્ટું યયૌ શૈલસુતાવરમ્ ॥ ૩૧॥

કાચિત્તુ કામિની પાદૌ રઞ્જયન્તી હ્યલક્તકૈઃ ।
શ્રુત્વા ઘોષં ચ તદ્ધિત્વા દર્શનાર્થમુપાગતા ॥ ૩૨॥

ઇત્યાદિ વિવિધં કાર્યં હિત્વા વાસં સ્ત્રિયો યયુઃ ।

દૃષ્ટ્વા તુ શાઙ્કરં રૂપં મોહં પ્રાપ્તાસ્તદાભવન્ ॥ ૩૩॥

તતસ્તાઃ પ્રેમસંવિગ્નાઃ શિવદર્શનહર્ષિતાઃ ।
નિધાય હૃદિ તન્મૂર્તિં વચનં ચેદમબ્રુવન્ ॥ ૩૪॥

પુરવાસિન્ય ઊચુઃ ।
નેત્રાણિ સફલાન્યાસન્ હિમવત્પુરવાસિનામ્ ।
યો યોઽપશ્યદદો રૂપં તસ્ય વૈ સાર્થકં જનુઃ ॥ ૩૫॥

તસ્યૈવ સફલં જન્મ તસ્યૈવ સફલાઃ ક્રિયાઃ ।
યેન દૃષ્ટઃ શિવઃ સાક્ષાત્સર્વપાપપ્રણાશકઃ ॥ ૩૬॥

પાર્વત્યા સાધિતં સર્વં શિવાર્થે યત્તપઃ કૃતમ્ ।
ધન્યેયં કૃતકૃત્યેયં શિવા પ્રાપ્ય શિવં પતિમ્ ॥ ૩૭॥

યદીદં યુગલં બ્રહ્મા ન યુઞ્જ્યાચ્છિવયોર્મુદા ।
તદા ચ સકલોઽપ્યસ્ય શ્રમો નિષ્ફલતામિયાત્ ॥ ૩૮॥

સમ્યક્ કૃતં તથા ચાત્ર યોજિતં યુગ્મમુત્તમમ્ ।
સર્વેષાં સાર્થતા જાતા સર્વકાર્યસમુદ્ભવા ॥ ૩૯॥

વિના તુ તપસા શમ્ભોર્દર્શનં દુર્લભં નૃણામ્ ।
દર્શનાચ્છઙ્કરસ્યૈવ સર્વે યાતાઃ કૃતાર્થતામ્ ॥ ૪૦॥

લક્ષ્મીર્નારાયણં લેભે યથા વૈ સ્વામિનં પુરા ।
તથાસૌ પાર્વતી દેવી હરં પ્રાપ્ય સુભૂષિતા ॥ ૪૧॥

બ્રહ્માણં ચ યથા લેભે સ્વામિનં વૈ સરસ્વતી ।
તથાસૌ પાર્વતી દેવી હરં પ્રાપ્ય સુભૂષિતા ॥ ૪૨॥

વયં ધન્યાઃ સ્ત્રિયઃ સર્વાઃ પુરુષાઃ સકલા વરાઃ ।
યે યે પશ્યન્તિ સર્વેશં શઙ્કરં ગિરિજાપતિમ્ ॥ ૪૩॥

બ્રહ્મોવાચ ।
ઇત્થમુક્ત્વા તુ વચનં ચન્દનૈશ્ચાક્ષતૈરપિ ।
શિવં સમર્ચયામાસુર્લાજાન્વવૃષુરાદરાત્ ॥ ૪૪॥

તસ્થુસ્તત્ર સ્ત્રિયઃ સર્વા મેનયા સહ સોત્સુકાઃ ।
વર્ણયન્ત્યોઽધિકં ભાગ્યં મેનાયાશ્ચ ગિરેરપિ ॥ ૪૫॥

કથાસ્તથાવિધાઃ શ઼ૃણ્વંસ્તદ્ધામાવર્ણિતાઃ શુભાઃ ।

પ્રહૃષ્ટોઽભૂત્પ્રભુઃ સર્વૈર્મુને વિષ્ણ્વાદિભિસ્તદા ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવસુન્દરસ્વરૂપ-પુરવાસ્યુત્સવવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૬. ષટ્ચત્શરિંશોઽધ્યાયઃ । મણ્ડપદ્વારે વરાગમનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ શમ્ભુઃ પ્રસન્નાત્મા સદૂતં સ્વગણૈઃસુરૈઃ ।
સર્વૈરન્યૈર્ગિરેર્ધામ જગામ સકુતૂહલમ્ ॥ ૧॥

મેનાપિ સ્ત્રીગણૈસ્તૈશ્ચ હિમાચલવરપ્રિયા ।
તત ઉત્થાય સ્વગૃહાભ્યન્તરં સા જગામ હ ॥ ૨॥

નીરાજનાર્થં શમ્ભોશ્ચ દીપપાત્રકરા સતી ।
સર્વર્ષિસ્ત્રીગણૈસ્સાકમગચ્છદ્ દ્વારમાદરાત્ ॥ ૩॥

તત્રાગતં મહેશાનં શઙ્કરં ગિરિજાવરમ્ ।
દદર્શ પ્રીતિતો મેના સેવિતં સકલૈઃ સુરૈઃ ॥ ૪॥

ચારુચમ્પકવર્ણાભં પઞ્ચવક્ત્રં ત્રિલોચનમ્ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યં રત્નસ્વર્ણાદિભૂષિતમ્ ॥ ૫॥

માલતીમાલયા યુક્તં સદ્રત્નમુકુટોજ્જ્વલમ્ ।
સત્કણ્ઠાભરણં ચારુવલયાઙ્ગદભૂષિતમ્ ॥ ૬॥

વહ્નિશૌચેનાતુલેન ત્વતિસૂક્ષ્મેણ ચારુણા ।
અમૂલ્યવસ્ત્રયુગ્મેન વિચિત્રેણાતિરાજિતમ્ ॥ ૭॥

ચન્દનાગરુકસ્તૂરીચારુકુઙ્કુમભૂષિતમ્ ।
રત્નદર્પણહસ્તં ચ કજ્જલોજ્જ્વલલોચનમ્ ॥ ૮॥

સર્વસ્વપ્રભયાચ્છન્નમતીવ સુમનોહરમ્ ।
અતીવ તરુણં રમ્યં ભૂષિતાઙ્ગૈશ્ચ ભૂષિતમ્ ॥ ૯॥

કામિનીકાન્તમવ્યગ્રં કોટિચન્દ્રાનનામ્બુજમ્ ।
કોટિસ્મરાધિકતનુચ્છવિં સર્વાઙ્ગસુન્દરમ્ ॥ ૧૦॥

ઈદૃગ્વિધં સુદેવં તં સ્થિતં સ્વપુરતઃ પ્રભુમ્ ।
દૃષ્ટ્વા જામાતરં મેના જહૌ શોકં મુદાન્વિતા ॥ ૧૧॥

પ્રશશંસ સ્વભાગ્યં સા ગિરિજાં ભૂધરં કુલમ્ ।
મેને કૃતાર્થમાત્માનં જહર્ષ ચ પુનઃ પુનઃ ॥ ૧૨॥

નીરાજનં ચકારાસૌ પ્રફુલ્લવદના સતી ।
અવલોકપરા તત્ર મેના જામાતરં મુદા ॥ ૧૩॥

ગિરિજોક્તમનુસ્મૃત્ય મેના વિસ્મયમાગતા ।
મનસૈવ હ્યુવાચેદં હર્ષફુલ્લાનનામ્બુજા ॥ ૧૪॥

યદ્વૈ પુરોક્તં ચ તયા પાર્વત્યા મમ તત્ર ચ ।
તતોઽધિકં પ્રપશ્યામિ સૌન્દર્યં પરમેશિતુઃ ॥ ૧૫॥

મહેશસ્ય સુલાવણ્યમનિર્વાચ્યં ચ સમ્પ્રતિ ।
એવં વિસ્મયમાપન્ના મેના સ્વગૃહમાયયૌ ॥ ૧૬॥

પ્રશશંસુર્યુવતયો ધન્યા ધન્યા ગિરેઃ સુતા ।
દુર્ગા ભગવતીત્યેવમૂચુઃ કાશ્ચન કન્યકાઃ ॥ ૧૭॥

ન દૃષ્ટો વર ઇત્યેવમસ્માભિર્દાનગોચરઃ ।
ધન્યા હિ ગિરિજાદેવીમૂચુઃ કાશ્ચન કન્યકાઃ ॥ ૧૮॥

જગુર્ગન્ધર્વપ્રવરા નનૃતુશ્ચાપ્સરોગણાઃ ।
દૃષ્ટ્વા શઙ્કરરૂપં ચ પ્રહૃષ્ટાઃ સર્વદેવતાઃ ॥ ૧૯॥

નાનાપ્રકારવાદ્યાનિ વાદકા મધુરાક્ષરમ્ ।
નાનાપ્રકારશિલ્પેન વાદયામાસુરાદરાત્ ॥ ૨૦॥

હિમાચલોઽપિ મુદિતો દ્વારાચારમથાકરોત્ ।
મેનાપિ સર્વનારીભિર્મહોત્સવપુરસ્સરમ્ ॥ ૨૧॥

પરપૃચ્છાં ચકારાસૌ મુદિતા સ્વગૃહં યયૌ ।
શિવો નિવેદિતં સ્થાનં જગામ ગણનિર્જરૈઃ ॥ ૨૨॥

એતસ્મિન્નન્તરે દુર્ગાં શૈલાન્તઃ પુરચારિકાઃ ।
બહિર્જગ્મુઃ સમાદાય પૂજિતું કુલદેવતામ્ ॥ ૨૩॥

તત્ર તાં દદૃશુર્દેવા નિમેષરહિતા મુદા ।
સુનીલાઞ્જનવર્ણાભાં સ્વાઙ્ગૈશ્ચ પ્રતિભૂષિતામ્ ॥ ૨૪॥

ત્રિનેત્રાદૃતનેત્રાં તામન્યવારિતલોચનામ્ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યાં સકટાક્ષાં મનોહરામ્ ॥ ૨૫॥

સુચારુકબરીભારાં ચારુપત્રકશોભિતામ્ ।
કસ્તૂરીબિન્દુભિસ્સાર્ધં સિન્દૂરબિન્દુશોભિતામ્ ॥ ૨૬॥

રત્નેન્દ્રસારહારેણ વક્ષસા સુવિરાજિતામ્ ।
રત્નકેયૂરવલયાં રત્નકઙ્કણમણ્ડિતામ્ ॥ ૨૭॥

સદ્રત્નકુણ્ડલાભ્યાં ચ ચારુગણ્ડસ્થલોજ્જ્વલામ્ ।
મણિરત્નપ્રભામુષ્ટિદન્તરાજિવિરાજિતામ્ ॥ ૨૮॥

મધુબિમ્બાધરોષ્ઠાં ચ રત્નયાવકસંયુતામ્ ।
રત્નદર્પણહસ્તાં ચ ક્રીડાપદ્મવિભૂષિતામ્ ॥ ૨૯॥

ચન્દનાગુરુકસ્તૂરીકુઙ્કુમેનાતિચર્ચિતામ્ ।
ક્વણન્મઞ્જીરપાદાં ચ રક્તાઙ્ઘ્રિતલરાજિતામ્ ॥ ૩૦॥

પ્રણેમુઃ શિરસા દેવીં ભક્તિયુક્તાઃ સમેનકામ્ ।
સર્વે સુરાદયો દૃષ્ટ્વા જગદાદ્યાં જગત્પ્રસૂમ્ ॥ ૩૧॥

ત્રિનેત્રો નેત્રકોણેન તાં દદર્શ મુદાન્વિતઃ ।
શિવઃ સત્યાકૃતિં દૃષ્ટ્વા વિજહૌ વિરહજ્વરમ્ ॥ ૩૨॥

શિવઃ સર્વં વિસસ્માર શિવાસંન્યસ્તલોચનઃ ।
પુલકાઞ્ચિતસર્વાઙ્ગો હર્ષાદ્ગૌરીવિલોચનઃ ॥ ૩૩॥

અથ કાલી બહિઃ પુર્યાં ગત્વા પૂજ્ય કુલામ્બિકામ્ ।
વિવેશ ભવનં રમ્યં સ્વપિતુસ્સદ્વિજાઙ્ગના ॥ ૩૪॥

શઙ્કરોઽપિ સુરૈઃ સાર્ધં હરિણા બ્રહ્મણા તથા ।
હિમાચલસમુદ્દિષ્ટં સ્વસ્થાનમગમન્મુદા ॥ ૩૫॥

તત્ર સર્વે સુખં તસ્થુઃ સેવન્તઃ શઙ્કરં યથા ।
સમ્માનિતા ગિરીશેન નાનાવિધસુસમ્પદા ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે વરાગમાદિવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૭. સપ્તચત્વારિંશોઽધ્યાયઃ । શિવસ્યહિમગિરિગૃહાભ્યન્તરગમનોત્સવવર્ણનમ્ ।

બ્રહ્મોવાચ ।
તતઃ શૈલવરઃ સોઽપિ પ્રીત્યા દુર્ગોપવીતકમ્ ।
કારયામાસ સોત્સાહં વેદમન્ત્રૈશ્શિવસ્ય ચ ॥ ૧॥

અથ વિષ્ણ્વાદયો દેવા મુનયઃ સકુતૂહલમ્ ।
હિમાચલપ્રાર્થનયા વિવેશાન્તર્ગૃહં ગિરેઃ ॥ ૨॥

શ્રુત્યાચારં ભવાચારં વિધાય ચ યથાર્થતઃ ।
શિવામલઙ્કૃતાં ચક્રુઃ શિવદત્તવિભૂષણૈઃ ॥ ૩॥

પ્રથમં સ્નાપયિત્વા તાં ભૂષયિત્વાથ સર્વશઃ ।
નીરાજિતા સખીભિશ્ચ વિપ્રપત્નીભિરેવ ચ ॥ ૪॥

અહતામ્બરયુગ્મેન શોભિતા વરવર્ણિની ।
વિરરાજ મહાશૈલદુહિતા શઙ્કરપ્રિયા ॥ ૫॥

કઞ્ચુકી પરમા દિવ્યા નાનારત્નાન્વિતાદ્ભુતા ।
વિધૃતા ચ તયા દેવ્યા વિલસન્ત્યધિકં મુને ॥ ૬॥

સા બભાર તથા હારં દિવ્યરત્નસમન્વિતમ્ ।
વલયાનિ મહાર્હાણિ શુદ્ધચામીકરાણિ ચ ॥ ૭॥

સ્થિતા તત્રૈવ સુભગા ધ્યાયન્તી મનસા શિવમ્ ।
શુશુભેઽતિ મહાશૈલકન્યકા ત્રિજગત્પ્રસૂઃ ॥ ૮॥

તદોત્સવો મહાનાસીદુભયત્ર મુદાવહઃ ।
દાનં બભૂવ વિવિધં બ્રાહ્મણેભ્યો વિવર્ણિતમ્ ॥ ૯॥

અન્યેષાં દ્રવ્યદાનં ચ બભૂવ વિવિધં મહત્ ।
ગીતવાદ્યવિનોદશ્ચ તત્રોત્સવપુરસ્સરમ્ ॥ ૧૦॥

અથ વિષ્ણુરહં ધાતા શક્રાદ્યા અમરાસ્તથા ।
મુનયશ્ચ મહાપ્રીત્યા નિખિલાઃ સોત્સવા મુદા ॥ ૧૧॥

સુપ્રણમ્ય શિવાં ભક્ત્યા સ્મૃત્વા શિવપદામ્બુજમ્ ।
સમ્પ્રાપ્ય હિમગિર્યાજ્ઞાં સ્વં સ્વં સ્થાનં સમાશ્રિતાઃ ॥ ૧૨॥

એતસ્મિન્નન્તરે તત્ર જ્યોતિઃ શાસ્ત્રવિશારદઃ ।
હિમવન્તં ગિરીન્દ્રં તં ગર્ગો વાક્યમભાષત ॥ ૧૩॥

ગર્ગ ઉવાચ ।
હિમાચલ ધરાધીશ સ્વામિન્ કાલીપતિઃ પ્રભો ।
પાણિગ્રહાર્થં શમ્ભું ચાનય ત્વં નિજમન્દિરમ્ ॥ ૧૪॥

બ્રહ્મોવાચ ।
અથ તં સમયં જ્ઞાત્વા કન્યાદાનોચિતં ગિરિઃ ।
નિવેદિતં ચ ગર્ગેણ મુમુદેઽતીવ ચેતસિ ॥ ૧૫॥

મહીધરાન્દ્વિજાંશ્ચૈવ પરાનપિ મુદા ગિરિઃ ।
પ્રેષયામાસ સુપ્રીત્યા શિવાનયનકામ્યયા ॥ ૧૬॥

તે પર્વતા દ્વિજાશ્ચૈવ સર્વમઙ્ગલપાણયઃ ।
સઞ્જગ્મુઃ સોત્સવાઃ પ્રીત્યા યત્ર દેવો મહેશ્વરઃ ॥ ૧૭॥

તદા વાદિત્રઘોષેણ બ્રહ્મઘોષેણ ભૂયસા ।
મહોત્સાહોઽભવત્તત્ર ગીતનૃત્યાન્વિતેન હિ ॥ ૧૮॥

શ્રુત્વા વાદિત્રનિર્ઘોષં સર્વે શઙ્કરસેવકાઃ ।
ઉત્થિતાસ્ત્વૈકપદ્યેન સદેવર્ષિગણા મુદા ॥ ૧૯॥

પરસ્પરં સમૂચુસ્તે હર્ષનિર્ભરમાનસાઃ ।
અત્રાગચ્છન્તિ ગિરયઃ શિવાનયનકામ્યયા ॥ ૨૦॥

પાણિગ્રહણકાલો હિ નૂનં સદ્યઃ સમાગતઃ ।
મહદ્ભાગ્યં હિ સર્વેષાં સમ્પ્રાપ્તમિહ મન્મહે ॥ ૨૧॥

ધન્યા વયં વિશેષેણ વિવાહં શિવયોર્ધ્રુવમ્ ।
દ્રક્ષ્યામઃ પરમપ્રીત્યા જગતાં મઙ્ગલાલયમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
એવં યાવદભૂત્તેષાં સંવાદસ્તત્ર ચાદરાત્ ।
તાવત્સર્વે સમાયાતાઃ પર્વતેન્દ્રસ્ય મન્ત્રિણઃ ॥ ૨૩॥

તે ગત્વા પ્રાર્થયાઞ્ચક્રુઃ શિવં વિષ્ણ્વાદિકાનપિ ।
કન્યાદાનોચિતઃ કાલો વર્તતે ગમ્યતામિતિ ॥ ૨૪॥

તે તચ્છ્રુત્વા સુરાઃ સર્વે મુને વિષ્ણ્વાદયોઽખિલાઃ ।
મુમુદુશ્ચેતસાતીવ જયેત્યૂચુર્ગિરિં દ્રુતમ્ ॥ ૨૫॥

શિવોઽપિ મુમુદેઽતીવ કાલીપ્રાપણલાલસઃ ।
ગુપ્તં ચકાર તચ્ચિહ્નં મનસ્યેવાદ્ભુતાકૃતિઃ ॥ ૨૬॥

અથ સ્નાનં કૃતં તેન મઙ્ગલદ્રવ્યસંયુતમ્ ।
શૂલિના સુપ્રસન્નેન લોકાનુગ્રહકારિણા ॥ ૨૭॥

સ્નાતઃ સુવાસસા યુક્તઃ સર્વૈસ્તૈઃ પરિવારિતઃ ।
આરોપિતો વૃષસ્કન્ધે લોકપાલૈઃ સુસેવિતઃ ॥ ૨૮॥

પુરસ્કૃત્ય પ્રભું સર્વે જગ્મુર્હિમગિરેર્ગૃહમ્ ।
વાદ્યાનિ વાદયન્તશ્ચ કૃતવન્તઃ કુતૂહલમ્ ॥ ૨૯॥

હિમાગપ્રેષિતા વિપ્રાસ્તથા તે પર્વતોત્તમાઃ ।
શમ્ભોરગ્રચરા હ્યાસન્કુતૂહલસમન્વિતાઃ ॥ ૩૦॥

બભૌ છત્રેણ મહતા ધ્રિયમાણો હિ મૂર્ધનિ ।
ચામરૈર્વીજ્યમાનોઽસૌ સવિતાનો મહેશ્વરઃ ॥ ૩૧॥

અહં વિષ્ણુસ્તથા ચેન્દ્રો લોકપાલાસ્તથૈવ ચ ।
અગ્રગાઃ સ્માતિશોભન્તે શ્રિયા પરમયા શ્રિતાઃ ॥ ૩૨॥

તતઃ શઙ્ખાશ્ચ ભેર્યશ્ચ પટહાનકગોમુખાઃ ।
પુનઃ પુનરવાદ્યન્ત વાદિત્રાણિ મહોત્સવે ॥ ૩૩॥

તથૈવ ગાયકાઃ સર્વે જગુઃ પરમમઙ્ગલમ્ ।
નર્તક્યો નનૃતુઃ સર્વા નાનાતાલસમન્વિતાઃ ॥ ૩૪॥

એભિસ્સમેતો જગદેકબન્ધુ-
ર્યયૌ તદાનીં પરમેશવર્ચસા ।
સુસેવ્યમાનઃ સકલૈઃ સુરેશ્વરૈ-

વિકીર્યમાણઃ કુસુમૈશ્ચ હર્ષિતૈઃ ॥ ૩૫॥

સમ્પૂજિતસ્તદા શમ્ભુઃ પ્રવિષ્ટો યજ્ઞમણ્ડપમ્ ।
સંસ્તૂયમાનો બહ્વીભિઃ સ્તુતિભિઃ પરમેશ્વરઃ ॥ ૩૬॥

વૃષાદુત્તારયામાસુર્મહેશં પર્વતોત્તમાઃ ।
નિન્યુર્ગૃહાન્તરં પ્રીત્યા મહોત્સવપુરસ્સરમ્ ॥ ૩૭॥

હિમાલયોઽપિ સમ્પ્રાપ્તં સદેવગણમીશ્વરમ્ ।
પ્રણમ્ય વિધિવદ્ભક્ત્યા નીરાજનમથાકરોત્ ॥ ૩૮॥

સર્વાન્સુરાન્મુનીનન્યાન્ પ્રણમ્ય સમહોત્સવઃ ।
સમ્માનમકરોત્તેષાં પ્રશંસન્સ્વવિધિં મુદા ॥ ૩૯॥

સોઽગઃસાચ્યુતમીશાનં સુપાદ્યાર્ઘ્યપુરસ્સરમ્ ।
સદેવમુખ્યવર્ગં ચ નિનાય સ્વાલયાન્તરમ્ ॥ ૪૦॥

પ્રાઙ્ગણે સ્થાપયામાસ રત્નસિંહાસનેષુ તાન્ ।
સર્વાન્વિષ્ણું ચ મામીશં વિશિષ્ટાંશ્ચ વિશેષતઃ ॥ ૪૧॥

સખીભિર્મેનયા પ્રીત્યા બ્રાહ્મણસ્ત્રીભિરેવ ચ ।
અન્યાભિશ્ચ પુરન્ધ્રીભિશ્ચક્રે નીરાજનં મુદા ॥ ૪૨॥

પુરોધસા કૃત્યવિદા શઙ્કરાય મહાત્મને ।
મધુપર્કાદિકં યદ્યત્કૃત્યં તત્તત્કૃતં મુદા ॥ ૪૩॥

મયા સ નોદિતસ્તત્ર પુરોધાઃ કૃતવાંસ્તદા ।
સુમઙ્ગલં ચ યત્કર્મ પ્રસ્તાવસદૃશં મુને ॥ ૪૪॥

અન્તર્વેદ્યાં મહાપ્રીત્યા સમ્પ્રવિશ્ય હિમાદ્રિણા ।
યત્ર સા પાર્વતી કન્યા સર્વાભરણભૂષિતા ॥ ૪૫॥

વેદિકોપરિ તન્વઙ્ગી સંસ્થિતા સુવિરાજિતા ।
તત્ર નીતો મહાદેવો વિષ્ણુના ચ મયા સહ ॥ ૪૬॥

લગ્નં નિરીક્ષમાણાસ્તે વાચસ્પતિપુરોગમાઃ ।
કન્યાદાનોચિતં તત્ર બભૂવુઃ પરમોત્સવાઃ ॥ ૪૭॥

તત્રોપવિષ્ટો ગર્ગશ્ચ યત્રાસ્તિ ઘટિકાલયમ્ ।
યાવચ્છેષા ઘટી તાવત્કૃતં પ્રણવભાષણમ્ ॥ ૪૮॥

પુણ્યાહં પ્રવદન્ ગર્ગઃ સમાદધ્રેઽઞ્જલિં મુદા ।
પાર્વત્યક્ષતપૂર્ણં ચ વવૃષે ચ શિવોપરિ ॥ ૪૯॥

તયા સમ્પૂજિતો રુદ્રો દધ્યક્ષતકુશામ્બુભિઃ ।
પરમોદારયા તત્ર પાર્વત્યા રુચિરાસ્યયા ॥ ૫૦॥

વિલોકયન્તી તં શમ્ભું યસ્યાર્થે પરમં તપઃ ।
કૃતં પુરા મહાપ્રીત્યા વિરરાજ શિવાતિ સા ॥ ૫૧॥

મયા મુને તદોક્તસ્તુ ગર્ગાદિમુનિભિશ્ચ સઃ ।
સમાનર્ચ શિવાં શમ્ભુઃ લૌકિકાચારસંરતઃ ॥ ૫૨॥

એવં પરસ્પરં તૌ વૈ પાર્વતીપરમેશ્વરૌ ।
અર્ચયન્તૌ તદાનીં ચ શુશુભાતે જગન્મયૌ ॥ ૫૩॥

ત્રૈલોક્યલક્ષ્મ્યા સંવીતૌ નિરીક્ષન્તૌ પરસ્પરમ્ ।
તદા નીરાજિતૌ લક્ષ્મ્યાદિભિઃ સ્ત્રીભિર્વિશેષતઃ ॥ ૫૪॥

તથાપરા વૈ દ્વિજયોષિતશ્ચ
નીરાજયામાસુરથો પુરસ્ત્રિયઃ ।
શિવાં ચ શમ્ભુઞ્ચ વિલોકયન્ત્યોઽ-
વાપુર્મુદં તાઃ સકલા મહોત્સવમ્ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવહિમગિરિગૃહાભ્યન્તરગમનોત્સવવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૮. અષ્ટચત્વારિંશોઽધ્યાયઃ । શિવાશિવયોર્વિવાહવિધિકથનમ્ ।

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે તત્ર ગર્ગાચાર્યપ્રણોદિતઃ ।
હિમવાન્મેનયા સાર્ધં કન્યાં દાતું પ્રચક્રમે ॥ ૧॥

હૈમં કલશમાદાય મેના ચાર્ધાઙ્ગમાશ્રિતા ।

હિમાદ્રેશ્ચ મહાભાગા વસ્ત્રાભરણભૂષિતા ॥ ૨॥

પાદ્યાદિભિસ્તતઃ શૈલઃ પ્રહૃષ્ટઃ સ્વપુરોહિતઃ ।
તં વરં વરયામાસ વસ્ત્રચન્દનભૂષણૈઃ ॥ ૩॥

તતો હિમાદ્રિણા પ્રોક્તા દ્વિજાસ્તિથ્યાદિકીર્તને ।
પ્રયોગો ભણ્યતાં તાવદસ્મિન્સમય આગતે ॥ ૪॥

તથેતિ ચોક્તા તે સર્વે કાલજ્ઞા દ્વિજસત્તમાઃ ।
તિથ્યાદિકીર્તનં ચક્રુઃ પ્રીત્યા પરમનિર્વૃતાઃ ॥ ૫॥

તતો હિમાચલઃ પ્રીત્યા શમ્ભુના પ્રેરિતો હૃદા ।
સૂતીકૃતપરેશેન વિહસન્ શમ્ભુમબ્રવીત્ ॥ ૬॥

સ્વગોત્રં કથ્યતાં શમ્ભો પ્રવરશ્ચ કુલં તથા ।
નામ વેદં તથા શાખાં માકાર્ષીઃ સમયાત્યયમ્ ॥ ૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય હિમાદ્રેઃ શઙ્કરસ્તદા ।
સુમુખો વિમુખઃ સદ્યોઽપ્યશોચ્યઃ શોચ્યતાં ગતઃ ॥ ૮॥

એવંવિધઃ સુરવરૈર્મુનિભિસ્તદાનીં
ગન્ધર્વયક્ષગણસિદ્ધગણૈસ્તથૈવ ।
દૃષ્ટો નિરુત્તરમુખો ભગવાન્મહેશોઽ-
કાર્ષીસ્સુહાસ્યમથ તત્ર સ નારદ ત્વમ્ ॥ ૯॥

વીણામવાદયંસ્ત્વં હિ બ્રહ્મવિજ્ઞોઽથ નારદ ।
શિવેન પ્રેરિતસ્તત્ર મનસા શમ્ભુમાનસઃ ॥ ૧૦॥

તદા નિવારિતો ધીમાન્ પર્વતેન્દ્રેણ વૈ હઠાત્ ।
વિષ્ણુના ચ મયા દેવૈર્મુનિભિશ્ચાખિલૈસ્તથા ॥ ૧૧॥

ન નિવૃત્તોઽભવસ્ત્વં હિ સ યદા શઙ્કરેચ્છયા ।
ઇતિ પ્રોક્તોઽદ્રિણા તર્હિ વીણાં મા વાદયાધુના ॥ ૧૨॥

સુનિષિદ્ધો હઠાત્તેન દેવર્ષે ત્વં યદા બુધ ।
પ્રત્યવોચો ગિરીશં તં સુસંસ્મૃત્ય મહેશ્વરમ્ ॥ ૧૩॥

નારદ ઉવાચ ।
ત્વં હિ મૂઢત્વમાપન્નો ન જાનાસિ ચ કિઞ્ચન ।

વાચ્યે મહેશવિષયેઽતીવાસિ ત્વં બહિર્મુખઃ ॥ ૧૪॥

ત્વયા પૃષ્ઠો હરઃ સાક્ષાત્સ્વગોત્રકથનં પ્રતિ ।
સમયેઽસ્મિંસ્તદત્યન્તમુપહાસકરં વચઃ ॥ ૧૫॥

અસ્ય ગોત્રં કુલં નામ નૈવ જાનન્તિ પર્વત ।
વિષ્ણુબ્રહ્માદયોઽપીહ પરેષાં કા કથા સ્મૃતા ॥ ૧૬॥

યસ્યૈકદિવસે શૈલ બ્રહ્મકોટિર્લયં ગતા ।
સ એવ શઙ્કરસ્તેદ્ય દૃષ્ટઃ કાલીતપોબલાત્ ॥ ૧૭॥

અરૂપોઽયં પરબ્રહ્મ નિર્ગુણઃ પ્રકૃતેઃ પરઃ ।
નિરાકારો નિર્વિકારી માયાધીશઃ પરાત્પરઃ ॥ ૧૮॥

અગોત્રકુલનામા હિ સ્વતન્ત્રો ભક્તવત્સલઃ ।
તદિચ્છયા હિ સગુણઃ સુતનુર્બહુનામભૃત્ ॥ ૧૯॥

સુગોત્રી ગોત્રહીનશ્ચ કુલહીનઃ કુલીનકઃ ।
પાર્વતીતપસા સોઽદ્ય જામાતા તે ન સંશયઃ ॥ ૨૦॥

લીલાવિહારિણા તેન મોહિતં સચરાચરમ્ ।
નો જાનાતિ શિવં કોઽપિ પ્રાજ્ઞોઽપિ ગિરિસત્તમ ॥ ૨૧॥

લિઙ્ગાકૃતેર્મહેશસ્ય કેન દૃષ્ટં ન મસ્તકમ્ ।
વિષ્ણુર્ગત્વા હિ પાતાલં તદૈનં નાપ વિસ્મિતઃ ॥ ૨૨॥

કિં બહૂક્ત્યા નગશ્રેષ્ઠ શિવમાયા દુરત્યયા ।
તદધીનાસ્ત્રયો લોકા હરિબ્રહ્માદયોઽપિ ચ ॥ ૨૩॥

તસ્માત્ત્વયા શિવાતાત સુવિચાર્ય પ્રયત્નતઃ ।
ન કર્તવ્યો વિમર્શોઽત્ર ત્વેવંવિધવરે મનાક્ ॥ ૨૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ત્વં મુને જ્ઞાની શિવેચ્છાકાર્યકારકઃ ।
પ્રત્યવોચઃ પુનસ્તં વૈ શૈલેદ્રં હર્ષયન્ ગિરા ॥ ૨૫॥

નારદ ઉવાચ ।
શૃણુ તાત મહાશૈલ શિવાજનક મદ્વચઃ ।
તચ્છ્રુત્વા તનયાં દેવીં દેહિ ત્વં શઙ્કરાય હિ ॥ ૨૬॥

સગુણસ્ય મહેશસ્ય લીલયા રૂપધારિણઃ ।

ગોત્રં કુલં વિજાનીહિ નાદમેવ હિ કેવલમ્ ॥ ૨૭॥

શિવો નાદમયઃ સત્યં નાદઃ શિવમયસ્તથા ।
ઉભયોરન્તરં નાસ્તિ નાદસ્ય ચ શિવસ્ય ચ ॥ ૨૮॥

સૃષ્ટૌ પ્રથમજત્વાદ્ધિ લીલાસગુણરૂપિણઃ ।
શિવાન્નાદસ્ય શૈલેન્દ્ર સર્વોત્કૃષ્ટસ્તતઃ સ હિ ॥ ૨૯॥

અતો હિ વાદિતા વીણા પ્રેરિતેન મયાદ્ય વૈ ।
સર્વેશ્વરેણ મનસા શઙ્કરેણ હિમાલય ॥ ૩૦॥

બ્રહ્મોવાચ ।
એતચ્છ્રુત્વા તવ મુને વચસ્તત્તુ ગિરિશ્વરઃ ।
હિમાદ્રિસ્તોષમાપન્નો ગતવિસ્મયમાનસઃ ॥ ૩૧॥

અથ વિષ્ણુપ્રભૃતયઃ સુરાશ્ચ મુનયસ્તથા ।
સાધુ સાધ્વિતિ તે સર્વે પ્રોચુર્વિગતવિસ્મયાઃ ॥ ૩૨॥

મહેશ્વરસ્ય ગામ્ભીર્યં જ્ઞાત્વા સર્વે વિચક્ષણાઃ ।
સવિસ્મયા મહામોદાન્વિતાઃ પ્રોચુઃ પરસ્પરમ્ ॥ ૩૩॥

યસ્યાજ્ઞયા જગદિદં ચ વિશાલમેવ
જાતં પરાત્પરતરો નિજબોધરૂપઃ ।
શર્વઃ સ્વતન્ત્રગતિકૃત્પરભાવગમ્યઃ
સોઽસૌ ત્રિલોકપતિરદ્ય ચ નઃ સુદૃષ્ટઃ ॥ ૩૪॥

અથ તે પર્વતશ્રેષ્ઠા મેર્વાદ્યા જાતસમ્ભ્રમાઃ ।
ઊચુસ્તે ચૈકપદ્યેન હિમવન્તં નગેશ્વરમ્ ॥ ૩૫॥

પર્વતા ઊચુઃ ।
કન્યાદાને સ્થીયતાં ચાદ્ય શૈલ-
નાથોક્ત્યા કિં કાર્યનાશસ્તવૈવ ।
સત્યં બ્રૂમો નાત્ર કાર્યો વિમર્શઃ
તસ્માત્કન્યા દીયતામીશ્વરાય ॥ ૩૬॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તેષાં સુહૃદાં સ હિમાલયઃ ।
સ્વકન્યાદાનમકરોચ્છિવાય વિધિનોદિતઃ ॥ ૩૭॥

ઇમાં કન્યાં તુભ્યમહં દદામિ પરમેશ્વર ।
ભાર્યાર્થં પરિગૃહ્ણીષ્વ પ્રસીદ સકલેશ્વર ॥ ૩૮॥

તસ્મૈ રુદ્રાય મહતે મન્ત્રેણાનેન દત્તવાન્ ।
હિમાચલો નિજાં કન્યાં પાર્વતીં ત્રિજગત્પ્રસૂમ્ ॥ ૩૯॥

ઇત્થં શિવાકરં શૈલં શિવહસ્તે નિધાય ચ ।
મુમોદાતીવ મનસિ તીર્ણકામમહાર્ણવઃ ॥ ૪૦॥

વેદમન્ત્રેણ ગિરિશો ગિરિજાકરપઙ્કજમ્ ।
જગ્રાહ સ્વકરેણાશુ પ્રસન્નઃ પરમેશ્વરઃ ॥ ૪૧॥

ક્ષિતિં સંસ્પૃશ્ય કામસ્ય કોઽદાદિતિ મનું મુને ।
પપાઠ શઙ્કરઃ પ્રીત્યા દર્શયઁલ્લૌકિકીં ગતિમ્ ॥ ૪૨॥

મહોત્સવો મહાનાસીત્સર્વત્ર પ્રમુદાવહઃ ।
બભૂવ જયસંરાવો દિવિ ભૂમ્યન્તરિક્ષકે ॥ ૪૩॥

સાધુશબ્દં નમઃ શબ્દં ચક્રુઃ સર્વેઽતિહર્ષિતાઃ ।
ગન્ધર્વાઃ સુજગુઃ પ્રીત્યા નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૪૪॥

હિમાચલસ્ય પૌરા હિ મુમુદુશ્ચાતિ ચેતસિ ।
મઙ્ગલં મહદાસીદ્વૈ મહોત્સવપુરસ્સરમ્ ॥ ૪૫॥

અહં વિષ્ણુશ્ચ શક્રશ્ચ નિર્જરા મુનયોઽખિલાઃ ।
હર્ષિતા હ્યભવંશ્ચાતિ પ્રફુલ્લવદનામ્બુજાઃ ॥ ૪૬॥

અથ શૈલવરઃ સોઽદાત્સુપ્રસન્નો હિમાચલઃ ।
શિવાય કન્યાદાનસ્ય સાઙ્ગતાં સુયથોચિતામ્ ॥ ૪૭॥

તતો બન્ધુજનાસ્તસ્ય શિવાં સમ્પૂજ્ય ભક્તિતઃ ।
દદુઃ શિવાય સદ્દ્રવ્યં નાનાવિધિવિધાનતઃ ॥ ૪૮॥

હિમાલયસ્તુષ્ટમનાઃ પાર્વતીશિવપ્રીતયે ।
નાનાવિધાનિ દ્રવ્યાણિ દદૌ તત્ર મુનીશ્વર ॥ ૪૯॥

યૌતુકાનિ દદૌ તસ્મૈ રત્નાનિ વિવિધાનિ ચ ।
ચારુરત્નવિકારાણિ પાત્રાણિ વિવિધાનિ ચ ॥ ૫૦॥

ગવાં લક્ષં હયાનાં ચ સજ્જિતાનાં શતં તથા ।
દાસીનામનુરક્તાનાં લક્ષં સદ્દ્રવ્યભૂષિતમ્ ॥ ૫૧॥

નાગાનાં શતલક્ષં હિ રથાનાં ચ તથા મુને ।
સુવર્ણજટિતાનાં ચ રત્નસારવિનિર્મિતમ્ ॥ ૫૨॥

ઇત્થં હિમાલયો દત્ત્વા સ્વસુતાં ગિરિજાં શિવામ્ ।
શિવાય પરમેશાય વિધિનાપ કૃતાર્થતામ્ ॥ ૫૩॥

અથ શૈલવરો માધ્યન્દિનોક્તસ્તોત્રતો મુદા ।
તુષ્ટાવ પરમેશાનં સદ્ગિરા સુકૃતાઞ્જલિઃ ॥ ૫૪॥

તતો વેદવિદા તેનાજ્ઞપ્તા મુનિગણાસ્તદા ।
શિરોઽભિષેકં ચક્રુસ્તે શિવાયાઃ પરમોત્સવાઃ ॥ ૫૫॥

દેવાભિધાનમુચ્ચાર્ય પર્યુક્ષણવિધિં વ્યધુઃ ।
મહોત્સવસ્તદા ચાસીન્મહાનન્દકરો મુને ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે કન્યાદાનવર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩.૪૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૪૯. એકોનપઞ્ચાશત્તમોઽધ્યાયઃ । વિવાહસંસ્કારકથનં વિધિમોહવર્ણનઞ્ચ ।

બ્રહ્મોવાચ ।
અથો મમાજ્ઞયા વિપ્રૈઃ સંસ્થાપ્યાનલમીશ્વરઃ ।
હોમં ચકાર તત્રૈવમઙ્કે સંસ્થાપ્ય પાર્વતીમ્ ॥ ૧॥

ઋગ્યજુસ્સામમન્ત્રૈશ્ચાહુતિં વહ્નૌ દદૌ શિવઃ ।
લાજાઞ્જલિં દદૌ કાલીભ્રાતા મૈનાકસંજ્ઞકઃ ॥ ૨॥

અથ કાલી શિવશ્ચોભૌ ચક્રતુર્વિધિવન્મુદા ।
વહ્નિપ્રદક્ષિણાં તાત લોકાચારં વિધાય ચ ॥ ૩॥

તત્રાદ્ભુતમલઞ્ચક્રે ચરિતં ગિરિજાપતિઃ ।
તદેવ શ઼ૃણુ દેવર્ષે તવસ્નેહાદ્ બ્રવીમ્યહમ્ ॥ ૪॥

તસ્મિન્નવસરે ચાહં શિવમાયાવિમોહિતઃ ।
અપશ્યં ચરણે દેવ્યા નખેન્દું ચ મનોહરમ્ ॥ ૫॥

દર્શનાત્તસ્ય ચ તદાભૂવં દેવમુને હ્યહમ્ ।
મદનેન સમાવિષ્ટોઽતીવ ક્ષુભિતમાનસઃ ॥ ૬॥

મુહુર્મુહુરપશ્યં વૈ તદઙ્ગં સ્મરમોહિતઃ ।
તતસ્તદ્દર્શનાત્સદ્યો વીર્યં મે પ્રાચ્યુતદ્ભુવિ ॥ ૭॥

રેતસા ક્ષરતા તેન લજ્જિતોઽહં પિતામહઃ ।
મુને વ્યમર્દં તચ્છિન્નં ચરણાભ્યાં હિ ગોપયન્ ॥ ૮॥

તજ્જ્ઞાત્વા ચ મહાદેવશ્ચુકોપાતીવ નારદ ।
હન્તુમૈચ્છત્તદા શીઘ્રં માં વિધિં કામમોહિતમ્ ॥ ૯॥

હાહાકારો મહાનાસીત્તત્ર સર્વત્ર નારદ ।
જનાશ્ચકમ્પિરે સર્વે ભયમાયાતિ વિશ્વભૃત્ ॥ ૧૦॥

તતસ્તં તુષ્ટુવુઃ શમ્ભું વિષ્ણ્વાદ્યા નિર્જરા મુને ।
સકોપમ્પ્રજ્વલન્તં ચ તેજસા હન્તુમુદ્યતમ્ ॥ ૧૧॥

દેવા ઊચુઃ ।
દેવદેવ જગદ્વ્યાપિન્ પરમેશ સદાશિવ ।
જગદીશ જગન્નાથ સમ્પ્રસીદ જગન્મય ॥ ૧૨॥

સર્વેષામપિ ભાવાનાં ત્વમાત્મા હેતુરીશ્વરઃ ।
નિર્વિકારોઽવ્યયો નિત્યો નિર્વિકલ્પોઽક્ષરઃ પરઃ ॥ ૧૩॥

આદ્યન્તાવસ્ય યન્મધ્યમિદમન્યદહં બહિઃ ।
યતોઽવ્યયઃ સ નૈતાનિ તત્સત્યમ્બ્રહ્મ ચિદ્ભવાન્ । ૧૪॥

તવૈવ ચરણામ્ભોજં મુક્તિકામા દૃઢવ્રતાઃ ।
વિસૃજ્યોભયતઃ સઙ્ગં મુનયઃ સમુપાસતે ॥ ૧૫॥

ત્વં બ્રહ્મ પૂર્ણમમૃતં વિશોકં નિર્ગુણમ્પરમ્ ।
આનન્દમાત્રમવ્યગ્રમવિકારમનાત્મકમ્ ॥ ૧૬॥

વિશ્વસ્ય હેતુરુદયસ્થિતિસંયમનસ્ય હિ ।
તદપેક્ષતયાત્મેશોઽનપેક્ષઃ સર્વદા વિભુઃ ॥ ૧૭॥

એકસ્ત્વમેવ સદસદ્ દ્વયમદ્વયમેવ ચ ।

સ્વર્ણં કૃતાકૃતમિવ વસ્તુભેદો ન ચૈવ હિ ॥ ૧૮॥

અજ્ઞાનતસ્ત્વયિ જનૈર્વિકલ્પો વિદિતો યતઃ ।
તસ્માદ્ ભ્રમપ્રતીકારો નિરુપાધેર્ન હિ સ્વતઃ ॥ ૧૯॥

ધન્યા વયં મહેશાન તવ દર્શનમાત્રતઃ ।
દૃઢભક્તજનાનન્દપ્રદઃ શમ્ભો દયાં કુરુ ॥ ૨૦॥

ત્વમાદિસ્ત્વમનાદિશ્ચ પ્રકૃતેસ્ત્વં પરઃ પુમાન્ ।
વિશ્વેશ્વરો જગન્નાથો નિર્વિકારઃ પરાત્પરઃ ॥ ૨૧॥

યોઽયં બ્રહ્માસ્તિ રજસા વિશ્વમૂર્તિઃ પિતામહઃ ।
ત્વત્પ્રસાદાત્પ્રભો વિષ્ણુઃ સત્ત્વેન પુરુષોત્તમઃ ॥ ૨૨॥

કાલાગ્નિરુદ્રસ્તમસા પરમાત્મા ગુણૈઃ પરઃ ।
સદા શિવો મહેશાનઃસર્વવ્યાપી મહેશ્વરઃ ॥ ૨૩॥

વ્યક્તં મહચ્ચ ભૂતાદિસ્તન્માત્રાણીન્દ્રિયાણિ ચ ।
ત્વયૈવાધિષ્ઠિતાન્યેવ વિશ્વમૂર્તે મહેશ્વર ॥ ૨૪॥

મહાદેવ પરેશાન કરુણાકર શઙ્કર ।
પ્રસીદ દેવદેવેશ પ્રસીદ પુરુષોત્તમ । ૨૫॥

વાસાંસિ સાગરાઃ સપ્ત દિશશ્ચૈવ મહાભુજાઃ ।
દ્યૌર્મૂર્ધા તે વિભોર્નાભિઃ ખં વાયુર્નાસિકા તતઃ ॥ ૨૬॥

ચક્ષૂંષ્યગ્ની રવિસ્સોમઃ કેશા મેઘાસ્તવ પ્રભો ।
નક્ષત્રતારકાદ્યાશ્ચ ગ્રહાશ્ચૈવ વિભૂષણમ્ ॥ ૨૭॥

કથં સ્તોષ્યામિ દેવેશ ત્વાં વિભો પરમેશ્વર ।
વાચામગોચરોઽસિ ત્વં મનસા ચાપિ શઙ્કર ॥ ૨૮॥

પઞ્ચાસ્યાય ચ રુદ્રાય પઞ્ચાશત્કોટિમૂર્તયે ।
ત્ર્યધિપાય વરિષ્ઠાય વિદ્યાતત્ત્વાય તે નમઃ ॥ ૨૯॥

અનિર્દેશ્યાય નિત્યાય વિદ્યુજ્જ્વાલાય રૂપિણે ।
અગ્નિવર્ણાય દેવાય શઙ્કરાય નમો નમઃ ॥ ૩૦॥

વિદ્યુત્કોટિપ્રતીકાશમષ્ટકોણં સુશોભનમ્ ।
રૂપમાસ્થાય લોકેઽસ્મિન્ સંસ્થિતાય નમો નમઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં પ્રસન્નઃ પરમેશ્વરઃ ।
બ્રહ્મણે મે દદૌ શીઘ્રમભયં ભક્તવત્સલઃ ॥ ૩૨॥

અથ સર્વે સુરાસ્તત્ર વિષ્ણ્વાદ્યા મુનયસ્તથા ।
અભવન્સુસ્મિતાસ્તાત ચક્રુશ્ચ પરમોત્સવમ્ ॥ ૩૩॥

મમ તદ્રેતસા તાત મર્દિતેન મુહુર્મુહુઃ ।
અભવન્કણકાસ્તત્ર ભૂરિશઃ પરમોજ્જ્વલાઃ ॥ ૩૪॥

ઋષયો બહવો જાતા બાલખિલ્યાઃ સહસ્રશઃ ।
કણકૈસ્તૈશ્ચ વીર્યસ્ય પ્રજ્વલદ્ભિઃ સ્વતેજસા ॥ ૩૫॥

અથ તે ઋષયઃ સર્વે ઉપતસ્થુસ્તદા મુને ।
મમાન્તિકં પરપ્રીત્યા તાત તાતેતિ ચાબ્રુવન્ ॥ ૩૬॥

ઈશ્વરેચ્છાપ્રયુક્તેન પ્રોક્તાસ્તે નારદેન હિ ।
બાલખિલ્યાસ્તુ તે તત્ર કોપયુક્તેન ચેતસા ॥ ૩૭॥

નારદ ઉવાચ ।
ગચ્છધ્વં સઙ્ગતા યૂયં પર્વતં ગન્ધમાદનમ્ ।
ન સ્થાતવ્યં ભવદ્ભિશ્ચ ન હિ વોઽત્ર પ્રયોજનમ્ ॥ ૩૮॥

તત્ર તપ્ત્વા તપશ્ચાતિ ભવિતારો મુનીશ્વરાઃ ।
સૂર્યશિષ્યાઃ શિવસ્યૈવાજ્ઞયા મે કથિતં ત્વિદમ્ ॥ ૩૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્તાસ્તે તદા સર્વે બાલખિલ્યાશ્ચ પર્વતમ્ ।
સત્વરં પ્રયયુર્નત્વા શઙ્કરં ગન્ધમાદનમ્ ॥ ૪૦॥

વિષ્ણ્વાદિભિસ્તદાભૂવં શ્વાસિતોઽહં મુનીશ્વર ।
નિર્ભયઃ પરમેશાનપ્રેરિતૈસ્તૈર્મહાત્મભિઃ ॥ ૪૧॥

અસ્તવં ચાપિ સર્વેશં શઙ્કરં ભક્તવત્સલમ્ ।
સર્વકાર્યકરં જ્ઞાત્વા દુષ્ટગર્વાપહારકમ્ ॥ ૪૨॥

દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
ત્વમેવ કર્તા સર્વસ્ય ભર્તા હર્તા ચ સર્વથા ॥ ૪૩॥

ત્વદિચ્છયા હિ સકલં સ્થિતં હિ સચરાચરમ્ ।

તન્ત્યાં યથા બલીવર્દા મયા જ્ઞાતં વિશેષતઃ ॥ ૪૪॥

ઇત્યેવમુક્ત્વા સોઽહં વૈ પ્રણામં ચ કૃતાઞ્જલિઃ ।
અન્યેઽપિ તુષ્ટુવુઃ સર્વે વિષ્ણ્વાદ્યાસ્તં મહેશ્વરમ્ ॥ ૪૫॥

અથાકર્ણ્ય નુતિં શુદ્ધાં મમ દીનતયા તદા ।
વિષ્ણ્વાદીનાઞ્ચ સર્વેષાં પ્રસન્નોઽભૂન્મહેશ્વરઃ ॥ ૪૬॥

દદૌ સોઽતિવરં મહ્યમભયં પ્રીતમાનસઃ ।
સર્વે સુખમતીવાપુરત્યામોદમહં મુને ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે વિધિમોહવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૪૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૦. પઞ્ચાશત્તમોઽધ્યાયઃ । વિવાહમહોત્સવે સ્ત્રીવિનોદવર્ણનમ્ ।

બ્રહ્મોવાચ ।
તતશ્ચાહં મુનિગણૈઃ શેષકૃત્યં શિવાજ્ઞયા ।
અકાર્ષં નારદ પ્રીત્યા શિવાશિવવિવાહતઃ ॥ ૧॥

તયોઃ શિરોઽભિષેકશ્ચ બભૂવાદરતસ્તતઃ ।
ધ્રુવસ્ય દર્શનં વિપ્રાઃ કારયામાસુરાદરાત ॥ ૨॥

હૃદયાલમ્ભનં કર્મ બભૂવ તદનન્તરમ્ ।
સ્વસ્તિપાઠશ્ચ વિપ્રેન્દ્ર મહોત્સવપુરસ્સરઃ ॥ ૩॥

શિવાશિરસિ સિન્દૂરં દદૌ શમ્ભુર્દ્વિજાજ્ઞયા ।
તદાનીં ગિરિજાભિખ્યાદ્ભુતાવર્ણ્યા બભૂવ હ ॥ ૪॥

તતો વિપ્રાજ્ઞયા તૌ દ્વાવેકાસનસમાસ્થિતૌ ।
લેભાતે પરમાં શોભાં ભક્તચિત્તમુદાવહામ્ ॥ ૫॥

તતઃ સ્વસ્થાનમાગત્ય સંસ્રવપ્રાશનં મુદા ।
ચક્રતુસ્તૌ નિદેશાન્મેઽદ્ભુતલીલાકરૌ મુને ॥ ૬॥

ઇત્થં નિવૃત્તે વિધિવદ્યજ્ઞે વૈવાહિકે શિવઃ ।
બ્રહ્મણે પૂર્ણપાત્રં મે દદૌ લોકકૃતે પ્રભુઃ ॥ ૭॥

ગોદાનં વિધિવચ્છમ્ભુરાચાર્યાય દદૌ તતઃ ।
મહાદાનાનિ ચ પ્રીત્યા યાનિ મઙ્ગલદાનિ વૈ ॥ ૮॥

તતઃ શતસુવર્ણં ચ વિપ્રેભ્યઃ સ દદૌ પૃથક્ ।
બહુભ્યો રત્નકોટીશ્ચ નાનાદ્રવ્યાણ્યનેકશઃ ॥ ૯॥

તદાનીમમરાઃ સર્વે પરે જીવાશ્ચરાચરાઃ ।
મુમુદુશ્ચેતસાતીવ બભૂવાતિ જયધ્વનિઃ ॥ ૧૦॥

મઙ્ગલધ્વનિગાનં ચ બભૂવ બહુ સર્વતઃ ।
વાદ્યધ્વનિરભૂદ્રમ્યો સર્વાનન્દપ્રવર્ધનઃ ॥ ૧૧॥

હરિર્મયાથ દેવાશ્ચ મુનયશ્ચાપરેઽખિલાઃ ।
ગિરિમામન્ત્ર્ય સુપ્રીત્યા સ્વસ્થાનં પ્રયયુર્દ્રુતમ્ ॥ ૧૨॥

તદાનીં શૈલનગરે સ્ત્રિયશ્ચ મુદિતા વરમ્ ।
શિવાશિવૌ સમાનીય યયુઃ કુહવરાલયમ્ ॥ ૧૩॥

લૌકિકાચારમાજહ્રુસ્તાઃ સ્ત્રિયસ્તત્ર ચાદૃતાઃ ।
મહોત્સાહો બભૂવાથ સર્વતઃ પ્રમુદાવહઃ ॥ ૧૪॥

અથ તાસ્તૌ સમાનીય દમ્પતી જનશઙ્કરૌ ।
વાસાલયં મહાદિવ્યં ભવાચારં વ્યધુર્મુદા ॥ ૧૫॥

અથો સમીપમાગત્ય શૈલેન્દ્રનગરસ્ત્રિયઃ ।
નિર્વૃત્ય મઙ્ગલં કર્મ પ્રાપયન્દમ્પતી ગૃહમ્ ॥ ૧૬॥

કૃત્વા જયધ્વનિં ચક્રુર્ગ્રન્થિનિર્મોચનાદિકમ્ ।
સસ્મિતાસ્સકટાક્ષાશ્ચ પુલકાઞ્ચિતવિગ્રહાઃ ॥ ૧૭॥

વાસગેહં સમ્પ્રવિશ્ય મુમુહુઃ કામિનીવરાઃ ।
પ્રશંસન્ત્યઃ સ્વભાગ્યાનિ પશ્યન્ત્યઃ પરમેશ્વરમ્ ॥ ૧૮॥

મહાસુરૂપવેષં ચ સર્વલાવણ્યસંયુતમ્ ।
નવીનયૌવનસ્થં ચ કામનીચિત્તમોહનમ્ ॥ ૧૯॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યં સકટાક્ષં સુસુન્દરમ્ ।
સુસૂક્ષ્મવાસો બિભ્રાણં નાનારત્નવિભૂષિતમ્ ॥ ૨૦॥

તદાનીં દિવ્યનાર્યશ્ચ ષોડશારં સમાયયુઃ ।
તૌ દમ્પતી ચ સન્દ્રષ્ટું મહાદરપુરસ્સરમ્ ॥ ૨૧॥

સરસ્વતી ચ લક્ષ્મીશ્ચ સાવિત્રી જાહ્નવી તથા ।
અદિતિશ્ચ શચી ચૈવ લોપામુદ્રાપ્યરુન્ધતી ॥ ૨૨॥

અહલ્યા તુલસી સ્વાહા રોહિણી ચ વસુન્ધરા ।
શતરૂપા ચ સંજ્ઞા ચ રતિરેતાઃ સુરસ્ત્રિયઃ ॥ ૨૩॥

દેવકન્યા નાગકન્યા મુનિકન્યા મનોહરાઃ ।
તત્ર યા યાઃ સ્થિતાસ્તાસાં સઙ્ખ્યાં કર્તું ચ કઃ ક્ષમઃ ॥ ૨૪॥

તાભી રત્નાસને દત્તે તત્રોવાસ શિવો મુદા ।
તમૂચુઃ ક્રમતો દેવ્યઃ સુહાસં મધુરં વચઃ ॥ ૨૫॥

સરસ્વત્યુવાચ ।
પ્રાપ્તા સતી મહાદેવાધુના પ્રાણાધિકા મુદા ।
દૃષ્ટ્વા પ્રિયાસ્યં ચન્દ્રાભં સન્તાપં ત્યજ કામુક ॥ ૨૬॥

કાલં ગમય કાલેશ સતીસંશ્લેષપૂર્વકમ્ ।
વિશ્લેષસ્તે ન ભવિતા સર્વકાલં સમાશ્રિતા ॥ ૨૭॥

લક્ષ્મીરુવાચ ।
લજ્જાં વિહાય દેવેશ સતીં કૃત્વા સ્વવક્ષસિ ।
તિષ્ઠ તાં પ્રતિ કા લજ્જા પ્રાણા યાન્તિ યયા વિના ॥ ૨૮॥

સાવિત્ર્યુવાચ ।
ભોજયિત્વા સતીં શમ્ભો શીઘ્રં ત્વં ભુઙ્ક્ષ્વ મા ખિદઃ ।
તદાચમ્ય સકર્પૂરં તામ્બૂલં દેહિ સાદરમ્ ॥ ૨૯॥

જાહ્નવ્યુવાચ ।
સ્વર્ણકાન્તિકરાં ધૃત્વા કેશાન્માર્જય યોષિતઃ ।
કામિન્યાઃ સ્વામિસૌભાગ્યસુખં નાતઃ પરં ભવેત્ ॥ ૩૦॥

અદિતિરુવાચ ।
ભોજનાન્તે શિવે શમ્ભું મુખશુદ્ધ્યર્થમાદરાત્ ।
જલં દેહિ મહાપ્રીત્યા દમ્પતિપ્રેમ દુર્લભમ્ ॥ ૩૧॥

શચ્યુવાચ ।
કૃત્વા વિલાપં યદ્ધેતોઃ શિવાં કૃત્વા ચ વક્ષસિ ।
યો બભ્રામાનિશં મોહાત્ કા લજ્જા તે પ્રિયાં પ્રતિ ॥ ૩૨॥

લોપામુદ્રોવાચ ।
વ્યવહારોઽસ્તિ ચ સ્ત્રીણાં ભુક્ત્વા વાસગૃહે શિવ ।
દત્ત્વા શિવાયૈ તામ્બૂલં શયનં કર્તુમર્હસિ ॥ ૩૩॥

અરુન્ધત્યુવાચ ।
મયા દત્તાં સતીમ્મેનાં તુભ્યં દાતુમનીપ્સિતા ।
વિવિધં બોધયિત્વેમાં સુરતિં કર્તુમર્હસિ ॥ ૩૪॥

અહલ્યોવાચ ।
વૃદ્ધાવસ્થાં પરિત્યજ્ય હ્યતીવ તરુણો ભવ ।
યેન મેનાનુમન્યેત ત્વાં સુતાર્પિતમાનસા ॥ ૩૫॥

તુલસ્યુવાચ ।
સતી ત્વયા પરિત્યક્તા કામો દગ્ધઃ પુરા કૃતઃ ।
કથં તદા વસિષ્ઠશ્ચ પ્રભો પ્રસ્થાપિતોઽધુના ॥ ૩૬॥

સ્વાહોવાચ ।
સ્થિરો ભવ મહાદેવ સ્ત્રીણાં વચસિ સામ્પ્રતમ્ ।
વિવાહે વ્યવહારોઽસ્તિ પુરન્ધ્રીણાં પ્રગલ્ભતા ॥ ૩૭॥

રોહિણ્યુવાચ ।
કામં પૂરય પાર્વત્યાઃ કામશાસ્ત્રવિશારદ ।
કુરુ પારં સ્વયં કામી કામિનીકામસાગરમ્ ॥ ૩૮॥

વસુન્ધરોવાચ ।
જાનાસિ ભાવં ભાવજ્ઞ કામાર્તાનાં ચ યોષિતામ્ ।
ન ચ સ્વં સ્વામિનં શમ્ભો ઈશ્વરં પાતિ સન્તતમ્ ॥ ૩૯॥

શતરૂપોવાચ ।
ભોગં દિવ્યં વિના ભુક્ત્વા ન હિ તુષ્યેત્ક્ષુધાતુરઃ ।
યેન તુષ્ટિર્ભવેચ્છમ્ભો તત્કર્તુમુચિતં સ્ત્રિયાઃ ॥ ૪૦॥

સંજ્ઞોવાચ ।
તૂર્ણં પ્રસ્થાપય પ્રીત્યા પાર્વત્યા સહ શઙ્કરમ્ ।

રત્નપ્રદીપં તામ્બૂલં તલ્પં નિર્માય નિર્જને ॥ ૪૧॥

બ્રહ્મોવાચ ।
સ્ત્રીણાં તદ્વચનં શ્રુત્વા તા ઉવાચ શિવઃ સ્વયમ્ ।
નિર્વિકારશ્ચ ભગવાન્યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૪૨॥

શઙ્કર ઉવાચ ।
દેવ્યો ન બ્રૂત વચનમેવમ્ભૂતં મમાન્તિકમ્ ।
જગતાં માતરઃ સાધ્વ્યઃ પુત્રે ચપલતા કથમ્ ॥ ૪૩॥

બ્રહ્મોવાચ ।
શઙ્કરસ્ય વચઃ શ્રુત્વા લજ્જિતાઃ સુરયોષિતઃ ।
બભૂવુઃ સમ્ભ્રમાત્તૂષ્ણીં ચિત્રપુત્તલિકા યથા ॥ ૪૪॥

ભુક્ત્વા મિષ્ટાન્નમાચમ્ય મહેશો હૃષ્ટમાનસઃ ।
સકર્પૂરં ચ તામ્બૂલં બુભુજે ભાર્યયા સહ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીય પાર્વતીખણ્ડે પરિહાસવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૧. એકપઞ્ચાશત્તમોઽધ્યાયઃ । શિવાજ્ઞયાકામસઞ્જીવનપ્રકારકથનમ્ ।

બ્રહ્મોવાચ ।
તસ્મિન્નવસરે જ્ઞાત્વાનુકૂલં સમયં રતિઃ ।
સુપ્રસન્ના ચ તં પ્રાહ શઙ્કરં દીનવત્સલમ્ ॥ ૧॥

રતિરુવાચ ।
ગૃહીત્વા પાર્વતીં પ્રાપ્તં સૌભાગ્યમતિદુર્લભમ્ ।
કિમર્થં પ્રાણનાથો મે નિસ્સ્વાર્થં ભસ્મસાત્કૃતઃ ॥ ૨॥

જીવયાત્ર પતિં મે હિ કામવ્યાપારમાત્મનિ ।
કુરુ દૂરં ચ સન્તાપં સમવિશ્લેષહેતુકમ્ ॥ ૩॥

વિવાહોત્સવ એતસ્મિન્ સુખિનો નિખિલા જનાઃ ।
અહમેકા મહેશાન દુઃખિની સ્વપતિં વિના ॥ ૪॥

સનાથાં કુરુ માં દેવ પ્રસન્નો ભવ શઙ્કર ।
સ્વોક્તં સત્યં વિધેહિ ત્વં દીનબન્ધો પર પ્રભો ॥ ૫॥

ત્વાં વિના કઃ સમર્થોઽત્ર ત્રૈલોક્યે સચરાચરે ।
નાશને મમ દુઃખસ્ય જ્ઞાત્વેતિ કરુણાં કુરુ ॥ ૬॥

સોત્સવે સ્વવિવાહેઽસ્મિન્સર્વાનન્દપ્રદાયિની ।
સોત્સવામપિ માં નાથ કુરુ દીનકૃપાકર ॥ ૭॥

જીવિતે મમ નાથે હિ પાર્વત્યા પ્રિયયા સહ ।
સુવિહારઃ પ્રપૂર્ણશ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૮॥

સર્વં કર્તું સમર્થોઽસિ યતસ્ત્વં પરમેશ્વરઃ ।
કિં બહૂક્ત્યાત્ર સર્વેશ જીવયાશુ પતિં મમ ॥ ૯॥

બ્રહ્મોવાચ ।
તદિત્યુક્ત્વા કામભસ્મ દદૌ સગ્રન્થિબન્ધનમ્ ।
રુદોદ પુરતઃ શમ્ભોર્નાથ નાથેત્યુદીર્ય ચ ॥ ૧૦॥

રતિરોદનમાકર્ણ્ય સરસ્વત્યાદયઃ સ્ત્રિયઃ ।
રુરુદુઃ સકલા દેવ્યઃ પ્રોચુર્દીનતરં વચઃ ॥ ૧૧॥

દેવ્ય ઊચુઃ ।
ભક્તવત્સલનામા ત્વં દીનબન્ધુર્દયાનિધિઃ ॥

કામં જીવય સોત્સાહાં રતિં કુરુ નમોઽસ્તુ તે ॥ ૧૨॥

બ્રહ્મોવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા પ્રસન્નોઽભૂન્મહેશ્વરઃ ।
કૃપાદૃષ્ટિં ચકારાશુ કરુણાસાગરઃ પ્રભુઃ ॥ ૧૩॥

સુધાદૃષ્ટ્યા શૂલભૃતો ભસ્મતો નિર્ગતઃ સ્મરઃ ।
તદ્રૂપવેષચિહ્નાત્મા સુન્દરોઽદ્ભુતમૂર્તિમાન્ ॥ ૧૪॥

તદ્રૂપશ્ચ તદાકારં સસ્મિતં સધનુશરમ્ ।
દૃષ્ટ્વા પતિં રતિસ્તં ચ પ્રણનામ મહેશ્વરમ્ ॥ ૧૫॥

કૃતાર્થાભૂચ્છિવં દેવં તુષ્ટાવ ચ કૃતાઞ્જલિઃ ।

પ્રાણનાથપ્રદં પત્યા જીવિતેન પુનઃ પુનઃ ॥ ૧૬॥

કામસ્ય સ્તુતિમાકર્ણ્ય સનારીકસ્ય શઙ્કરઃ ।
પ્રસન્નોઽભવદત્યન્તમુવાચ કરુણાર્દ્રધીઃ ॥ ૧૭॥

શઙ્કર ઉવાચ ।
પ્રસન્નોઽહં તવ સ્તુત્યા સનારીકસ્ય ચિત્તજ ।
સ્વયમ્ભવ વરં બ્રૂહિ વાઞ્છિતં તદ્ દદામિ તે ॥ ૧૮॥

બ્રહ્મોવાચ ।
ઇતિ શમ્ભુવચઃ શ્રુત્વા મહાનન્દઃ સ્મરસ્તતઃ ।
ઉવાચ સાઞ્જલિર્નમ્રો ગદ્ગદાક્ષરયા ગિરા ॥ ૧૯॥

કામ ઉવાચ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
યદિ પ્રસન્નઃ સર્વેશ મમાનન્દકરો ભવ ॥ ૨૦॥

ક્ષમસ્વ મેઽપરાધં હિ યત્કૃતશ્ચ પુરા પ્રભો ।
સ્વજનેષુ પરાં પ્રીતિં ભક્તિં દેહિ સ્વપાદયોઃ ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય સ્મરવચઃ પ્રસન્નઃ પરમેશ્વરઃ ।
ઓમિત્યુક્ત્વાબ્રવીત્તં વૈ વિહસન્કરુણાનિધિઃ ॥ ૨૨॥

ઈશ્વર ઉવાચ ।
હે કામાહં પ્રસન્નોઽસ્મિ ભયં ત્યજ મહામતે ।
ગચ્છ વિષ્ણુસમીપં ચ બહિઃસ્થાને સ્થિતો ભવ ॥ ૨૩॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા શિરસા નત્વા પરિક્રમ્ય સ્તુવન્વિભુમ્ ।
બહિર્ગત્વા હરિન્દેવાન્ પ્રણમ્ય સમુપાસ્ત સઃ ॥ ૨૪॥

કામં સમ્ભાષ્ય દેવાશ્ચ દદુસ્તસ્મૈ શુભાશિષમ્ ।
વિષ્ણ્વાદયઃ પ્રસન્નાસ્તે પ્રોચુઃ સ્મૃત્વા શિવં હૃદિ ॥ ૨૫॥

દેવા ઊચુઃ ।
ધન્યસ્ત્વં સ્મર સન્દગ્ધઃ શિવેનાનુગ્રહીકૃતઃ ।
જીવયામાસ સત્ત્વાંશકૃપાદૃષ્ટ્યાખિલેશ્વરઃ ॥ ૨૬॥

સુખદુઃખદો ન ચાન્યોઽસ્તિ યતઃ સ્વકૃતભુક્ પુમાન્ ।
કાલે રક્ષા વિવાહશ્ચ નિષેકઃ કેન વાર્યતે ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા તે ચ સમ્માન્ય તં સુખેનામરાસ્તદા ।
સન્તસ્થુસ્તત્ર વિષ્ણ્વાદ્યાઃ સર્વે લબ્ધમનોરથાઃ ॥ ૨૮॥

સોઽપિ પ્રમુદિતસ્તત્ર સમુવાસ શિવાજ્ઞયા ।
જયશબ્દો નમઃ શબ્દઃ સાધુશબ્દો બભૂવ હ ॥ ૨૯॥

તતઃ શમ્ભુર્વાસગેહે વામે સંસ્થાપ્ય પાર્વતીમ્ ।
મિષ્ટાન્નં ભોજયામાસ તં ચ સા ચ મુદાન્વિતા ॥ ૩૦॥

અથ શમ્ભુર્ભવાચારી તત્ર કૃત્યં વિધાય તત્ ।
મેનામામન્ત્ર્ય શૈલં ચ જનવાસં જગામ સઃ ॥ ૩૧॥

મહોત્સવસ્તદા ચાસીદ્ વેદધ્વનિરભૂન્મુને ।
વાદ્યાનિ વાદયામાસુર્જનાશ્ચતુર્વિધાનિ ચ ॥ ૩૨॥

શમ્ભુરાગત્ય સ્વસ્થાનં વવન્દે ચ મુનીંસ્તદા ।
હરિં ચ માં ભવાચારાદ્વન્દિતોઽભૂત્સુરાદિભિઃ ॥ ૩૩॥

જયશબ્દો બભૂવાથ નમશ્શબ્દસ્તથૈવ ચ ।
વેદધ્વનિશ્ચ શુભદઃ સર્વવિઘ્નવિદારણઃ ॥ ૩૪॥

અથ વિષ્ણુરહં શક્રઃ સર્વે દેવાશ્ચ સર્ષયઃ ।
સિદ્ધા ઉપસુરા નાગાસ્તુષ્ટુવુસ્તે પૃથક્પૃથક્ ॥ ૩૫॥

દેવા ઊચુઃ ।
જય શમ્ભોઽખિલાધાર જય નામ મહેશ્વર ।
જય રુદ્ર મહાદેવ જય વિશ્વમ્ભર પ્રભો ॥ ૩૬॥

જય કાલીપતે સ્વામિન્ જયાનન્દપ્રવર્ધક ।
જય ત્ર્યમ્બક સર્વેશ જય માયાપતે વિભો ॥ ૩૭॥

જય નિર્ગુણ નિષ્કામ કારણાતીત સર્વગ ।
જય લીલાખિલાધાર ધૃતરૂપ નમોઽસ્તુ તે ॥ ૩૮॥

જય સ્વભક્તસત્કામપ્રદેશ કરુણાકર ।
જય સાનન્દસદ્રૂપ જય માયાગુણાકૃતે ॥ ૩૯॥

જયોગ્ર મૃડ સર્વાત્મન્ દીનબન્ધો દયાનિધે ।
જયાવિકાર માયેશ વાઙ્મનોઽતીતવિગ્રહ ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુત્વા મહેશાનં ગિરિજાનાયકં પ્રભુમ્ ।
સિષેવિરે પરપ્રીત્યા વિષ્ણ્વાદ્યાસ્તે યથોચિતમ્ ॥ ૪૧॥

અથ શમ્ભુર્મહેશાનો લીલાત્તતનુરીશ્વરઃ ।
દદૌ માનવરં તેષાં સર્વેષાં તત્ર નારદ ॥ ૪૨॥

વિષ્ણ્વાદ્યાસ્તેઽખિલાસ્તાત પ્રાપ્યાજ્ઞાં પરમેશિતુઃ ।
અતિહૃષ્ટાઃ પ્રસન્નાસ્યાઃ સ્વસ્થાનં જગ્મુરાદૃતાઃ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે બ્રહ્મનારદસંવાદે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે કામસઞ્જીવનવર્ણનં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૨. દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ । હિમાલયગૃહેવરપક્ષીયભોજનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ શૈલવરસ્તાત હિમવાન્ભાગ્યસત્તમઃ ।
પ્રાઙ્ગણં રચયામાસ ભોજનાર્થં વિચક્ષણઃ ॥ ૧॥

માર્જનં લેપનં સમ્યક્કારયામાસ તસ્ય સઃ ।
સ સુગન્ધૈરલઞ્ચક્રે નાનાવસ્તુભિરાદરાત્ ॥ ૨॥

અથ શૈલઃ સુરાન્ સર્વાનન્યાનપિ ચ સેશ્વરાન્ ।
ભોજનાયાહ્વયામાસ પુત્રૈઃ શૈલૈઃ પરૈરપિ ॥ ૩॥

શૈલાહ્વાનમથાકર્ણ્ય સ પ્રભુઃ સાચ્યુતો મુને ।
સર્વૈઃસુરાદિભિસ્તત્ર ભોજનાય યયૌ મુદા ॥ ૪॥

ગિરિઃ પ્રભું ચ સર્વાંસ્તાન્ સુસત્કૃત્ય યથાવિધિ ।
મુદોપવેશયામાસ સત્પીઠેષુ ગૃહાન્તરે ॥ ૫॥

નાનાસુભોજ્યવસ્તૂનિ પરિવેષ્ય ચ તત્પુનઃ ।
સાઞ્ચલિર્ભોજનાયાજ્ઞાં ચક્રે વિજ્ઞપ્તિમાનતઃ ॥ ૬॥

અથ સમ્માનિતાસ્તત્ર દેવા વિષ્ણુપુરોગમાઃ ।
સદાશિવં પુરસ્કૃત્ય બુભુજુઃ સકલાશ્ચ તે ॥ ૭॥

તદા સર્વે હિ મિલિતા ઐકપદ્યેન સર્વશઃ ।
પઙ્ક્તિભૂતાશ્ચ બુભુજુર્વિહસન્તઃ પૃથક્પૃથક્ ॥ ૮॥

નન્દિભૃઙ્ગિવીરભદ્રવીરભદ્રગણાઃ પૃથક્ ।
બુભુજુસ્તે મહાભાગાઃ કુતૂહલસમન્વિતાઃ ॥ ૯॥

દેવાઃ સેન્દ્રા લોકપાલા નાનાશોભાસમન્વિતાઃ ।
બુભુજુસ્તે મહાભાગા નાનાહાસ્યરસૈસ્સહ ॥ ૧૦॥

સર્વે ચ મુનયો વિપ્રા ભૃગ્વાદ્યા ઋષયસ્તથા ।
બુભુજુઃ પ્રીતિતઃ સર્વે પૃથક્ પઙ્ક્તિગતાસ્તદા ॥ ૧૧॥

તથા ચણ્ડીગણાઃ સર્વે બુભુજુઃ કૃતભોજનાઃ ।
કુતૂહલં પ્રકુર્વન્તો નાનાહાસ્યકરા મુદા ॥ ૧૨॥

એવં તે ભુક્તવન્તશ્ચાચમ્ય સર્વે મુદાન્વિતાઃ ।
વિશ્રામાર્થં ગતાઃ પ્રીત્યા વિષ્ણ્વાદ્યાઃ સ્વં સ્વમાશ્રમમ્ ॥ ૧૩॥

મેનાજ્ઞયા સ્ત્રિયઃ સાધ્વ્યઃ શિવં સમ્પ્રાર્થ્ય ભક્તિતઃ ।
ગેહે નિવાસયામાસુર્વાસાખ્યે પરમોત્સવે ॥ ૧૪॥

રત્નસિંહાસને શમ્ભુઃ મેનાદત્તે મનોહરે ।
સન્નિધાય મુદા યુક્તો દદૃશે વાસમન્દિરમ્ ॥ ૧૫॥

રત્નપ્રદીપશતકૈર્જ્વલદ્ભિર્જ્વલિતં શ્રિયા ।
રત્નપાત્રઘટાકીર્ણં મુક્તામણિવિરાજિતમ્ ॥ ૧૬॥

રત્નદર્પણશોભાઢ્યં મણ્ડિતં શ્વેતચામરૈઃ ।
મુક્તામણિસુમાલાભિર્વેષ્ટિતં પરમર્દ્ધિમત્ ॥ ૧૭॥

અનૌપમ્યં મહાદિવ્યં વિચિત્રં સુમનોહરમ્ ।
ચિત્તાહ્લાદકરં નાનારચનારચિતસ્થલમ્ ॥ ૧૮॥

શિવદત્તવરસ્યૈવ પ્રભાવમતુલં પરમ્ ।
દર્શયન્તં સમુલ્લાસિ શિવલોકાભિધાનકમ્ ॥ ૧૯॥

નાનાસુગન્ધસદ્દ્રવ્યૈર્વાસિતં સુપ્રકાશકમ્ ।
ચન્દનાગરુસંયુક્તં પુષ્પશય્યાસમન્વિતમ્ ॥ ૨૦॥

નાનાચિત્રવિચિત્રાઢ્યં નિર્મિતં વિશ્વકર્મણા ।
રત્નેન્દ્રસારરચિતૈરાચિતં હારકૈર્વરૈઃ ॥ ૨૧॥

કુત્રચિત્સુરનિર્માણં વૈકુણ્ઠં સુમનોહરમ્ ।
કુત્રચિચ્ચ બ્રહ્મલોકં લોકપાલપુરં ક્વચિત્ ॥ ૨૨॥

કૈલાસં કુત્રચિદ્રમ્યં કુત્રચિચ્છક્રમન્દિરમ્ ।
કુત્રચિચ્છિવલોકં ચ સર્વોપરિ વિરાજિતમ્ ॥ ૨૩॥

એતાદૃશં ગૃહં સર્વં દૃષ્ટ્વાશ્ચર્યં મહેશ્વરઃ ।
પ્રશંસન્ હિમશૈલેશં પરિતુષ્ટો બભૂવ હ ॥ ૨૪॥

તત્રાતિરમણીયે ચ રત્નપર્યઙ્ક ઉત્તમે ।
અશયિષ્ટ મુદા યુક્તો લીલયા પરમેશ્વરઃ ॥ ૨૫॥

હિમાચલશ્ચ સ્વભ્રાતૄન્ભોજયામાસ કૃત્સ્નશઃ ।
સર્વાનન્યાંશ્ચ સુપ્રીત્યા શેષકૃત્યં ચકાર હ ॥ ૨૬॥

એવં કુર્વતિ શૈલેશે સ્વપિતિ પ્રેષ્ઠ ઈશ્વરે ।
વ્યતીતા રજની સર્વા પ્રાતઃકાલો બભૂવ હ ॥ ૨૭॥

અથ પ્રભાતકાલે ચ ધૃત્યુત્સાહપરાયણાઃ ।
નાનાપ્રકારવાદ્યાનિ વાદયાઞ્ચક્રિરે જનાઃ ॥ ૨૮॥

સર્વે સુરાઃસમુત્તસ્થુર્વિષ્ણ્વાદ્યાઃ સુમુદાન્વિતાઃ ।
સ્વેષ્ટં સંસ્મૃત્ય દેવેશં સજ્જીભૂતાઃ સસમ્ભ્રમાઃ ॥ ૨૯॥

સ્વવાહનાનિ સજ્જાનિ કૈલાસં ગન્તુમુત્સુકાઃ ।
કૃત્વા સમ્પ્રેષયામાસુર્ધર્મં શિવસમીપતઃ ॥ ૩૦॥

વાસગેહમથાગત્ય ધર્મો નારાયણાજ્ઞયા ।
ઉવાચ શઙ્કરં યોગી યોગીશં સમયોચિતમ્ ॥ ૩૧॥

ધર્મ ઉવાચ ।
ઉત્તિષ્ઠોત્તિષ્ઠ ભદ્રં તે ભવ નઃ પ્રમથાધિપ ।
જનાવાસં સમાગચ્છ કૃતાર્થં કુરુ તત્ર તાન્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇતિ ધર્મવચઃ શ્રુત્વા વિજહાસ મહેશ્વરઃ ।
દદર્શ કૃપયા દૃષ્ટ્યા તલ્પમુજ્ઝાઞ્ચકાર હ ॥ ૩૩॥

ઉવાચ વિહસન્ ધર્મં ત્વમગ્રે ગચ્છ તત્ર હ ।
અહમપ્યાગમિષ્યામિ દ્રુતમેવ ન સંશયઃ ॥ ૩૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્તઃ શઙ્કરેણાથ જનાવાસં જગામ સઃ ।
સ્વયં ગન્તુમના આસીત્તત્ર શમ્ભુરપિ પ્રભુઃ ॥ ૩૫॥

તજ્જ્ઞાત્વા સ્ત્રીગણઃ સોઽસૌ તત્રાગચ્છન્મહોત્સવઃ ।
ચક્રે મઙ્ગલગાનં હિ પશ્યન્ શમ્ભુપદદ્વયમ્ ॥ ૩૬॥

અથ શમ્ભુર્ભવાચારી પ્રાતઃકૃત્યં વિધાય ચ ।
મેનામામન્ત્ર્ય કુધ્રં ચ જનાવાસં જગામ સઃ ॥ ૩૭॥

મહોત્સવસ્તદા ચાસીદ્વેદધ્વનિરભૂન્મુને ।
વાદ્યાનિ વાદયામાસુર્જનાશ્ચાતુર્વિધાનિ ચ ॥ ૩૮॥

શમ્ભુરાગત્ય સ્વસ્થાનં વવન્દે ચ મુનીંસ્તદા ।
હરિં ચ માં ભવાચારાત્ વન્દિતોઽભૂત્સુરાદિભિઃ ॥ ૩૯॥

જયશબ્દો બભૂવાથ નમઃ શબ્દસ્તથૈવ ચ ।
વેદધ્વનિશ્ચ શુભદો મહાકોલાહલોઽભવત્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે વરવર્ગભોજનશિવશયનવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૩. ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ । વધૂવરયોઃ યાત્રાપ્રસ્થાનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ વિષ્ણ્વાદયો દેવા મુનયશ્ચ તપોધનાઃ ।

કૃત્વાવશ્યકકર્માણિ યાત્રાં સન્તેનિરે ગિરેઃ ॥ ૧॥

તતો ગિરિવરઃ સ્નાત્વા સ્વેષ્ટં સમ્પૂજ્ય યત્નતઃ ।
પૌરબન્ધૂન્સમાહૂય જનવાસં યયૌ મુદા ॥ ૨॥

તત્ર પ્રભું પ્રપૂજ્યાથ ચક્રે સમ્પ્રાર્થનાં મુદા ।
કિયદ્દિનાનિ સન્તિષ્ઠ મદ્ગેહે સકલૈઃ સહ ॥ ૩॥

વિલોકનેન તે શમ્ભો કૃતાર્થોઽહં ન સંશયઃ ।
ધન્યશ્ચ યસ્ય મદ્ગેહે આયાતોઽસિ સુરૈઃ સહ ॥ ૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા બહુ શૈલેશઃ કરૌ બદ્ધ્વા પ્રણમ્ય ચ ।
પ્રભું નિમન્ત્રયામાસ સહ વિષ્ણુસુરાદિભિઃ ॥ ૫॥

અથ તે મનસા ગત્વા શિવ સંયુતમાદરાત્ ।
પ્રત્યૂચુર્મુનયો દેવા હૃષ્ટા વિષ્ણુસુરાદિભિઃ ॥ ૬॥

દેવા ઊચુઃ ।
ધન્યસ્ત્વં ગિરિશાર્દૂલ તવ કીર્તિર્મહીયસી ।
ત્વત્સમો ન ત્રિલોકેષુ કોઽપિ પુણ્યતમો જનઃ ॥ ૭॥

યસ્ય દ્વારિ મહેશાનઃ પરબ્રહ્મ સતાં ગતિઃ ।
સમાગતઃ સદાસૈશ્ચ કૃપયા ભક્તવત્સલઃ ॥ ૮॥

જનાવાસોઽતિરમ્યશ્ચ સમ્માનો વિવિધઃ કૃતઃ ।
ભોજનાનિ ત્વપૂર્વાણિ ન વર્ણ્યાનિ ગિરીશ્વર ॥ ૯॥

ચિત્રં ન ખલુ તત્રાસ્તિ યત્ર દેવી શિવામ્બિકા ।
પરિપૂર્ણમશેષં ચ વયં ધન્યા યદાગતાઃ ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇત્થં પરસ્પરં તત્ર પ્રશંસાભવદુત્તમા ।
ઉત્સવો વિવિધો જાતો વેદસાધુજયધ્વનિઃ ॥ ૧૧॥

અભૂન્મઙ્ગલગાનં ચ નનર્તાપ્સરસાઙ્ગણઃ ।
નુતિં ચક્રુર્માગધાદ્યા દ્રવ્યદાનમભૂદ્ બહુ ॥ ૧૨॥

તત આમન્ત્ર્ય દેવેશં સ્વગેહમગમદ્ગિરિઃ ।
ભોજનોત્સવમારેભે નાનાવિધિવિધાનતઃ ॥ ૧૩॥

ભોજનાર્થં પ્રભું પ્રીત્યાનયામાસ યથોચિતમ્ ।
પરિવારસમેતં ચ સકુતૂહલમીશ્વરમ્ ॥ ૧૪॥

પ્રક્ષાલ્ય ચરણૌ શમ્ભોર્વિષ્ણોર્મમ વરાદરાત્ ।
સર્વેષામમરાણાં ચ મુનીનાં ચ યથાર્થતઃ ॥ ૧૫॥

પરેષાં ચ ગતાનાં ચ ગિરીશો મણ્ડપાન્તરે ।
આસયામાસ સુપ્રીત્યા તાંસ્તાન્બન્ધુભિરન્વિતઃ ॥ ૧૬॥

સુરસૈર્વિવિધાન્નૈશ્ચ તર્પયામાસ તાન્ ગિરિઃ ।
બુભુજુર્નિખિલાસ્તે વૈ શમ્ભુના વિષ્ણુના મયા ॥ ૧૭॥

તદાનીં પુરનાર્યશ્ચ ગાલીદાનં વ્યધુર્મુદા ।
મૃદુવાણ્યા હસન્ત્યશ્ચ પશ્યન્ત્યો યત્નતશ્ચ તાન્ ॥ ૧૮॥

તે ભુક્ત્વાચમ્ય વિધિવદ્ગિરિમામન્ત્ર્ય નારદ ।
સ્વસ્થાનં પ્રયયુઃ સર્વે મુદિતાસ્તૃપ્તિમાગતાઃ ॥ ૧૯॥

ઇત્થં તૃતીયે ઘસ્રેઽપિ માનિતાસ્તેઽભવન્મુને ।
ગિરીશ્વરેણ વિધિવદ્દાનમાનાદરાદિભિઃ ॥ ૨૦॥

ચતુર્થે દિવસે પ્રાપ્તે ચતુર્થીકર્મ શુદ્ધિતઃ ।
બભૂવ વિધિવદ્યેન વિના ખણ્ડિત એવ સઃ ॥ ૨૧॥

ઉત્સવો વિવિધશ્ચાસીત્સાધુવાદજયધ્વનિઃ ।
બહુદાનં સુગાનં ચ નર્તનં વિવિધં તથા ॥ ૨૨॥

પઞ્ચમે દિવસે પ્રાપ્તે સર્વે દેવા મુદાન્વિતાઃ ।
વિજ્ઞપ્તિં ચક્રિરે શૈલં યાત્રાર્થમતિપ્રેમતઃ ॥ ૨૩॥

તદાકર્ણ્ય ગિરીશશ્ચોવાચ દેવાન્ કૃતાઞ્જલિઃ ।
કિયદ્દિનાનિ તિષ્ઠન્તુ કૃપાં કુર્વન્તુ માં સુરાઃ ॥ ૨૪॥

ઇત્યુક્ત્વા સ્નેહતસ્તાઁશ્ચ પ્રભું વિષ્ણું ચ માં પરાન્ ।
વાસયામાસ દિવસાન્ બહૂન્નિત્યં સમાદરાત્ ॥ ૨૫॥

ઇત્થં વ્યતીયુર્દિવસા બહવો વસતાં ચ તત્ ।
સપ્તર્ષીન્પ્રેષયામાસુર્ગિરીશાન્તે તતઃ સુરાઃ ॥ ૨૬॥

તે તં સમ્બોધયામાસુર્મેનાં ચ સમયોચિતમ્ ।
શિવતત્ત્વં પરં પ્રોચુઃ પ્રશંસન્વિધિવન્મુદા ॥ ૨૭॥

અઙ્ગીકૃતં ગિરીશેન તત્તદ્બોધનતો મુને ।
યાત્રાર્થમગમચ્છમ્ભુઃ શૈલેશં સામરાદિકઃ ॥ ૨૮॥

યાત્રાં કુર્વતિ દેવેશે સ્વશૈલં સામરે શિવે ।
ઉચ્ચૈઃ રુદોદ સા મેના તમુવાચ કૃપાનિધિમ્ ॥ ૨૯॥

મેનોવાચ ।
કૃપાનિધે કૃપાં કૃત્વા શિવાં સમ્પાલયિષ્યસિ ।
સહસ્રદોષં પાર્વત્યા આશુતોષઃ ક્ષમિષ્યસિ ॥ ૩૦॥

ત્વત્પાદામ્બુજભક્તા ચ મદ્વત્સા જન્મજન્મનિ ।
સ્વપ્ને જ્ઞાને સ્મૃતિર્નાસ્તિ મહાદેવં પ્રભું વિના ॥ ૩૧॥

ત્વદ્ભક્તિશ્રુતિમાત્રેણ હર્ષાશ્રુપુલકાન્વિતા ।
ત્વન્નિન્દયા ભવેન્મૌના મૃત્યુઞ્જય મૃતા ઇવ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા મેનકા તસ્મૈ સમર્પ્ય સ્વસુતાં તદા ।
અત્યુચ્ચૈ રોદનં કૃત્વા મૂર્ચ્છામાપ તયોઃ પુરઃ ॥ ૩૩॥

અથ મેનાં બોધયિત્વા તામામન્ત્ર્ય ગિરિં તથા ।
ચકાર યાત્રાં દેવૈશ્ચ મહોત્સવપુરસ્સરમ્ ॥ ૩૪॥

અથ તે નિર્જરાઃ સર્વે પ્રભુણા સ્વગણૈઃ સહ ।
યાત્રાં પ્રચક્રિરે તૂષ્ણીં ગિરિમ્પ્રતિ શિવં દધુઃ ॥ ૩૫॥

હિમાચલપુરીબાહ્યોપવને હર્ષિતાઃ સુરાઃ ।
સેશ્વરાઃ સોત્સવાસ્તસ્થુઃ પર્યૈષન્ત શિવાગમમ્ ॥ ૩૬॥

ઇત્યુક્તા શિવસદ્યાત્રા દેવૈસ્સહ મુનીશ્વર ।
આકર્ણય શિવયાત્રાં વિરહોત્સવસંયુતામ્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવયાત્રાવર્ણનં નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૪. ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ । પતિવ્રતાધર્મવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ સપ્તર્ષયસ્તે ચ પ્રોચુર્હિમગિરીશ્વરમ્ ।
કારય સ્વાત્મજાદેવ્યા યાત્રામદ્યોચિતાં ગિરે ॥ ૧॥

ઇતિ શ્રુત્વા ગિરીશો હિ બુદ્ધ્વા તદ્વિરહં પરમ્ ।
વિષણ્ણોઽભૂન્મહાપ્રેમ્ણા કિયત્કાલં મુનીશ્વર ॥ ૨॥

કિયત્કાલેન સમ્પ્રાપ્ય ચેતનાં શૈલરાટ્ તતઃ ।
તથાસ્ત્વિતિ ગિરામુક્ત્વા મેનાં સન્દેશમબ્રવીત્ ॥ ૩॥

શૈલસન્દેશમાકર્ણ્ય હર્ષશોકવશા મુને ।
મેના સંયાપયામાસ કર્તુમાસીત્સમુદ્યતા ॥ ૪॥

શ્રુતિસ્વકુલજાચારં ચચાર વિધિવન્મુને ।
ઉત્સવં વિવિધં તત્ર સા મેના ક્ષિતિભૃત્પ્રિયા ॥ ૫॥

ગિરિજાં ભૂષયામાસ નાનારત્નાંશુકૈર્વરૈઃ ।
દ્વાદશાભરણૈશ્ચૈવ શ‍ૃઙ્ગારૈર્નૃપસમ્મિતૈઃ ॥ ૬॥

મેનામનોગતિં બુદ્ધ્વા સાધ્વ્યેકા દ્વિજકામિની ।
ગિરિજાં શિક્ષયામાસ પાતિવ્રત્યવ્રતં પરમ્ ॥ ૭॥

દ્વિજપત્ન્યુવાચ ।
ગિરિજે શ‍ૃણુ સુપ્રીત્યા મદ્વચો ધર્મવર્ધનમ્ ।
ઇહામુત્રાનન્દકરં શ‍ૃણ્વતાં ચ સુખપ્રદમ્ ॥ ૮॥

ધન્યા પતિવ્રતા નારી નાન્યા પૂજ્યા વિશેષતઃ ।
પાવની સર્વલોકાનાં સર્વપાપૌઘનાશિની ॥ ૯॥

સેવતે યા પતિં પ્રેમ્ણા પરમેશ્વરવચ્છિવે ।
ઇહ ભુક્ત્વાખિલાન્ ભોગાનન્તે પત્યા શિવાં ગતિમ્ ॥ ૧૦॥

પતિવ્રતા ચ સાવિત્રી લોપામુદ્રા હ્યરુન્ધતી ।
શાણ્ડિલ્યા શતરૂપાનસૂયા લક્ષ્મીઃ સ્વધા સતી ॥ ૧૧॥

સંજ્ઞા ચ સુમતિઃ શ્રદ્ધા મેના સ્વાહા તથૈવ ચ ।

અન્યા બહ્વ્યોऽપિ સાધ્વ્યો હિ નોક્તા વિસ્તારજાદ્ભયાત્ ॥ ૧૨॥

પાતિવ્રત્યવૃષેણૈવ તા ગતાઃ સર્વપૂજ્યતામ્ ।
બ્રહ્મવિષ્ણુહરૈશ્ચાપિ માન્યા જાતા મુનીશ્વરૈઃ ॥ ૧૩॥

સેવ્યસ્ત્વયા પતિસ્તસ્માત્સર્વદા શઙ્કરઃ પ્રભુઃ ।
દીનાનુગ્રહકર્તા ચ સર્વસેવ્યઃ સતાં ગતિઃ ॥ ૧૪॥

મહાન્પતિવ્રતાધર્મઃ શ્રુતિસ્મૃતિષુ નોદિતઃ ।
યથૈષ વર્ણ્યતે શ્રેષ્ઠો ન તથાન્યોऽસ્તિ નિશ્ચિતમ્ ॥ ૧૫॥

ભુઞ્જ્યાદ્ભુક્તે પ્રિયે પત્યૌ પાતિવ્રત્યપરાયણા ।
તિષ્ઠેત્તસ્મિંસ્થિતે નારી સર્વથા સતિ તિષ્ઠતિ ॥ ૧૬॥

સ્વપ્યાત્સ્વપિતિ સા નિત્યં બુધ્યેત્તુ પ્રથમં સુધીઃ ।
સર્વદા તદ્ધિતં કુર્યાદકૈતવગતિઃ પ્રિયા ॥ ૧૭॥

અનલઙ્કૃતમાત્માનં દર્શયેન્ન ક્વચિચ્છિવે ।
કાર્યાર્થં પ્રોષિતે તસ્મિન્ ભવેન્મણ્ડનવર્જિતા ॥ ૧૮॥

પત્યુર્નામ ન ગૃહ્ણીયાત્ કદાચન પતિવ્રતા ।
આક્રુષ્ટાપિ ન ચાક્રોશેત્પ્રસીદેત્તાડિતાપિ ચ ॥

હન્યતામિતિ ચ બ્રૂયાત્સ્વામિન્નિતિ કૃપાં કુરુ । ૧૯॥

આહૂતા ગૃહકાર્યાણિ ત્યક્ત્વા ગચ્છેત્તદન્તિકમ્ ।
સત્વરં સાઞ્જલિઃ પ્રીત્યા સુપ્રણમ્ય વદેદિતિ ॥ ૨૦॥

કિમર્થં વ્યાહૃતા નાથ સ પ્રસાદો વિધીયતામ્ ।
તદાદિષ્ટા ચરેત્કર્મ સુપ્રસન્નેન ચેતસા ॥ ૨૧॥

ચિરં તિષ્ઠેન્ન ચ દ્વારે ગચ્છેન્નૈવ પરાલયે ।
આદાય તત્ત્વં યત્કિઞ્ચિત્કસ્મૈચિન્નાર્પયેત્ક્વચિત્ ॥ ૨૨॥

પૂજોપકરણં સર્વમનુક્તા સાધયેત્સ્વયમ્ ।
પ્રતીક્ષમાણાવસરં યથાકાલોચિતં હિતમ્ ॥ ૨૩॥

ન ગચ્છેત્તીર્થયાત્રાં વૈ પત્યાજ્ઞાં ન વિના ક્વચિત્ ।
દૂરતો વર્જયેત્સા હિ સમાજોત્સવદર્શનમ્ ॥ ૨૪॥

તીર્થાર્થિની તુ યા નારી પતિપાદોદકં પિબેત્ ।

તસ્મિન્સર્વાણિ તીર્થાનિ ક્ષેત્રાણિ ચ ન સંશયઃ ॥ ૨૫॥

ભુઞ્જયાત્સા ભર્તુરુચ્છિષ્ટમિષ્ટમન્નાદિકં ચ યત્ ।
મહાપ્રસાદ ઇત્યુક્ત્વા પતિદત્તં પતિવ્રતા ॥ ૨૬॥

અવિભજ્ય ન ચાશ્નીયાદ્દેવપિત્રતિથિષ્વપિ ।
પરિચારકવર્ગેષુ ગોષુ ભિક્ષુકુલેષુ ચ ॥ ૨૭॥

સંયતોપસ્કરા દક્ષા હૃષ્ટા વ્યયપરાઙ્મુખી ।
ભવેત્સા સર્વદા દેવી પતિવ્રતપરાયણા ॥ ૨૮॥

કુર્યાત્પત્યનનુજ્ઞાતા નોપવાસવ્રતાદિકમ્ ।
અન્યથા તત્ફલં નાસ્તિ પરત્ર નરકં વ્રજેત્ ॥ ૨૯॥

સુખપૂર્વં સુખાસીનં રમમાણં યદૃચ્છયા ।
આન્તરેષ્વપિ કાર્યેષુ પતિં નોત્થાપયેત્ક્વચિત્ ॥ ૩૦॥

ક્લીબં વા દુરવસ્થં વા વ્યાધિતં વૃદ્ધમેવ ચ ।
સુખિતં દુઃખિતં વાપિ પતિમેકં ન લઙ્ઘયેત્ ॥ ૩૧॥

સ્ત્રીધર્મિણી ત્રિરાત્રં ચ સ્વમુખં નૈવ દર્શયેત્ ।
સ્વવાક્યં શ્રાવયેન્નાપિ યાવત્સ્નાનાન્ન શુધ્યતિ ॥ ૩૨॥

સુસ્નાતા ભર્તૃવદનમીક્ષેતાન્યસ્ય ન ક્વચિત્ ।
અથવા મનસિ ધ્યાત્વા પતિં ભાનું વિલોકયેત્ ॥ ૩૩॥

હરિદ્રાકુઙ્કુમં ચૈવ સિન્દૂરં કજ્જલાદિકમ્ ।
કૂર્પાસકં ચ તામ્બૂલં માઙ્ગલ્યાભરણાદિકમ્ ॥ ૩૪॥

કેશસંસ્કારકબરીકરકર્ણાદિભૂષણમ્ ।
ભર્તુરાયુષ્યમિચ્છન્તી દૂરયેન્ન પતિવ્રતા ॥ ૩૫॥

ન રજક્યા ન બન્ધક્યા તથા શ્રમણયા ન ચ ।
ન ચ દુર્ભગયા ક્વાપિ સખિત્વં કારયેત્ ક્વચિત્ ॥ ૩૬॥

પતિવિદ્વેષિણીં નારીં ન સા સમ્ભાષયેત્ ક્વચિત્ ।
નૈકાકિની ક્વચિત્તિષ્ઠેન્નગ્ના સ્નાયાન્ન ચ ક્વચિત્ ॥ ૩૭॥

નોલૂખલે ન મુસલે ન વર્દ્ધન્યાં દૃષદ્યપિ ।
ન યન્ત્રકે ન દેહલ્યાં સતી ચ પ્રવસેત્ ક્વચિત્ ॥ ૩૮॥

વિના વ્યવાયસમયં પ્રાગલ્ભ્યં નાચરેત્ ક્વચિત્ ।
યત્ર યત્ર રુચિર્ભર્તુસ્તત્ર પ્રેમવતી ભવેત્ ॥ ૩૯॥

હૃષ્ટાહૃષ્ટે વિષણ્ણા સ્યાદ્વિષણ્ણાસ્યે પ્રિયે પ્રિયા ।
પતિવ્રતા ભવેદ્દેવી સદા પતિહિતૈષિણી ॥ ૪૦॥

એકરૂપા ભવેત્પુણ્યા સમ્પત્સુ ચ વિપત્સુ ચ ।
વિકૃતિં સ્વાત્મનઃ ક્વાપિ ન કુર્યાદ્ધૈર્યધારિણી ॥ ૪૧॥

સર્પિર્લવણતૈલાદિક્ષયેઽપિ ચ પતિવ્રતા ।
પતિં નાસ્તીતિ ન બ્રૂયાદાયાસેષુ ન યોજયેત્ ॥ ૪૨॥

વિધેર્વિષ્ણોર્હરાદ્વાપિ પતિરેકોઽધિકો મતઃ ।
પતિવ્રતાયા દેવેશિ સ્વપતિશ્શિવ એવ ચ ॥ ૪૩॥

વ્રતોપવાસનિયમં પતિમુલ્લઙ્ઘ્ય યાચરેત્ ।
આયુષ્યં હરતે ભર્તુર્મૃતા નિરયમૃચ્છતિ ॥ ૪૪॥

ઉક્તા પ્રત્યુત્તરં દદ્યાદ્યા નારી ક્રોધતત્પરા ।
સરમા જાયતે ગ્રામે શ઼ૃગાલી નિર્જને વને ॥ ૪૫॥

ઉચ્ચાસનં ન સેવેત ન વ્રજેદ્દુષ્ટસન્નિધૌ ।
ન ચ કાતરવાક્યાનિ વદેન્નારી પતિં ક્વચિત્ ॥ ૪૬॥

અપવાદં ન ચ બ્રૂયાત્કલહં દૂરતસ્ત્યજેત્ ।
ગુરૂણાં સન્નિધૌ ક્વાપિ નોચ્ચૈર્બ્રૂયાન્ન વૈ હસેત્ ॥ ૪૭॥

બાહ્યાદાયાન્તમાલોક્ય ત્વરિતાન્નજલાશનૈઃ ।
તામ્બૂલૈર્વસનૈશ્ચાપિ પાદસંવાહનાદિભિઃ ॥ ૪૮॥

તથૈવ ચાટુવચનૈઃ ખેદસન્નોદનૈઃ પરૈઃ ।
યા પ્રિયં પ્રીણયેત્પ્રીતા ત્રિલોકી પ્રીણિતા તયા ॥ ૪૯॥

મિતં દદાતિ જનકો મિતં ભ્રાતા મિતં સુતઃ ।
અમિતસ્ય હિ દાતારં ભર્તારં પૂજયેત્સદા ॥ ૫૦॥

ભર્તા દેવો ગુરુર્ભર્તા ધર્મતીર્થવ્રતાનિ ચ ।
તસ્માત્સર્વં પરિત્યજ્ય પતિમેકં સમર્ચયેત્ ॥ ૫૧॥

યા ભર્તારં પરિત્યજ્ય રહશ્ચરતિ દુર્મતિઃ ।
ઉલૂકી જાયતે ક્રૂરા વૃક્ષકોટરશાયિની ॥ ૫૨॥

તાડિતા તાડિતું ચેચ્છેત્સા વ્યાઘ્રી વૃષદંશિકા ।
કટાક્ષયતિ યાન્યં વૈ કેકરાક્ષી તુ સા ભવેત્ ॥ ૫૩॥

યા ભર્તારં પરિત્યજ્ય મિષ્ટમશ્નાતિ કેવલમ્ ।
ગ્રામે વા સૂકરી ભૂયાદ્વલ્ગુર્વાપિ સ્વવિડ્ભુજા ॥ ૫૪॥

યા તું કૃત્ય પ્રિયં બ્રૂયાન્ મૂકા સા જાયતે ખલુ ।
યા સપત્નીં સદેર્ષ્યેત દુર્ભગા સા પુનઃ પુનઃ ॥ ૫૫॥

દૃષ્ટિં વિલુપ્ય ભર્ત્તુર્યા કશ્ચિદન્યં સમીક્ષતે ।
કાણા ચ વિમુખી ચાપિ કુરૂપાપિ ચ જાયતે ॥ ૫૬॥

જીવહીનો યથા દેહઃ ક્ષણાદશુચિતાં વ્રજેત્ ।
ભર્તૃહીના તથા યોષિત્સુસ્નાતાપ્યશુચિઃ સદા ॥ ૫૭॥

સા ધન્યા જનની લોકે સ ધન્યો જનકઃ પિતા ।
ધન્યઃસ ચ પતિર્યસ્ય ગૃહે દેવી પતિવ્રતા ॥ ૫૮॥

પિતૃવંશ્યાઃ માતૃવંશ્યાઃ પતિવંશ્યાસ્ત્રયસ્ત્રયઃ ।
પતિવ્રતાયાઃ પુણ્યેન સ્વર્ગે સૌખ્યાનિ ભુઞ્જતે ॥ ૫૯॥

શીલભઙ્ગેન દુર્વૃત્તાઃ પાતયન્તિ કુલત્રયમ્ ।
પિતુર્માતુસ્તથા પત્યુરિહામુત્રાપિ દુઃખિતા ॥ ૬૦॥

પતિવ્રતાયાશ્ચરણો યત્ર યત્ર સ્પૃશેદ્ભુવમ્ ।
તત્ર તત્ર ભવેત્સા હિ પાપહન્ત્રી સુપાવની ॥ ૬૧॥

વિભુઃ પતિવ્રતાસ્પર્શં કુરુતે ભાનુમાનપિ ।
સોમો ગન્ધવહશ્ચાપિ સ્વપાવિત્ર્યાય નાન્યથા ॥ ૬૨॥

આપઃ પતિવ્રતાસ્પર્શમભિલષ્યન્તિ સર્વદા ।
અદ્ય જાડ્યવિનાશો નો જાતસ્ત્વદ્યાન્યપાવનાઃ ॥ ૬૩॥

ભાર્યા મૂલં ગૃહસ્થસ્ય ભાર્યા મૂલં સુખસ્ય ચ ।
ભાર્યા ધર્મફલાવાપ્ત્યૈ ભાર્યા સન્તાનવૃદ્ધયે ॥ ૬૪॥

ગૃહે ગૃહે ન કિં નાર્યો રૂપલાવણ્યગર્વિતાઃ ।
પરં વિશ્વેશભક્ત્યૈવ લભ્યતે સ્ત્રી પતિવ્રતા ॥ ૬૫॥

પરલોકસ્ત્વયં લોકો જીયતે ભાર્યયા દ્વયમ્ ।

દેવપિત્રતિથીજ્યાદિ નાભાર્યઃ કર્મ ચાર્હતિ ॥ ૬૬॥

ગૃહસ્થઃ સ હિ વિજ્ઞેયો યસ્ય ગેહે પતિવ્રતા ।
ગ્રસ્યતેઽન્યાન્પ્રતિદિનં રાક્ષસ્યા જરયા યથા ॥ ૬૭॥

યથા ગઙ્ગાવગાહેન શરીરં પાવનં ભવેત્ ।
તથા પતિવ્રતાં દૃષ્ટ્વા સકલં પાવનં ભવેત્ ॥ ૬૮॥

ન ગઙ્ગાયા તયા ભેદો યા નારી પતિદેવતા ।
ઉમાશિવસમૌ સાક્ષાત્તસ્માત્તૌ પૂજયેદ્બુધઃ ॥ ૬૯॥

તારઃ પતિઃ શ્રુતિર્નારી ક્ષમા સા સ સ્વયં તપઃ ।
ફલં પતિઃ સત્ક્રિયા સા ધન્યૌ તૌ દમ્પતી શિવે ॥ ૭૦॥

એવં પતિવ્રતાધર્મો વર્ણિતસ્તે ગિરીન્દ્રજે ।
તદ્ભેદાન્ શ઼ૃણુ સુપ્રીત્યા સાવધાનતયાદ્ય મે ॥ ૭૧॥

ચતુર્વિધાસ્તાઃ કથિતા નાર્યો દેવિ પતિવ્રતાઃ ।
ઉત્તમાદિવિભેદેન સ્મરતાં પાપહારિકાઃ ॥ ૭૨॥

ઉત્તમા મધ્યમા ચૈવ નિકૃષ્ટાતિનિકૃષ્ટિકા ।
બ્રુવે તાસાં લક્ષણાનિ સાવધાનતયા શ઼ૃણુ ॥ ૭૩॥

સ્વપ્નેઽપિ યન્મનો નિત્યં સ્વપતિં પશ્યતિ ધ્રુવમ્ ।
નાન્યં પરપતિં ભદ્રે ઉત્તમા સા પ્રકીર્તિતા ॥ ૭૪॥

યા પિતૃભ્રાતૃસુતવત્ પરં પશ્યતિ સદ્બિયા ।
મધ્યમા સા હિ કથિતા શૈલજે વૈ પતિવ્રતા ॥ ૭૫॥

બુદ્ધ્વા સ્વધર્મં મનસા વ્યભિચારં કરોતિ ન ।
નિકૃષ્ટા કથિતા સા હિ સુચરિત્રા ચ પાર્વતિ ॥ ૭૬॥

પત્યુઃ કુલસ્ય ચ ભયાદ્વ્યભિચારં કરોતિ ન ।
પતિવ્રતાઽધમા સા હિ કથિતા પૂર્વસૂરિભિઃ ॥ ૭૭॥

ચતુર્વિધા અપિ શિવે પાપહન્ત્ર્યઃ પતિવ્રતાઃ ।
પાવનાઃ સર્વલોકાનામિહામુત્રાપિ હર્ષિતાઃ ॥ ૭૮॥

પાતિવ્રત્યપ્રભાવેણાત્રિસ્ત્રિયા ત્રિસુરાર્થનાત્ ।
જીવિતો વિપ્ર એકો હિ મૃતો વારાહશાપતઃ ॥ ૭૯॥

એવં જ્ઞાત્વા શિવે નિત્યં કર્તવ્યં પતિસેવનમ્ ।
ત્વયા શૈલાત્મજે પ્રીત્યા સર્વકામપ્રદં સદા ॥ ૮૦॥

જગદમ્બા મહેશી ત્વં શિવઃ સાક્ષાત્પતિસ્તવ ।
તવ સ્મરણતો નાર્યો ભવન્તિ હિ પતિવ્રતાઃ ॥ ૮૧॥

ત્વદગ્રે કથનેનાનેન કિં દેવિ પ્રયોજનમ્ ।
તથાપિ કથિતં મેઽદ્ય જગદાચારતઃ શિવે ॥ ૮૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા વિરરામાસૌ દ્વિજસ્ત્રી સુપ્રણમ્ય તામ્ ।
શિવાં મુદમતિપ્રાપ પાર્વતી શઙ્કરપ્રિયા ॥ ૮૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે પતિવ્રતાધર્મવર્ણનં નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડે

## ૨.૩.૫૫. પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ । શિવયોઃ કૈલાસગમનવર્ણનમ્ ।

બ્રહ્મોવાચ ।
અથ સા બ્રાહ્મણી દેવ્યૈ શિક્ષયિત્વા વ્રતં ચ તત્ ।
પ્રોવાચ મેનામામન્ત્ર્ય યાત્રામસ્યાશ્ચ કારય ॥ ૧॥

તથાસ્ત્વિતિ ચ સમ્પ્રોચ્ય પ્રેમવશ્યા બભૂવ સા ।
ધૃતિં ધૃત્વાહૂય કાલીં વિશ્લેષવિરહાકુલા ॥ ૨॥

અત્યુચ્ચૈ રોદનં ચક્રે સંશ્લિષ્ય ચ પુનઃ પુનઃ ।
પાર્વત્યપિ રુરોદોચ્ચૈરુચ્ચરન્તી કૃપાવચઃ ॥ ૩॥

શૈલપ્રિયા શિવા ચાપિ મૂર્ચ્છામાપ શુચાર્દિતા ।
મૂર્ચ્છામ્પ્રાપુર્દેવપત્ન્યઃ પાર્વત્યા રોદનેન ચ ॥ ૪॥

સર્વાશ્ચ રુરુદુર્નાર્યઃ સર્વમાસીદચેતનમ્ ।
સ્વયં રુરોદ યોગીશો ગચ્છન્કોઽન્ય પરઃ પ્રભુઃ ॥ ૫॥

એતસ્મિન્નન્તરે શીઘ્રમાજગામ હિમાલયઃ ।
સ સર્વતનયૈસ્તત્ર સચિવૈશ્ચ દ્વિજૈઃ પરૈઃ ॥ ૬॥

સ્વયં રુરોદ મોહેન વત્સાં કૃત્વા સ્વવક્ષસિ ।
ક્વ યાસીત્યેવમુચ્ચાર્ય શૂન્યં કૃત્વા મુહુર્મુહુઃ ॥ ૭॥

તતઃ પુરોહિતો વિપ્રૈરધ્યાત્મવિદ્યયા સુખમ્ ।
સર્વાન્પ્રબોધયામાસ કૃપયા જ્ઞાનવત્તરઃ ॥ ૮॥

નનામ પાર્વતી ભક્ત્યા માતરં પિતરં ગુરુમ્ ।
મહામાયા ભવાચારાદ્રુરોદોચ્ચૈર્મુહુર્મુહુઃ ॥ ૯॥

પાર્વત્યા રોદનેનૈવ રુરુદુઃ સર્વયોષિતઃ ।
નિતરાં જનની મેના યામયો ભ્રાતરસ્તથા ॥ ૧૦॥

પુનઃ પુનઃ શિવામાતા યામયોઽન્યાશ્ચ યોષિતઃ ।
ભ્રાતરો જનકઃ પ્રેમ્ણા રુરુદુર્બદ્ધસૌહૃદાઃ ॥ ૧૧॥

તદા વિપ્રાઃ સમાગત્ય બોધયામાસુરાદરાત્ ।
લગ્નં નિવેદયામાસુર્યાત્રાયાઃ સુખદં પરમ્ ॥ ૧૨॥

તતો હિમાલયો મેનાં ધૃત્વા ધૈર્યં વિવેકતઃ ।
શિબિકામાનયામાસ શિવારોહણહેતવે ॥ ૧૩॥

શિવામારોહયામાસુસ્તત્ર વિપ્રાઙ્ગનાશ્ચ તામ્ ।
આશિષં પ્રદદુઃ સર્વાઃ પિતા માતા દ્વિજાસ્તથા ॥ ૧૪॥

મહારાજ્ઞ્યુપચારાઁશ્ચ દદૌ મેના ગિરિસ્તથા ।
નાનાદ્રવ્યસમૂહં ચ પરેષાં દુર્લભં શુભમ્ ॥ ૧૫॥

શિવા નત્વા ગુરૂન્સર્વાન્ જનકં જનનીં તથા ।
દ્વિજાન્પુરોહિતં યામીસ્ત્રીસ્તથાન્યા યયૌ મુને ॥ ૧૬॥

હિમાચલોઽપિ સસુતોઽગચ્છત્સ્નેહવશી બુધઃ ।
પ્રાપ્તસ્તત્ર પ્રભુર્યત્ર સામરઃ પ્રીતિમાવહન્ ॥ ૧૭॥

પ્રીત્યાભિરેભિરે સર્વે મહોત્સવપુરસ્સરમ્ ।
પ્રભું પ્રણેમુસ્તે ભક્ત્યા પ્રશંસન્તોઽવિશન્પુરીમ્ ॥ ૧૮॥

જાતિસ્મરાં સ્મારયામિ નિત્યં સ્મરસિ ચેદ્વદ ।
લીલયા ત્વાં ચ દેવેશિ સદા પ્રાણપ્રિયા મમ ॥ ૧૯॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય મહેશસ્ય સ્વનાથસ્યાથ પાર્વતી ।
શઙ્કરસ્ય પ્રિયા નિત્યં સસ્મિતોવાચ સા સતી ॥ ૨૦॥

પાર્વત્યુવાચ ।
સર્વં સ્મરામિ પ્રાણેશ મૌનીભૂતો ભવેતિ ચ ।
પ્રસ્તાવોચિતમદ્યાશુ કાર્યં કુરુ નમોઽસ્તુ તે ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય પ્રિયાવાક્યં સુધાધારાશતોપમમ્ ।
મુમુદેઽતીવ વિશ્વેશો લૌકિકાચારતત્પરઃ ॥ ૨૨॥

શિવઃ સમ્ભૃતસમ્ભારો નાનાવસ્તુમનોહરમ્ ।
ભોજયામાસ દેવાંશ્ચ નારાયણપુરોગમાન્ ॥ ૨૩॥

તથાન્યાન્નિખિલાન્પ્રીત્યા સ્વવિવાહસમાગતાન્ ।
ભોજયામાસ સુરસમન્નં બહુવિધં પ્રભુઃ ॥ ૨૪॥

તતો ભુક્ત્વા ચ તે દેવા નાનારત્નવિભૂષિતાઃ ।
સસ્ત્રીકાઃ સગણાઃ સર્વે પ્રણેમુશ્ચન્દ્રશેખરમ્ ॥ ૨૫॥

સંસ્તુત્ય વાગ્ભિરિષ્ટાભિઃ પરિક્રમ્ય મુદાન્વિતાઃ ।
પ્રશંસન્તો વિવાહં ચ સ્વધામાનિ યયુસ્તતઃ ॥ ૨૬॥

નારાયણં મુને માં ચ પ્રણનામ શિવઃસ્વયમ્ ।
લૌકિકાચારમાશ્રિત્ય યથા વિષ્ણુશ્ચ કશ્યપમ્ ॥ ૨૭॥

મયાશ્લિષ્યાશિષં દત્ત્વા શિવસ્ય પુનરગ્રતઃ ।
મત્વા વૈ તં પરં બ્રહ્મ ચક્રે ચ સ્તુતિરુત્તમા ॥ ૨૮॥

તમામન્ત્ર્ય મયા વિષ્ણુઃ સાઞ્જલિઃ શિવયોર્મુદા ।
પ્રશંસંસ્તદ્વિવાહં ચ જગામ સ્વાલયં પરમ્ ॥ ૨૯॥

શિવોઽપિ સ્વગિરૌ તસ્થૌ પાર્વત્યા વિહરન્ મુદા ।
સર્વે ગણાઃ સુખં પ્રાપુરતીવ સ્વભજન્ શિવૌ ॥ ૩૦॥

ઇત્યેવં કથિતસ્તાત શિવોદ્વાહઃ સુમઙ્ગલઃ ।
શોકઘ્નો હર્ષજનક આયુષ્યો ધનવર્દ્ધનઃ ॥ ૩૧॥

ય ઇમં શ ृણુયાન્નિત્યં શુચિસ્તદ્ગતમાનસઃ ।
શ્રાવયેદ્વાથ નિયમાચ્છિવલોકમવાપ્નુયાત્ ॥ ૩૨॥

ઇદમાખ્યાનમાખ્યાતમદ્ભુતં મઙ્ગલાયનમ્ ।
સર્વવિઘ્નપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ॥ ૩૩॥

યશસ્યં સ્વર્ગ્યમાયુષ્યં પુત્રપૌત્રકરં પરમ્ ।
સર્વકામપ્રદં ચેહ ભુક્તિદં મુક્તિદં સદા ॥ ૩૪॥

અપમૃત્યુપ્રશમનં મહાશાન્તિકરં શુભમ્ ।
સર્વદુઃસ્વપ્નશમનં બુદ્ધિપ્રજ્ઞાદિસાધનમ્ ॥ ૩૫॥

શિવોત્સવેષુ સર્વેષુ પઠિતવ્યં પ્રયત્નતઃ ।
શુભેપ્સુભિર્જનૈઃ પ્રીત્યા શિવસન્તોષકારણમ્ ॥ ૩૬॥

પઠેત્પ્રતિષ્ઠાકાલે તુ દેવાદીનાં વિશેષતઃ ।
શિવસ્ય સર્વકાર્યસ્ય પ્રારમ્ભે ચ સુપ્રીતિતઃ ॥ ૩૭॥

શ ृણુયાદ્વા શુચિર્ભૂત્વા ચરિતં શિવયોશ્શિવમ્ ।
સિધ્યન્તિ સર્વકાર્યાણિ સત્યં સત્યં ન સંશયઃ ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે બ્રહ્મનારદસંવાદે દ્વિતીયાયાં રુદ્રસંહિતાયાં તૃતીયે પાર્વતીખણ્ડે શિવકૈલાસગમનવર્ણનં નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૩.૫૫॥

॥ ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયરુદ્રસંહિતાયાં તૃતીયઃ પાર્વતીખણ્ડઃ સમાપ્તઃ ॥ ૨.૩॥

*Shri Shiva Mahapuranam 23 Rudra Samhita Parvatikhandah*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*